133/2(c)

॥ कालनिर्णयसिद्धांतटीकाआरंभः ॥

Kalinirnaya Siddhanta Tika

श्रीगणेशाय नमः प्रणम्यैकरदं देवं शारदां गुरुमेव च। कालनिर्णयसिद्धांतं व्याकुर्वे विशदोक्तितः १ आंगिरा
द्यैर्गद्यपद्यैर्निबंधाः कृता नानावेदशास्त्रार्थविद्भिः भास्वत्स्वेते ह्यर्थसंदर्शनार्थं दीपाकारा मे कृतिर्गुर्जरस्य
२ जानंति ये भूरिशो भूरिविद्यास्तेषां निमित्तं न ममैष यत्नः उत्पत्स्यते मत्सदृशोपि कश्चित्कालो ह्यनंतो वि
पुला धरित्री ३ अथ ग्रंथकर्ता स्वाभीष्टं प्रतिजानीते शिवं कालतनुं नत्वा विपश्चिज्जनतुष्टये। कालनिर्ण
यसिद्धांतं वक्ष्ये ग्रंथानुसारतः १ व्याख्या शिवमिति अहं कालनिर्णयसिद्धांतं वक्ष्ये इत्यन्वयः कालः परा
परव्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययलिंगः तेषां विषयेषु पूर्वप्रत्ययविलक्षणानामुत्पत्ता
वन्यनिमित्तासंभवाद्यदत्र निमित्तं स काल इति सर्वकार्याणां चोत्पत्तिस्थितिविनाशहेतुः तद्व्यपदेशात्
क्षणलवनिमिषकाष्ठाकलामुहूर्तयामाहोरात्रार्धमासमासर्त्वयनसंवत्सरयुगकल्पमन्वंतरप्रलय
महाप्रलयव्यवहारहेतुस्तदवयवाः दिवसपक्षमासर्त्वयनाब्दाद्यास्तेषां निर्णयस्तत्कालविहिताचर
णनिश्चयः कालनिर्णयस्तस्य सिद्धांतो यस्मिंस्तं किं कृत्वा शिवं सच्चिदानंदरूपं परमात्मानं नत्वा तं वि
शिनष्टि कालतनुं अखंडदंडायमानोऽनाद्यंतवान्सर्वोत्पत्तिमतां निमित्तकारणं कालः स एव तनुः श
रीरं यस्येति कालतनुः परमात्मेत्यर्थः फलेनोक्तं। कालः सृजति भूतानि कालः संहरति प्रजाः कालः सुप्तेषु
जागर्ति कालो हि दुरतिक्रमः कालेन बलिरिंद्रोऽभूत्कालेन च निवर्तते कालएव पुनः कर्ता पुराणान्येवमू
चिरइतीशस्य कालस्वरूपत्वं। किमर्थं विपश्चिज्जनतुष्टये विशेषेणापश्यंतीति विपश्चित्त्वं स्वार्थमिति विपश्चि १
तस्तएव जनास्तेषां तुष्टये संतोषाय विपश्चितोपि प्रबंधलाघवं प्रेक्ष्य तुष्टिमेष्यंति यत उक्तं आद्याद्यत्राव

चित्रभंगीभिरभिप्रेतप्रसिद्धोक्त्यात लघ्वीवाथसमानदेवसुधियाकार्यप्रकारांतरमिति स्वकल्पितत्वंनि
राकुर्वन्नाह ग्रंथानुसारत इति ग्रंथाः माधवाचार्यरामचंद्राचार्यरघुनाथराजप्रभृतिरचितानिबंधास्ते
षांमतानुसारेणं ततइति तत्रादौयद्यपिकालमानंपूर्वाचार्यैश्चांद्रदैवजैवपित्र्यार्क्षसौरेंदुसावनमानवभे
देननवविधोक्तंतत्रव्यवहृतयेकालावयवीभूतदिवसप्रभृतीनांचतुर्विध्यमाह सौरार्क्षैंदवसावनाश्चादि
वसामासारवेःसंक्रमात्रिंश्यं ३० शो १ भमित २ स्तिथिप्रमितितो ३ व्योमागनाडी ६० मितः ४ ॥ संक्रांत्यं १ इंदि
नर्क्षभोगवशातो २ दर्शावधिः ३ खाग्न्य ३० ह ४ श्चांद्रोहौसितपक्षजौ ॥ सितदलो २ हृद्ध्याश्चपाद्रुंप्यते ॥ २१ ॥
सौरेति । दिवसाश्चपरंमासाश्चतुर्धेतिशेषः तत्प्रकारमाह सौरार्क्षैंदवसावनाः संक्रमात्रिंश्यंशस्त्रिंश
त्तमोभागः सौरोदिवसः संक्रमादित्यत्रसंक्रांतराशिमानात्त्रिंशत्तमोंशोभागमितएव नतुसंक्रांत्यवच्छिन्न
सावनदिनानांत्रिंशत्तमोभागः त्रिंशद्भिरंशैरेकराशिस्तत्क्रमेणेत्यर्थः १ चांद्राधिष्ठितनक्षत्रावच्छिन्नोदि
वसआर्क्षः ऋक्षसंबंधी दिवसः २ तिथिप्रमितितः तिथिकालावच्छिन्नश्चांद्रो दिवसः ३ व्योमांगनाड्यःषष्टि
घटिकाः ६० तन्मितः सावनो दिवसः ४ तथा च विष्णुधर्मोत्तरे तिथिनैकेनदिवसश्चांद्रमानेप्रकीर्तितः अ
होरात्रेणचैकेनसावनोदिवसःस्मृतः आदित्यराशिभोगेनसौरोदिवसउच्यते चंद्रनक्षत्रभोगेन नाक्ष
त्रोदिवसःस्मृतइति एवंमासाश्चतुर्विधाः सौरार्क्षैंदवसावनाइति संक्रांत्याराशिभोगेनसौरोमासः १ इंदो
रश्विन्याद्यखिलानिऋक्षाणितेषांभोगआक्रमणंतेननाक्षत्रोमासोभवति २ दर्शांततः अन्यदर्शांता
वधिश्चांद्रोमासः ३ खाग्निभिर्मितान्यहानिवाराः यस्मिन्स खाग्न्यहः सावनमासोभवति ४ तथा चोक्तं

का॰नि॰सि॰ २

विष्णुधर्मोत्तरे प्रथमः सावनो मासो द्वितीयश्चांद्र उच्यते नाक्षत्रस्तु तृतीयः स्यात्सौरो मासश्चतुर्थक इति तथाच
ज्योतिःशास्त्रे । दर्शावधिं मासमुशंति चांद्रं सौरं तथा भास्कर राशिचारात् । त्रिंशद्दिनं सावनसंज्ञमार्या नाक्ष
त्रमिंदोर्भगणाभ्रमाच्चेति । अन्यत्रापि । चांद्रः शुक्लादिदर्शांतः सावनस्त्रिंशता दिनैः । एकराशौ रविर्यावत्का
लं मासः स भास्करः । सर्वर्क्षपरिवर्तनैर्नाक्षत्रो मास उच्यत इति । स चांद्रो मासो द्विधा । शुक्लप्रतिपदादिद
र्शांतावधिरेकः । कृष्णप्रतिपदादिपूर्णिमांतमपरः । अयं तु कृष्णादिर्मासो विंध्याद्रेरपाग्दक्षिणप्रदेशे । नेष्यते
नाद्रियते । तथाच त्रिकांडमंडनः । चांद्रोपि शुक्लपक्षादिः कृष्णादिश्चेति स द्विधा । कृष्णपक्षादिकं मासं नं नं
गीकुर्वंति केचन । येपीच्छंति न तेषामपीष्टो विंध्यस्य दक्षिणे । येपि विंध्यस्य दक्षिणे कृष्णपक्षादिमानं नेच्छंति
तेषामपि तद्दिष्टिस्तत्तन्मासव्रतादिर्भवति । कार्तिकमाघवैशाखस्नानानि तु कृष्णादितएव भवंतीत्यर्थः
॥२॥ ॥अथर्तुभेदमाह॥ ॥सौरश्चांद्र ऋतुः क्रियास्तिमिमुखाद्द्विः संक्रमश्चैत्रतो द्विर्मीसश्च वसंततो ऽय
न उदग्याम्येमृगात्कर्कतः ॥ चांद्रोब्दो विधुसप्तरामतिथिभि ३७१: सौरो नभोगाग्निभि ३६० र्भागैः पंच
षडग्निभिः स च रयो ३६५।१५ रब्दो भवेत्सावनः ॥३॥ सौर इति । सौरश्चांद्र इति ऋतु द्विधा । तथाच त्रिकां
डमंडनः । श्रौतस्मार्तक्रियाः सर्वाः कुर्याच्चांद्रेषु चर्तुषु । तदभावे तु सौरर्तौ विति ज्योतिर्विदां मतमिति । तत्रा
पि सौरो द्विधा । क्रियान्येषामादिः संक्रमएकः । तिमिमकरनक्तन्मुखात्तदादिर्द्विसंक्रमः परः । वसंततइति ।
तदंतुप्रवृत्तिर्वसंततः मुखेवा । एतद्द्वितूनां वसंतइतिश्रुतेः । मेषवृषौ वसंतो घः । मीनमेषौ वसंतः स्यादि इला २
त्यपरः । चांद्रस्तु चैत्रवैशाखाभ्यां वसंत इति चांद्रऋतुः । मधुश्च माधवश्च वासंतिकावृतुरिति श्रुतेः । एवं

द्विमासिकावसंताद्याऋतवोभवंति।ज्योतिःशास्त्रेपि।मृगादिराशिद्वयभानुभोगात्षड्चर्तवः शिशिरो स्मृः
वसंतः।ग्रीष्मश्चवर्षाश्चशरच्चतद्वद्धेमंतनामाकथितोत्रषष्ठइति।मृगात्मकरात्।कर्कात्।द्वेउदक्
याम्येद्वेअयनेभवतः।अयनेतुसौरएव।शिशिराद्यृतुत्रयमुत्तरायणं।वर्षाद्यृतुत्रयंदक्षिणायनं।तथा
चज्योतिःशास्त्रे।शिशिरपूर्वमृतुत्रयमुत्तरंह्ययनमाहुरहश्चतदामरं।भवतिदक्षिणमन्यदृतुत्रयं
निगदितारजनीमरुतांचसेति।त्रिधाब्दमाह।विधुसप्तरामतिथिभिः३७१श्चांद्रोब्दोभवति।नभो
गाग्निभि३६०रंशैःसौरोब्दः।पंचषड्ग्निभिःसांघ्रिभिर्दिवसैः३६५।१५सावनोब्दः।अब्दस्त्रिवि
धएव।तथाचब्रह्मसिद्धांते।चांद्रसावनसौराणांमासानांचप्रभेदतः।चांद्रसावनसौरास्तुत्रयःसं
नं वत्सराअपीति।तदब्दत्रयंतद्द्वादशमासात्मकं।द्वादशमासाःसंवत्सरइतिश्रुतेः।चांद्रोब्दःकदाचि
त्त्रयोदशमासात्मकोभवति।त्रयोदशमासाःसंवत्सरइतिश्रुतेश्च॥ ॥इतिकालनिर्णयसिद्धां
तेदिनादिवत्सरांतनिर्णयः॥ ॥अथमासादिकेकृत्यमाह॥ ॥चांद्रोविप्रविशामनुक्तविषयेपि
श्चथवैवाहिकेसौरःक्षत्रभुवांचसूतकविधौकृछ्रौषधेसावनः॥नाक्षत्रोदोभ्रमवोविवाहसदनाऽज्ञास्वा
दिसौम्यायनेयाम्येमात्रवराहभैरवनृसिंहाबोबलिध्रुक्स्थितिः॥४॥ ॥चांद्रइति।विप्राणांविशांच्चचां
द्रोमासउक्तः।यत्रमासनियमोनोक्तस्तत्रापिचांद्रः।पित्र्येपिकार्येचांद्रः।तथाचोक्तंब्रह्मसिद्धांते।अ
मावास्यापरिछिन्नोमासःस्याद्वाह्मपास्यतु।संक्रांतिपौर्णमासीभ्यांतथैवनृपवैश्ययोरिति।विवाहवि
षयेसौरः।क्षत्रियाणामपिसौरउक्तः।तथाचार्कैश्वावार्कैः।प्रायःसौरंमानमिष्टंविवाहइति।सूतकविधावा

शौचे कृच्छ्रेषु प्राजापत्यचांद्रायणादिषु। औषधे भेषजे सेवने। सावनः प्रोक्तः। नाड्यादौ घटीसाधनादौ भभवो ना
क्षत्रः काल उक्तः। तथा च ज्योतिःशास्त्रे। वर्षायनर्तुयुगपूर्वकमत्र सौरान्मासास्तथा च तिथयस्तु हिमांशुमाना
त्। यत्कृच्छ्रसूतकचिकित्सकवासराद्यं तत्सावनाच्च घटिकादिकमार्क्षमानादिति। अन्यत्रापि। सौरो मासो
विवाहादौ यज्ञादौ सावनः स्मृतः। आब्दिके पितृकार्ये च चांद्रो मासः प्रशस्यत इति। ह्ययनकृत्यमाह। सौम्या
यने। विवाहः सद्मनं गृहं। अजो विष्णुस्तस्यास्य प्रतिष्ठा। तदादि। आदिपदाद्वापीकूपतडागप्रासादादि
प्रतिष्ठोत्सर्गः। एतदादि सत्कर्म विधेयं। तथा चोक्तं। देवतारामवाप्यादि प्रतिष्ठोदग्गते रवौ। दक्षिणात्रागमु
खे कुर्वन्न तत्फलमवाप्नुयादिति। आदिशब्दाद्विवाहादिमंगल्यं ग्राह्यं। याम्यायने मातरो गौर्यादयः
भैरवा असितांगाद्याः वराहो यज्ञवाराहः। नृसिंहः। अंबा महिषमर्दिनी। बलिध्रुक् त्रिविक्रमः। बलये द्रुह्य
तीति बलिध्रुक्। एतेषां स्थितिः प्रतिष्ठा स्यात्। तथा चोक्तं देवीपुराणे। मातृभैरववाराहनारसिंहत्रिवि
क्रमाः। महिषासुरहंत्र्यश्च स्थाप्या वै दक्षिणायने इति॥ ॥इति मासायनकृत्यं॥ अथ मलमासः ४ सं
क्रांत्या रहितोऽधिकः सितमुखो मासश्चांद्रकोऽन्याभिधः स्यान्मासैरदनैः सषोडशदिनैर्नाडीच
तुष्कान्वितैः। ३२।१६।४। पूर्वस्मात्परएकमासितरणेः संक्रांतियुग्मात्क्षयो मासः कार्तिकतस्त्रये
परपुरस्तत्राधिमासद्वयं ॥५॥ व्याख्या॥ सितमुखः शुक्लादिश्चांद्रो मासः संक्रांत्या रहितोधिको मा
सो भवति। तथा च भृगुः। एकराशिस्थिते सूर्ये यदा दर्शद्वयं भवेत्। हव्यकव्यक्रियाहंता स भवेदधिमा ३
सकः। चांद्रो मासो ह्यसंक्रांतिर्मलमासः प्रकीर्तित इति। अग्न्योयः ससंक्रांतिमासस्तत्तुल्या अभि

न्यायस्य सः प्रमाण्नामा भवति। तदुक्तं ब्रह्मसिद्धांते। षष्ट्यातु दिवसैर्मासः कथितो बादरायणेः। पूर्वमर्धं परि
त्यज्य कर्तव्यान्वोत्तरे क्रियेति वचनात् परनामा ऽद्यस्यापि। स एकस्मादधिमासात् परोऽधिकमासो रदेंदूद्वात्रिं
शन्मासैः षोडशभिर्दिनैर्घटीचतुष्कसहितैः समायाति। तथा चोक्तं वसिष्ठसिद्धांते। द्वात्रिंशद्भिर्गतैर्मा
सैर्दिनैः षोडशभिस्तथा। घटिकानां चतुष्केण पतत्यधिकमासक इति॥ ॥अथ क्षयमासः॥ ॥एकमासीति।
कार्तिकित्रये। कार्तिकादिमासत्रये। एकमासि एकस्मिन्मासे तरणेः सूर्यस्य संक्रांतियुग्मं भवति सक्ष
यास्यः स्यात्। एतदुक्तं भवति। चेत्कार्तिके संक्रांतिद्वयं भवति। तदा कार्तिकस्य क्षयः समार्गशीर्षना
माभवति। तत्र क्षयमासात् परपुरोऽधिमासद्वयं भवति। चैत्रादिषट्के एकः। आश्विनादिषट्के परः सक
दाचिद्भवति। तदुक्तं सिद्धांतशिरोमणौ। असंक्रांतिमासोऽधिमासः स्फुटः स्याद्विसंक्रांतिमासः क्ष
याख्यः कदाचित्। क्षयः कार्तिकादित्रयेनान्यतः स्यात्तदा वर्षमध्येऽधिमासद्वयं चेति॥५॥ तत्संभ
वार्थमाह॥ ॥वर्षैरेकयुगेंदुभि १४१ नवकुभि १९ स्तत्संभवोऽत्रादिमः संसर्पोऽधिकमाः क्षयाख्य
उदितश्चांहस्पतिश्चाधिकः॥ पाश्चात्यास्त्रिषु नेषुदेवसदनक्षोणीरोहहेष्पुत्सवाः प्रोक्ता ह्युद्दितये स्मृ
तीरितपितृश्रौताश्रितास क्रिया॥६॥ ॥व्याख्या॥ तस्य क्षयमासस्य संभवः एकयुगेंदुभिर्वर्षैः क्वचि
न्नवकुभि १९ वर्षैः प्रोक्तः। तदुक्तं ब्रह्मसिद्धांतशिरोमणौ। गतोऽब्ध्यद्रिनंदैर्मिते शाककाले ९७४
तिथीशै १११५ र्भविष्यस्तथांगाक्षसूर्यैः॥१२५६॥ गजाद्र्यग्निभूभि १३७८ स्तथा प्रायशोयं कुवेदेंदुव

१४१
यैर्प्रौ कश्चिज्ञो कुंभि१०श्चेति। क्षयमासयुक्ते वर्षे य आदिमोधिकमासः संसर्पाख्यः क्षयस्य नाम अंहस्पतिः पा
का॰नि॰सि॰ श्चात्योधिमासः। एतदुक्तं। यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा। ससर्पांहस्पती मासावधिमासश्च
४ निंदिताः॥ वक्ष्यमाणवचनेन त्रयं त्याज्यं। एषु त्रिषु मासेषु देवगृहक्षौरविवाहयागोत्सवाः न। तथा चोक्तं ज्योतिः
शास्त्रे। यद्वर्षमध्येधिकमासयुग्मं तत्कार्त्तिकादित्रितये क्षयाख्यः॥ मासत्रयं त्याज्यमिदं प्रयत्नाद्विवा
यज्ञे हौत्सवमंगलेषु॥ मंगलशब्देन क्षौरोपनयनादि ग्राह्यं। आद्यद्वितीये ससर्पांहस्पसोमासयोः स्मृत्क
क्तपितकार्याश्रिताश्रौताश्रितास्त्क्र क्रियाभवत्येव। तथा च जाबालिः। मासद्वयेब्दमध्ये तु संक्रां
तिर्न यदा भवेत्। प्रोक्तस्तत्र तु पूर्वः स्यादधिमासस्तथोत्तर इति। अन्यच्च ज्योतिःशास्त्रे। एकत्र मा
सद्वितयं यदि स्याद्वर्षेधिकं तत्र परोधिमासः। त्रयोदशो तु श्रुतिराह वेदे चतुर्दशाः क्वापि न चात्र दृष्ट इति ॥६॥
अथ मलमासे कृत्यान्याह॥ ॥गर्भाधानमुखाः क्रिया वितनुयादन्नाशनांताः शिशोस्तन्नांदीमुखया
गमिंदुतपनग्रासो श्रद्दानाङ्कवो॥ तद्वार्ङ्मृतकस्य दाहविधितो मुख्याब्दिकांताः क्रियाः पाताम्मापित्
ज भत्रयादर्शतिथिश्राद्धं गर्भे क्षायिकं॥७॥ ॥व्याख्या॥ अधिकेमासेत्रिंशोगर्भाधानादि अन्नप्राशनां
ताः क्रियाः संस्कारान्वितनुयात्। तथा च काठकगृह्यपरिशिष्टे। यवव्रीहितिलैर्होमा जातकर्मादिकाः
क्रियाः। अनन्यगतिकत्वेन कर्तव्यं स्यान्मलिम्लुचे इति। गर्भाधानादिकाः सर्वाः प्राशनांताश्च याः क्रियाः।
सर्वा मलिम्लुचे कार्या इत्यन्यत्रापि। तन्निमित्तं तज्जातकर्मादि प्राशनांतं कर्मनिमित्तं वृद्धिश्राद्धं। चंद्रसू राम
र्यग्रहणे स्नानदानादिश्राद्धं च। तथा चोक्तं। चंद्रसूर्यग्रहे चैव मरणे पुत्रजन्मनि। मलमासेपि देयं स्यात्पितृ ४

गांलूत्तमक्षयमिति। मृतस्य दाहादितः प्रथमाब्दिकांताः क्रियावितनुयात्। तथाचकाठकगृह्ये। प्रेतमात्स्यादि
मारभ्यश्राद्धं पिंडोदकक्रियाः। सपिंडीकरणांताश्चयथाकालमुपस्थिताः। मघात्रयोदशीश्राद्धंप्रत्य
पस्थितिहेतुकं। अनन्यगतिकत्वेनकर्तव्यंस्यान्मलिम्लुचइति। पातोव्यतीपातःअमादर्शः। पितृभंमघा
त्रयोदशीतिथिश्राद्धंत्रयोदशीश्राद्धं। गजछायाभवंश्राद्धंचकुर्यात्। तथाचबृहस्पतिः। नित्यनैमित्तिक
कुर्यात्प्रयतःसमलिम्लुचे। तीर्थश्राद्धंगछोजयांप्रेतश्राद्धंतथैवचेति। निसंव्यतीपातदर्शादिश्राद्धं। नै
मित्तकंमघागजछायादि। शेषंस्पष्टं॥ ७॥ ॥अन्यकृत्यमाह॥ ॥संध्यावंदनमग्निहोत्रमुखतोःमासपौर्ण
मासक्रियाःप्रायश्चित्तमिहोथितंचपुनराधानंतथापत्तिषु॥ नव्यान्नेष्टिरथान्यमासिमृतकस्याद्याब्दि
कंचाधिकेनष्टस्यापरमाब्दिकंप्रथमतःश्राद्धंगयायांचरेत्॥ ८॥ व्याख्या। संध्योपासनं। श्रौतस्मार्तसं
यंप्रातर्होमवैश्वदेवपिंडपितृयज्ञादिदर्शपौर्णमासेष्टिचरूप्रांताः क्रियाः मलिम्लुचेकुर्यात्। नित्यनैमित्तके
कुर्यादितिबृहस्पतिवचनंप्राग्लिखितं। अन्यच्च। अवषट्कारहोमाश्चपर्वचाग्रयणंतथा। मलमासेपिकर्तव्यं
काम्याइष्टीश्चवर्जयेत्। अवषट्कारहोमाः नित्यहोमादि वैश्वदेवपिंडपितृयज्ञादयः। पर्वशब्देनदर्शपौर्णमा
सौस्थालीपाकौ। आग्रयणंदुर्भिक्षे। मलमासेपिकर्तव्यमिति। दुर्भिक्षेआग्रयणेष्टिकरणाजीर्णान्नाभावा
६ तत् न्नवान्नप्राप्तौतत्करणोत्तरंभक्षणेनप्राणनमितिदृष्टार्थं। इहप्रायश्चित्तोत्पत्तौ। पुनराधानं। आपत्कालेतु
आग्रयणंव्याख्यातपूर्वं। शुद्धमासिमृतस्यप्रथमाब्दिकं। तथाचवृद्धवसिष्ठः। असंक्रांतेपिकर्तव्यमाब्दिकंप्र
थमंद्विजैः। तथैवमासिकंश्राद्धंसपिंडीकरणंतथेति। कंदरगालामुपाकर्मयुगादीनांतुवर्जयं। मलमासेपिकर्तव्यंप्र
थमाब्देतथैवच। यदाअपूर्णेसंवत्सरेमृतमासोधिकः तदाप्रथमाब्दंमलिनेकुर्यात्। अपूर्णेसंवत्सरेसमासोयो
प्यधिकोभवेत्। तदात्रयोदशेकुर्यात्प्रथमाब्दंसदाबुधैः। प्रथमाब्देतुकर्तव्यंनीलस्योत्सर्जनंतथा। प्रेतस्यैकाद
शाहंचतन्मलादौनदुष्यति। मलमासमृतानांचश्राद्धंयत्प्रतिवत्सरं। मलमासेतुकर्तव्यंनान्येषांतुकदाचनेति।

५ कृतकृच्छ्रादीत्यत्रपादांतविकल्पत्वेनगुरुस्थानेलघुत्वं।५

का॰नि॰सि॰ ५

अत्रमलमासेमृतस्यतुप्रथमाब्दंमलमासेनसंभवति।परंतुकदाचिद्बहुभिर्वर्षैःसएवमासोमलमासःस्यात्तदातत्र
मलमासेतस्याब्दिकांतरंकर्तव्यमितितात्पर्यार्थः।तदभावेतुशुद्धेमासिविधेयं।अथमंगयाश्राद्धंसार्वकालिकं
कुर्यात्।उक्तंचवायुपुराणे।गयायांसर्वकालेषुपिंडंदद्याद्विचक्षणः।अधिमासेजन्मदिनेतथास्तेगुरुशुक्रयोः।नत्यक्तव्यंगया
श्राद्धंसिंहस्थेचबृहस्पतौ।अत्रश्राद्धस्ययात्रापूर्वकत्वाद्यात्राप्रतियात्रानुनिषिद्धेत्यर्थः।एतत्सर्वंमलमासेपिकुर्यादितिपरेणान्व
यः॥८॥अन्यकृत्यमाह॥ ॥पार्जन्येष्टिरथामयार्तविषयंकाम्यंपुरांगीकृतकृच्छ्रादिव्रतपूर्णता।आतुरजनेदानादिसन्यासता॥प्रा
ग्दृष्टामरतीर्थसेवनमथोपाकर्मसिंहेरवौछंदोगद्विजनेःकुसीदच्चयःस्यान्नित्यसत्रार्पणं॥९॥ ॥व्याख्या॥पार्जन्येष्टिः
कारीर्यादीष्टिःरोगार्तनिमित्तंकाम्यंजपहोमादि।मलमासात्प्रागंगीकृतकृच्छ्रादिव्रतसमाप्तिः।तथाचकाठकगृह्ये।प्रव
र्तंमलमासात्प्राग्यत्काम्यमसमापितं।आगतेमलमासेपितत्समाप्यमसंशयमिति।आतुरजनस्यदानादि।सन्यासग्र
हणंच।पूर्वदृष्टतीर्थदेवतासेवनं।अथानंतरं॥सामगद्विजनैःसिंहस्थेरवौसतितूपाकर्मप्रोक्तं।यतउक्तंछंदोगपरिशिष्टे।सिं
हरवौतुपुष्यर्क्षेपूर्वाह्णेविचरेद्बहिः।छंदोगामिलिताःकुर्युरुत्सर्गंसर्वछंदसामिति।सिंहेरवावितिनियमाद्द्वितीयारंभोभव
त्येव।अधिमासारंभोनस्यादिति।कुसीदंकालांतरदेयंदत्तंधनंतत्रचयोमासिकवृद्धिःस्यात्।नित्यसत्रार्पणंनित्यदानं।
एतत्सर्वंमलमासेस्यात्।तत्रयमः।गर्भेवार्धुषिकेभृत्येप्रेतकर्मणिमासिके।सपिंडीकरणेनित्येनाधिमासंविव
र्जयेत्॥गर्भेगर्भसंस्कारे।वार्द्धुषिकेकुसीदच्चये।भृत्येवेतनविधाविति॥९॥ ॥कृत्यांतरमाह॥ ॥चातुर्मास्य
समादृतव्रतविधिःश्राद्धंयुगाद्युद्भवंस्याद्दृष्टंचमलिम्लुचेदशहराज्येष्ठेसितेदिक्तिथौ॥ ॥कैश्चि
त्सौरमितेद्वयंनिगदितंदेवव्रतनाशोपुनःसंस्कारःप्रतिमास्कृतैतनमिदंकार्यंहिमासेधिके॥ दे
॥१०॥ ॥व्याख्या॥ ॥चातुर्मास्यनिमित्तंप्रारब्धव्रतविधिः॥एकभक्तादिव्रतानि।युगादिविषयंश्राद्धं
॥दशहरास्नानंच॥एतद्द्वयंशुद्धेमासिमलमासेचद्वयोर्भवति।उत्तरेदेवकार्याणिपितृकार्याणितूभयोरित्युक्तत्वा
त्॥दशहरास्नानंतुज्येष्ठेमासिसितेपक्षेभवति॥तल्लक्षणंस्कंदपुराणे॥ज्येष्ठेमासिसितेपक्षेदशम्यांबुधहस्त

राम ५

नं

स्तयोः। गरानंदव्यतीपातेकन्याचंद्रेखरेवृषे। दशयोगेनरः स्नात्वा सर्वपापैः प्र
मुच्यते इदं दशहरास्नानं युगादिश्राद्धं च केचिदाचार्यैः सौरमासेकृतं इदं स
र्वं सर्वमेव लिख्यते। परमस्यनिरुक्तिः। वैशाखशुक्लतृतीया चांद्रतिथिर्युगादि।
तत्र वैशाखशुद्धो प्रमाण वैशाखे प्रतिपदि संक्रांतौ सूर्यस्य तृतीयां शोभवति। तृ
तीयायामिति सुपपन्नं। एवं भाद्रपद विशुद्धो प्रमाण भाद्रपदे कन्याकें स्याद्वाविंशां
शास्य विंशतिमतिथौ त्रयोदश्यां भवति। कार्तिक शुद्धो प्रमाण कार्तिके सितन
वम्यां संक्रांते नवमीं शोभवति। माघशुद्धो प्रमाण माघे त्रिंशत्तमतिथौ रात्रौ त्रिं
शत्तमीं शोभवति। तेन युगादिनिर्णयः सौरचांद्रसाहचार्यात्प्रमाण मौ १ णमासे
ष्वाद्यतः। दशहरास्नानं शुभ लिनज्येष्ठ समुपपन्नं। तत्र वृषार्के स्यावश्यं

का॰ नि॰ सि॰ ६ सायित्वादिति सिंधौ लिः॥ ॥अतिमासु दुष्टस्य शीदितो देवलनाशे पुनः संस्कारः॥ द्वे
तनं नष्टसंजीवनमिदं पूर्वैर्व्याख्यातं। इदं सर्वमधिके मासि कुर्यात्॥१०॥ ॥अथ मल
मासे वर्ज्यान्याह॥ कालातिक्रमतोऽनित्यं कर्मसमाप्ता कूपयाथ व्रतोद्वाहसौरजनीचि
काम्यकरणारंभः समामाग्निस्तथा इष्टापूर्तमपूर्वतीर्थसुरयोर्यात्राप्रतिष्ठाऽमरीका
भ्यासोद्वह अग्निकं परमथो पाकर्मचोत्सर्जनं॥११॥ व्याख्या। वुधैरेतानि वुध्यावु
द्धिपूर्वकं विव्यार्य अधिमासे वर्ज्यानीत्युत्तरेणान्वयः। एतानि कानि। कालातिक्र
क्र मात् अन्नप्राशनं। निष्क्रमणं। समाद्धाकुभिः नामकरणं। एतान्यनन्यगतिक
त्वेन वर्ज्यानि। तत्र गार्ग्यः। नामकर्म च जातेष्टिं यथाकालं समाचरेत्। अतिपा
तेतु कुर्वीत प्रशस्ते मासि पुण्यभे इति॥ अतिपाते कालातिक्रमे। अथो व्रतवं राम
धविवाहसौ जातेष्टि काम्यकर्मारंभाः समाप्तिर्ष्येष्टापूर्तं पूर्वतीर्थदेवयात्रां च ६
र

वर्जयेत्। तत्र गार्ग्यः अपूर्वदेवतां दृष्टा कुचःस्पृर्नष्टे भार्गवे। मलमासेप्यनारब्धतीर्थया
त्रां च वर्जयेत्। अनावृत्तमित्यपूर्वमित्यर्थः। देवप्रतिष्ठाकाम्यवृषोत्सर्गादि वर्जयेत्। तथा च
ज्योतिः पराशरः। अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च। वेदव्रतवृषोत्सर्गचूडाकरण
मेखलाः। मांगल्यमभिषेकं च मलमासे विवर्जयेत्। अग्निष्ठार्थ प्रतिष्ठा। दानानि महा
दानानि। वृषोत्सर्गस्तु काम्य एव। अभिषेको राजाभिषेकः। परं द्वितीयं सांवत्सरीयश्राद्धं
वर्जयेत्। तेनात्र शुद्धमासमलस्य परमादि निषिद्धं। तथा च सत्यव्रतः। वर्षे वर्षे च कं
यच्छ्राद्धं मातापित्रोर्मृतेहनि। मलमासे न कर्तव्यं व्याघ्रस्य वचनं यथेति। उत्तर देव
कार्याणि पितृकार्याणि चासयोरित्यादि लिखनं मलमासे निषिद्धश्राद्धदर्शश्राद्धपरं।
उपाकर्मोत्सर्जने वर्जयेत्। अनयोः संमतिरग्रे वक्ष्यते इति ॥११॥ पुनर्वर्ज्यान्याह ॥ अ
ग्न्याधानन्तृपाभिषेकनवरात्राद्यं च दीपावलीहोलाऽऽजोश्चितिसुनिपार्श्वविरति

का·नि·सि·
७

दर्निमतत्त्वाष्टका:।श्राद्धं चापरपाक्षिकं श्रवणाकाकर्मादि मासाख्ययाप्रोक्तानीत्यमु
मानि मास्यधिके वर्ज्यानि तु धात्ताु धे:॥१२॥ अग्न्याधानं राजसिषेकं च। एतौ
पूर्वश्लोके व्याख्याततरौ। नवरात्राद्यं व्रतादि दीपावली दीपमालिका। होला होलि
काकारणं। अजस्य विष्णोरुत्थानस्यापपार्श्वविवर्तनं। महादानं। अष्टकाश्रयं कर्म।
अपरपक्षश्राद्धं। श्रवणाकर्मादीनि मासस्संज्ञया उदितानि अत्रल विशेषाणि
शुभकर्माणि च मलमासे वर्ज्यानीत्यर्थः। तथाचोक्तं। मलनव्युगतिं निसंकुर्या
न्नैमित्तिकीं क्रियां। सोमयागादिकर्माणि नित्यान्यपि मलिम्लुचे। पुष्टीष्याग्र
यणाधानयात्तु मस्यादिकान्यपि। महालयाष्टकाश्राद्धोपाकर्माद्यपिकर्म
सत्त। स्पष्टं मासविशेषाख्यं विहितं वर्जयेन्मले। मासविशेषाख्यमिति दी
पालेवलनवरात्रादि विष्णुशयनपार्श्वविवर्तनप्रबोधप्रभृतिकमपि॥

राम
७

इतिमलेवर्ज्यानि॥१२॥अथक्षयमासिवर्ज्यंकृसंग्राह॥यद्वर्ज्यंचमलिम्लुचे
तदखिलंमासिक्षयाख्येत्यजेत्।प्रारब्धस्यसमाप्तिरत्रपुनरारंभोविधेयस्त
था।क्षीणोयः खलुमासस्तदीयपरतोयोमासएत।स्थितंयद्धांवत्सरमत्र
मासिलनुयात्संक्रांतिद्युग्मान्विते॥१३॥व्याख्या।यन्मलिम्लुचेवर्ज्यंतत्क्ष
यमासेपिवर्ज्यं।तत्रविशेषः पूर्वारब्धस्यसमाप्तिरत्रभवति।अन्यथाका
र्तिकमासस्यक्षयांतःपातेचातुर्मास्यव्रतानामसमाप्तिःप्रसज्येत।आ
रंभान्नियमेदोषस्त्वासमाप्तस्यादितिकात्यायनवचनात्।द्वितीयारंभोपि
भवति।अन्यथापौषमासस्यक्षयांतःपातेपूर्वारब्धस्यमाघस्नानस्यपुनरा
रंभः प्रसज्येत।तस्माद्द्वितीयारंभोभवति।एतेनार्थात्प्रथमारंभोनभव
तीत्युपपन्नं॥योमासः क्षीणःक्षयंगतः लसेत।योमासः एतयोर्मध्ये यस्मां

त्सरीयं तत्संक्रांतियुग्मान्विते क्षयमासे पूर्वापरपक्षविभागेन कर्तव्यं। तथा च वृद्धः। एक एव यदा मासः सं
क्रांतिद्वयसंयुतः॥ मासद्वयगतं श्राद्धं तस्मिन्नेव प्रकल्पयेदिति॥१३॥ अथ क्षयमासे मलिम्लुचजन्मनोर्व्य
वस्थामाह। द्विःसंक्रांतियुतमलिम्लुचतिथिषु भागं तिमाधं क्रमात् क्षीणस्याग्रिममासिकस्य तिथ्यो
थमोज्ञेयास्तो जन्मनि प्राक्शुक्रस्त्रिदिनं शिशुर्दशादिनं रधो १० सवेत्पश्चिमे तद्वत्संचदिना
जि बाल ५ उदितो द्विवासराः सूरिभिः॥१४॥ द्विरिति। संक्रांतिद्वययुतमासे रविमलिम्लुचतिथि
षु क्रमात्पूर्वापरार्धे याः क्षीणस्याग्रिमस्य सर्वास्तिथयो ज्ञातव्याः। जन्ममहोत्सवसांवत्सरिका
चे दाविषयव्यवस्था। एतदुक्तं भवति। कार्तिके संक्रांतिद्वयं सर्वाति तदा कार्तिकः क्षयं गतः तन्नाम
मार्गशीर्ष इति संपन्नं। अतः मासे प्रतिपदि पूर्वार्धे यदि जन्म निर्मितिर्वा भवति तदग्रिमवर्षे कार्तिकमासि सितप्रति
पदि जन्मोत्सवसांवत्सरिके भवतः। चेत्प्रतिपदुत्तरार्धे जन्ममृत्यू वा भवेत्तदाग्रिमवर्षे मार्गशीर्षमासि तत्प्र
तिपदि जन्मोत्सववार्षिके स्तः। एवं द्वितीयादिषु। पूर्वापरार्धयोर्मासद्वयतिथयऊहनीयाः। तदुक्तमन्यत्र।
तिथ्यर्धे प्रथमे पूर्वो द्वितीयेर्धे तदुत्तरः। मासाविति बुधैश्चिंत्यौ क्षयमासस्य मध्यगाविति। अथ भृगुजीवयोः
शैशववृद्धत्वाद्याह शुक्रः प्रागुदितस्त्रिदिनं बालः। तत्रैवास्तासन्नो दशादिनं वृद्धो भवेत्। तद्वत्पश्चिमे पंचाहिना
नि वृद्धः। तथैवोदितः द्विवासराः दशदिनानि सूरिभिर्बालः प्रोक्त इति। तदुक्तं रत्नमालायां। प्रागुद्गतः शिशुर
हस्त्रितयं सितः स्यात् पश्चाद्दशाहमिह पंचदिनानि वृद्धः। - - - प्राग्दिनानि कथितानि वसिष्ठमुख्यैरिति। अन्य
त्रापि। उग्रानसोदशपंचवपश्चिमे गतिवशात्त्रिदशाहमपश्चिमे। शिशुजरत्वमहान्मुदमास्तयोरिति॥१५॥
॥ ॥अथ गुरोः शिशुत्वजरत्वे आह॥ ॥प्रागस्तादुदयात्परं सुरगुरुः पक्षेपादः ११४

सिते धः शिशौ वा बाले स्थविरे स्तगुरौ कार्यं न कुर्यादिदं । चौलाग्न्याहितमौलि
व्रत पसुरस्थानव्रवधागमो घोपाकर्म महादानवोत्सर्गो हरेर्ज्याध्वरा: ॥१५॥ ।
आगस्त्यादिसुरगुरुरस्त्यात्कुदयात्परं पक्षे पंचदशादिने ई धः शिशुर्भवतिप्री
वरस्तु पक्षमिहच धःशिशुर्धिवर्ज्य इति श्रीपतिवाक्यात् । एवं सिते बाले स्तवधगुरो वागु
र्याचिधवक्ष्यमाणं न कुर्यात् । चौलादिविधा हाता: संस्कारा: आलयं गृहं सुरस्थाद्
आध वप्रतिंनवंधप्रवेश: आद्योपाकर्म महापर्वणं महादानं । व्रतानि । नवोत्सर्ग: हरेर्ज्या
महारुद्रादि: अध्वरायागा: एतत्कार्यं न कुर्यादिति । तथाच्योक्तं बाले वाथ दिवा
रवधे शुक्रे वास्तमुपागते मलमासे दुवेतानि यत्नेये देवदर्शनमिति । मलमासोक्त
वर्ज्याणि सर्वाणि नन्यान्यानि । कृत्वा त्वं चौलाद्युद्वहनान्तमित्यादीनि । अ
प्यन्यत्र । अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे व्रतारंभोपवर्गे न च न कुर्यान्मेखली
बंधनं । वापीकूपतडागादिप्रतिष्ठायज्ञकर्म च । गृहप्रवेश गोदान स्नानासनमहोत्स

का॰ नि॰ सि॰ वानूनं कुर्यान्मलमासेपि गुरौ शुक्रे तथास्तगे ॥ इति गार्ग्योक्तेः ॥ अन्यच्च ॥ नीचस्थे वक्रिते वाप्यतिचरग
१ गते बाले च वृद्धास्तगे वा संन्यासो देवयात्राव्रतनियमविधिः कर्णवेधोपि दीक्षा ॥ मौंजीबंधोंगनानां
परिणयनविधिर्वास्तुदेवप्रतिष्ठास्त्याज्याः सद्भिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशिं प्रयाते इति
५ शुक्रास्तप्रतिवसवमाहे जीर्णग्रहानां तपुसमस्तुवधूप्रवेशं मांगल्यमनमोदो गुरुशुक्रयोरिति
वधूप्रवेशं इत्युद्वाहितानप्रवेश ॥२५॥ ॥ संमुखदक्षिणे शुक्रे निषिधमाह भिल्यभंकयु
द्धः कोन वधूः शुक्रे पुरो दक्षिणे नो गच्छेत्सदमे कपत्तेन विवाहे तीर्थराष्ट्रस्मृतौ ॥ नालोक्याभृ
गुवात्स्य काश्यप भरद्वाजांगिरो गोत्रिणां वासिष्ठात्रिभुवां यवक्रवलिते चैत्र द्विवारं स्य २९
जेतू ॥२६॥ ॥ व्याख्या ॥ शुक्रे पुरो दक्षिणे गच्छेयाम गर्भयुक्ता बालयुक्ता राजा नवोढा द्विरागमे ॥
एकपदे पदमात्रं नो गच्छेत्तदुक्तं गुर्विणी बालवांल्लैव वत्सा राजन्वोढा नपतिस्तथा ॥ पदमात्रं न गच्छे
त्तु भृगुं संमुखदक्षिणे पुरः ॥ एकपुरे एकविवाहे तीर्थयात्रायां ॥ देशविड्वे प्रति शुक्रो नालो
वाधि क्यः ॥ तदुक्तं ॥ एकग्रामे पुरे विवाहे राष्ट्रविप्लवे दुर्भिक्षे तीर्थयात्रायां प्रति शुक्रो न दुष्यती राम
तिथपुनरेते नांभृगुर्यातस्य काश्यप भरद्वाजांगिरो वासिष्ठात्रिगोत्रोद्भवानां भृगुः संमुख १

दक्षिणेनालोक्यः तथा योक्तं। ज्योतिःशास्त्रे। कश्यपेषु वसिष्ठेषु भृग्वांगिरस्सु च। भा
भारद्वाजेषु वात्स्येषु प्रतिशुक्रो न चिंत्यते इति। अथ बृहस्पतौ वक्रे वातिचारिते निषि
द्धं गते तत्र भयादेव शुभकार्ये सप्तविंशति वासरान् दिनान्नि त्यजेदिति विवेकः। तथा च।
भूपालवल्लभे अष्टाविंशति वासरान् गुरोर्वक्रेऽतिचारे त्यजेत्। सिंहे पञ्चनवांशका
१६।४० ग्गमते पंचेव पनीवांशकानिति। अथातिचारप्रसंगात् लुप्तसमाविचारः
ना कुंभमीनमेषवृषभेतरराशिषु गुरुरतिचारगतः पूर्वराशिं भ्यातिनदा लुप्तसंवत्स
रो भवेत्। तथा योक्तं। ग. जो। त्यक्त्वा कुंभेतरभेष्वतिचारगो न पूर्वराशिं गुरुरतिवक्रि
ति तः। तदा विलुप्ताब्द इहाभिनिंदितः शुभेषु रेवासुरनिम्नगांतरे इति मेषवृषकुं
भमीनेषु [illegible] न भवत्येव ॥१६॥ ॥पुनर्गुरुविचारमाह॥ स्याज्जीवे सिंह
गते सितास्तगदिनं तच्चजैर्विधेयं तथा केशांतिकं भंगं त्यजे [illegible] गुरुर्नक्रे
पिपंचांशासु [illegible] गोदावार्याश्च यासि मांश्च नविवाह क्षौरकार्यादि कार्यं तच्च

पश्चिमे
गोदावर्युत्तरे भागे भागीरथ्याश्च दक्षिणे॥ विवाहादि न कर्तव्यं सिंहस्थे च बृहस्पतौ॥१०

सदाचनात्परतरं तीर्थं हि गोदाप्लवात्॥१७॥ जीवइति। जीवे सिंहराशिगते शुक्रास्तेयद्वर्ज्यं
तोलाद्युद्वहनान्तमित्याद्युक्तं तद्वर्ज्यं॥ केचिदाचार्याः सिंहे मघागतं गुरुं त्यजंति। नक्रे
मकरे पंचांशगं नीचांशगं त्यजंति। गोदावरीदक्षिणतटनिवासिनां व्रतबंध विवाह
क्षौरादिकार्यं कार्यं स्यात्। अत्र सिंहस्थे गुरौ गोदाप्लवात् गोदावरीस्नानात्परं तीर्थं
न स्यादिति। तथा चोक्तं। सिंहराशिंगतो यस्मिन् दिने स्फुरगुरुर्भवेत्। तस्मिंस्तु गो
तमीस्नानं कोटिजन्माघनाशनं। पुष्करादीनि तीर्थानि त्रैलोक्यस्थानि यानि च। व
संति वर्षमेकं हि गौतम्यां सिंहगे गुरौ॥ अथ वर्ज्यान्याह। अन्यत्र। शांतिकं पौष्टिकं या
त्राप्रतिष्ठोद्वाहपूर्वकं॥ न कुर्यात्सर्वमांगल्यं सिंहं याते बृहस्पतौ। कर्त्तव्यमप्याह।
गर्भाधानादिकाः सर्वाः प्राशनांताः क्रियाश्च याः। कर्तव्याः सर्वदेशेषु सिंहस्थेपि
बृहस्पतौ। वरलोपाश्रितिकालाभ्यां दुर्भिक्षाद्देशविप्लवात्। गौतम्या दक्षिणे तीरे राम १०
सिंहे ज्येष्ठ्युद्वहः शुभः। सिंहस्थेपि मघासंस्थं गुरुं यत्नेन वर्जयेत्। अन्यत्र सिं

ह्भागेषु विचार्यादि विधीयते ॥ इति निर्णयसिद्धांते शुक्लास्तादिनिर्णयः ॥१७॥ अथ मुख्यगौणका
लनिर्णयः ॥ कालः कर्मणि यत्र यो स्याभिहितस्तत्रैष मुख्यो भवेत्तस्याभाववशेन गौणस्तु दिन
स्तिथ्यादिशेषात्मकः ॥ रात्र्याः स्यात्तपनोदयांत मुदितः स्मार्तस्तथा श्रौतका होमानिष्कृतिपूर्व
कः प्रथमतो गौणाः प्रधानापरः ॥१८॥ एवं प्रातर्नेहसोपि दिवसांतं दर्शबाधपुनाराकांत
ततः स्वकुहूवधिकं गौणाद्यर्थे कार्ययेः ॥ नैमित्तेय दर्शह वृद्धिजनुषा राष्ट्रिस्तदेवं विधिः
संध्यास्वांतिमकालकर्मनिष्कृति प्राधान्यपूर्वं चरेत् ॥१९॥ द्वयोर्थाख्या ॥ यत्र कर्मणि यः का
लो विहितस्तत्कालोस्ति तस्मिन्कर्मणि स कालो मुख्यो भवेत् ॥ तदुक्तं ॥ कर्मणो यस्य यः काल
स्तत्कालव्यापिनी तिथिः ॥ तया कर्माणि कुर्वीत ह्रास वृद्धी न कारणमिति ॥ मुख्यकालस्तावद्गौ
णकालमाह तस्याभाववशेनेति तस्य मुख्यस्याऽभाववशात्तिथिषोडशमिको पि गौणः ॥ एतदुक्तं
भवति ॥ मध्याह्नादिर्मुख्यकालो यस्मिन्कर्मण्यभिहितोस्ति तत्र कथंचिद्दुष्टतः कर्मण्यजातमु
ख्याभावेपि तात्तिथ्यादिशेषात्मके गौणेपि कर्तव्यं ॥ तथा चोक्तं ॥ मुख्य ति

३ स्योद्धरणमनस्तमितानुदितयोरितिपदद्वयंत्रास्तोदयात्प्रागुक्तेन नक्षत्रकालनिय+

कालि·सि· ११ ध्यंतिरोधेणलिखितोपिग्रंथनामिति॥ प्रसंगाद्धोमुख्यकालउच्यते। तत्रादावुद्धरणकालमा
ह। तत्रोद्धरणंसायंकालेसूर्यास्तात्प्राक्। प्रातरुद्धरणंतु तरणेरुदयात्पूर्वमिति। तथाचकात्या
यनः। सायंप्रातरग्निहोत्रेगार्हपत्यादाहवनीयमाह छंदोगपरिशिष्टे। सूर्येस्तङ्गतेलम
प्राप्तेषड्भिर्द्वाभ्यांसदांगुलैः। प्रादुष्करणमग्नीनांप्रातर्भासांचदर्शनादिति। अत्रसमयकृत
प्रच्छिन्नतोरुद्धरणाभावप्रायश्चित्तिरस्ति। तथाचस्मृतिः। तदाहुर्यस्याहवनीयमनुद्धृतमा
दित्योऽभ्यस्तमियात्किंतत्रकर्मकाप्रायश्चित्तिरिति। हरितं हिरण्यंदर्भेप्रबध्यपश्चा
दुद्धरेदित्यादि। अथहोमकालः। अस्तमितेजुहोति अनुदितेजुहोतीति कात्यायनः।
केचिदुदितहोमिनोभवंतितेषामप्युद्धरणंत्वनस्तमिते ऽनुदितेकर्तव्यंअनुद्धृते
प्रायश्चित्तस्मरणात्। अथहोमकालेप्युक्तेतत्रनियममाह कात्यायनः। याव
त्सम्यङ्नभाव्यंतेनभस्यृक्षाणि सर्वतः॥ लोहितत्वंचनापैति तावत्सायं
तुहूयते॥ प्रातस्तूद्धरणादनुसूर्योदयादर्वाग्घोमकालोऽर्थसिद्ध इति॥ स्मार्तेप्येव राम ११

मेव मुख्यकालः॥ इति मुख्यकालाभावे गौणः स्यात्॥ तद्यथा॥ स्मार्त्तः स्मृतिप्रोक्तः॥ शौनकः
शौनाचा होमो मुख्यभावाद्रात्र्याः रात्रेरारभ्य सूर्योदयान्तं प्रायश्चित्तपुरःसरं रात्रावेव स्यात्॥ य
दुक्तं भवति मुख्यकालान्नादारभ्य तपनोदयान्तं सूर्योदयानन्तरं प्रायश्चित्तपुरःसरः प्रातः प्रातर्होसा
यंहोमः स्यात्॥ तत्र गौण्यः प्रथमतः प्रधानः परतः॥ एवं प्रातःकालादारभ्य दिवसान्तमापत्तयाव
द्ध्वंहोमपरिशिष्ट॥ सायंहोमाव्यये प्रातर्हुत्वानां सायमाहुतिं प्रातर्होमं ततः कुर्यादेष एवोत्त
रोविधिरिति॥ एवं दर्शबाध्यतन एवं दर्शनादिवराकांतं पूर्णमासं यतं॥ एवमेव ततोरकोत्त
कुद्धवधिकं दर्शविधि॥ राकावाचेप्येवमेव विधिः॥ तथा च छंदोगे॥ प्राक्सायमाहुतेः॥
प्रातर्होमकालानतिक्रमः॥ प्राक्पौर्णमासाद्दर्शस्य प्राग्दर्शादितरस्य च॥ इदं रस्य पौर्ण र
मासस्येति॥ सायमाहुतेः प्राक्पूर्वे प्रातर्होमस्य कालानतिक्रमो वर्त्तते॥ सायंहोमात्पूर्वं प्रा
तर्होमं कृत्वा सायंहोमः स्यादिति भावः॥ एवं पौर्णमासात्प्राग्दर्शस्यापि॥ दर्शात्प्राक्पौर्ण
मासस्यापि॥ अथ नैमित्तिकं इति कुतश्चिन्निमित्तादिकाल्ययेप्येकधाधेयइदं दहनिह

का॰नि॰ विद्धि अनुपोः हव्यद्विजयोरग्निः स्यात् । तदहरेव जुहुयात् । तथोक्तं छन्दोगे । पूर्णमासात्यये
१२ य हव्यं होता चौदहर्भवेत् । तदहरेव जुहुयात् । अमावास्यात्यये पिबेत् । प्रायश्चित्त
म पुरः सरमिदं पि । प्रायश्चित्तं तु श्रौते आध्वर्यवे । स्मार्ते त्वनादिष्टे । एवं संध्यासु मुख्य
गौणकालौ वेत्तेति । तत्र मुख्यः । प्रातः संध्या सनक्षत्रा मध्याह्ने मस्तके रवौ । सा
यं काले तु सा संध्या रविनक्षत्रवर्जिता । नि । अत्र मुख्यातिक्रमे तिमकालेनत्यरसं
संध्यावंदनकाले सति कृतिसप्रायश्चित्तं प्रधानपूर्वं करेदिति । एतदुक्तं भवति । प्रातः
संध्याकाललोपे मध्याह्ने मध्याह्नसंध्यानंतरं प्राणायामादिकं प्रायश्चित्तं कृत्वा प्रा
तः संध्यां कुर्यादिति । एवमन्यत्रापि ॥१९॥ ॥अथावश्याकर्तव्यमाह ॥ ॥गे
णेष्वेव मिहोक्तेः कर्म करणं त्यागो न तत्कर्मणां त्यागोसो त्रिविधो क्रिया ॥ १परक
तं स्याया थोन्नोक्तं ३ ॥ ज्ञानेन गा करयोंतरा पुनरिदं कार्यं प्रधाना कृतो न सम राम॰ १२
देयपुनः समापितेषु धुरालोपे स्विन्नं नागके ॥२०॥ व्याख्या ॥ एयमत्रगोणेष्वपि

कालेपुनःशाखोक्तकर्मकरणमावश्यकं ॥ नकर्मणांत्यागोनकार्यः । असौत्यागस्त्रिविधः ॥ अ
क्रिया । अकरणं ॥ १ परकृतंपरशाखोक्तं ॥ २ यथाश्रद्धोत्तोनोकृतमित्ययथार्थकृतं ३ ॥ तत्र
कात्यायनः । अक्रियात्रिविधाप्रोक्ताविद्वद्भिः कर्मकारिभिः । अक्रियाचपरोक्ताचतृती
याचाऽयथाक्रिया । परोक्तकरणाद्दोषइत्याह ॥ स्वशाखाश्रयमुत्सृज्यपरशाखाश्र
यंचयः । कर्तुमिच्छतिदुर्मेधामोघंतत्तस्यचेष्टितं । तस्यपुरुषस्यचेष्टितं ॥ कर्ममोघंनिष्फ
लंस्यादिति । अविरोधेनिपदोक्तेत्रानिप्रसंगमाह । यन्नाम्नातंस्वशाखायांपरो
क्तमविरोधिच । विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवदिति ॥ अथमोहान्मुख्यांग
करणेविधिमाह ॥ आज्ञेनांगाकरणेंतरेति ॥ अंगस्याकरणेंतरशमध्येज्ञातेदुर्दर्शमनं
तत्रैवकर्तव्यंप्रधानाकरणेंतराज्ञातेतस्मादिप्रतद्वादिनः पुनःकार्यं । समाप्तिंकृधुरो
मुख्यस्यलोपेज्ञातेतत्कर्माऽवृत्तिमपिपुनःकार्यं ॥ समाप्तावंगलोपेंतदंगमपिन ज्ञाते
कुर्यात् ॥ तन्निमित्तप्रोक्तप्रायश्चित्तमेवकुर्यात् ॥ तथाच्छंदोगे ॥ कर्माऽयथाऽ

का·नि·सि·
१३

नैमित्तिकानावद्देवपुनःकुर्यात् ॥ अथ प्रधानस्य ॥ क्रियायांसांगंतत्क्रियतेपुनः ॥ तदंगाकरणेतु तु
र्णांप्रायश्चित्तंनकर्मतत् ॥ प्रयत्नमन्यथाकुर्याद्यदिमोहात्कथंचन ॥ यतःस्तदन्यथा
भूतंततएवसमापयेत् ॥ समाप्तंयदिजानीयान्मयैतदन्यथाकृतं ॥ तावदेवपुनः
कुर्यान्नावृत्तिःसर्वकर्मणामिति ॥ इतिनिर्णयसिंधौमुख्यगौणादिकालनि
र्णयः ॥ अथतिथिनिर्णयोनिरूप्यते ॥ तत्रशुद्धविद्धादिभेदमाह ॥ सूर्यास्तोदयोःश्रय प
यामितानत्याश्रमाख्यातिथिर्विद्धेत्यभिमपश्रिमांतिथिमथापूर्वापरा द्वि
द्वि विधा ॥ प्रातःत्रिरस्त्वैखथाक्रमतयापूर्वाह्णमध्यापराः ॥ प्रातःसंगवकौचरमध्यं
र्या अपराह्णःसायकंपूर्वंचधा २१ ॥ याख्यास्कंदेसूर्योदयेयामुहूर्तत्रयमिता
तिथिःसासूर्यास्तात्पूर्वश्रमावासूर्योदयादर्थ्या अभिमप ॥ श्रिमांतिथिंविध्यति ॥
एनपुकंमाधवे ॥ उदयेपूर्वयातिथ्याविध्यतेत्रिमुहूर्तकैः ॥ सायंतुउत्तरयातद् राम १३
न्यूनयामुहूर्तेनविध्यते ॥ चेष्यापित्रिमुहूर्तैर्वननन्यूनाचेधमर्हति ॥ कश्यापि २

धानयाश्रुधाहीयातिथ्यान्ययाहनि ॥ अन्ययातिथ्याहीनायातिथिः साधुदा ॥ अन्ययातिथ्या
युक्ता विद्धा ॥ श्राद्धायां नास्ति संदेहो दैवे पित्र्ये च कर्मणीति ॥ अथ दिनविभागमाह ॥ अह्नि द्विधा वि
भक्ते पूर्वापराह्णौ स्तः ॥ पुनरह्नि त्रेधा विभक्ते क्रमात्पूर्वाह्णमध्याह्नापराह्णाः भवंति ॥ पूर्वाह्णो वै देवानां
मध्यंदिनं मनुष्याणामपराह्णः पितॄणामिति श्रुतेः ॥ पंचधाह्नि विभक्ते प्रातः संगवमध्याह्नापराह्ण
सायमिति संज्ञाः स्युः ॥ अह्नि विभक्ते इति दिनमानघटिकाः ॥ द्विधा त्रिधा पंचधा वा विभाज्यास्तत्रमाद्य
भवति । तथा चोक्तं वृद्धपराशरेण । लेखाप्रभृत्यथादित्यान्मुहूर्तास्त्रय एव च । प्रातस्तु स स्मृतः कालो
भागश्चाह्नः स पंचमः ॥ संगवस्त्रिमुहूर्तोथ मध्याह्नस्तत्समः स्मृतः ॥ ततस्त्रयो मुहूर्ताश्च अपराह्णो वि
धीयते ॥ पंचमोथ दिनांशो यः स सायाह्न इति स्मृतः ॥ यच्च वेदेषु विहितं तत्र कुर्याद्विचक्षण इति ॥ द्वेधा
दिविभागस्य क्वचिदुपयुक्ताः स्तत्रैव कर्तव्याः ॥ एवं सर्वं मत्वा कर्मविशेषस्य तत्तद्भागकालत्वं
वगत्य कर्मविशेषेण तिथिनिर्णयोऽत्र वक्ष्यते ॥ २१ ॥ अथ सामान्यतस्तिथिनिर्णयः ॥ शुक्ले चंद्र
युवि गौर्ब्बरा [illegible] ॥१॥७॥१२॥१३॥१५॥ स्युः पूर्वविद्धास्तथा कृष्णेऽह्नि पुनर्गौरिं नंदा च दिग्भूताश्च पूर्वा नि
ताः ॥२४॥३॥७॥८॥९२॥१०॥१४॥ शुक्ले द्वि त्रि च तु पूर्वा संगवस्तदिग्गुद्रेन्द्राकाः ॥२॥३॥४॥५॥६॥८॥१०॥११॥१४

२॥स्व ६

५॥ पराः कृष्णेस्युः। शशिरामवसुमुख्यहरा मा विश्वसंख्याः १।३।५।४।१११।७।१२ तथा॥ २२॥ व्याख्या

का.नि. ॥ कृष्णपक्षे चेद्दुरूपक्षे प्रतिपत्॥ नगाः सप्तमी। ऋकाः सप्तमी॥ विश्वे त्रयोदशी॥ रवयो द्वादशी

१४पि एताः पूर्वविद्धाः स्युः। तथा रुद्रयक्ष्मा। द्विः द्वितीया। इषवः पंचमी। नगाः सप्तमी। अष्टाष्टमी। नं श्रा

दाः नवमी। रविद्वादशी। दिशो दशमी। भूतश्चतुर्दशी॥ एता अपि पूर्वविद्धाः स्युः। प्रतिपत्संमु

या खीकार्या भवेद्दापराण्हिका नि स्कंदात्॥ शुक्लप्रतिपत् पूर्वविद्धैव कर्तव्या। सप्तमी पक्षयोरुभयोः पूर्ववि

द्धैव ग्राह्या। तथा चोक्तं स्कांदे। षष्ठ्या युता सप्तमी च कर्तव्या नात्र संशयः। षष्ठी च सप्तमी यत्र तत्र सं नि

हितो हरिः। इति। नवमी तु द्वयोः पक्षयोः पूर्वविद्धा कार्या। न कुर्यान्नवमीं तात दशम्यां तु कदाचन। इति

स्कांदोक्तेः॥ शुक्लत्रयोदशी पूर्वविद्धा त्रयोदशी तु कर्तव्या द्वादशी सहिता विभो। इति ब्रह्मवैवर्तोक्तेः॥ द्वा

दशी तूभयोः पक्षयोः पूर्वविद्धैव। द्वादशी च प्रकर्तव्या एकादश्या युता विभो। सर्वकार्येषु विद्धा

द्धा विष्णुभक्तिपरायणे। इति। शुक्ले द्वितीया पूर्वविद्धा। प्रतिपत्संमुखी कार्या द्वितीया प्रतिपद्युता। १४

कृष्णपंचमी पूर्वविद्धा ग्राह्या। कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी। पूर्वविद्धा तु कर्तव्या न कर्हिचि

दिति। नवमी द्वादशी पाशाङ्कि रिपेत। कृष्णपक्षे दशमी पूर्वविद्धा। दशमी चैव कर्तव्या सदुर्गा द्विजसत्तम

पंचमी तु तथा कार्या चतुर्थ्या सहिता विभो इति स्कांदे + ॥ इति स्कांदवचनात्॥ कृष्णपक्षे चतुर्दशी प्राक्पू

र सप्तमी प्राग्युक्ता कृष्णाष्टमी पूर्वविद्धा २

वंपूर्वविद्धाः नियम्य परविद्धा आह। शुक्ले द्विन्नीति। द्वे द्वितीया। त्रयस्तृतीया। चत्वारश्चतुर्थी।
शराः पंचमी। अंगानि षष्ठी। वसवोष्टमी। दिशो दशमी। रुद्रा एकादशी। इंद्राश्चतुर्दशी। राका
पौर्णमासी। कृष्णपक्षे। शशी प्रतिपत्। रामास्तृतीया। षट् षष्ठी। युगानि चतु[illegible]थी।
हरा एकादशी। अमादर्शः। विश्वसंख्या त्रयोदशी। एताः परविद्धाः कार्याः। शुक्ल[illegible]
द्वितीया परविद्धा कार्या। शुक्लपक्षे तिथिर्ग्राह्या। यस्यामभ्युदितो रविरिति। तृतीया द्वयोः
पक्षयोः परविद्धा। रंभाख्यां वर्जयित्वा तु तृतीयां तु द्विजोत्तम। अन्येषु सर्वकार्येषु गुण
युक्ता प्रशस्यत इति। ब्रह्मवैवर्तात्। गुणयुक्ता चतुर्थीयुक्तेत्यर्थः। पक्षद्वयेपि चतुर्थी पर
विद्धा। युगाद्भूतानामिति वचनात्। शुक्ला पंचमी परविद्धा। पंचमी तु प्रकर्तव्या षष्ठ्या युक्ता तु
नारदेति ब्रह्मवैवर्तात्। षष्ठी तु पक्षयोरुभयोः परा ग्राह्या। नागविधानकर्तव्या षष्ठी
चैव कदाचन। सप्तमी संयुता कार्या षष्ठी धर्मार्थचिंतकैरिति स्कांदात्। शुक्लाष्टम्युत्तरा

का॰ नि॰ ९५

ग्राह्या। शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी। पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुतेति। शुक्ला द
शमी परा ग्राह्या। सर्वकार्येषु दशमी कृष्णा पूर्वोत्तरा सितेति ब्रह्मवैवर्तात्। एकादशीद्वयोरप्युत्त
राकार्या। एकादशी न कर्तव्या दशमीसंहिता विभाविति स्कांदात्। चतुर्दशी प्रागादिता।
पूर्णिमास्यमावास्ये परा। एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी। अमावास्या तृतीया च ता
उपोष्याः परान्विता इति विष्णुधर्मोत्तरात्। यत्तु दर्शं च पौर्णमासं च पौर्णमासं च पितुः सां
वत्सरं दिनं। पूर्वविद्धमकुर्वाणो नरकं प्राप्नुयात् इति तत्सावित्रीपौर्णिमावटपैतृकीअ
मापरं। कृष्णा प्रतिपत् उत्तरा ग्राह्या। प्रतिपत्सद्वितीया द्वितीया प्रतिपद्युतेत्यापस्तंब स्या
वचनात्। तृतीया चतुर्थ्येकादश्यः ।३।४।३०।११ पूर्वं व्याख्याताः। कृष्णा त्रयोदशी माए
तु परविद्धा। षष्ठ्यष्टमीत्वमावास्या कृष्णपक्षे त्रयोदशी एताः परयुताः कार्याः परा राम ९५
पूर्वेण संयुता इति निगमे ।२२। अथाष्टमीचतुर्दश्योः किंचिद्विशेषमाह। देवीशौरे

नवेष्टमीपरयुताकृष्णासिता पूर्णिमासावित्र्यांप्रथमा चचैत्रनपक्षसोःशुक्लाचतुर्दश्यपि।पंचा
व्योर्युजरामयो२।३ षड्गयो६।८ वेस्वंकयोः८।९ सम्रु गंस्तान्वीशोः१२।११ कृमयो१।३० स्तिथी
द्वमितयोः १५।१४ मितयोः साधारणनिर्णयः॥२३॥ व्याख्या। देवीचईदृचदेवीशोतयोर्व्रतके
रक्षिशिवव्रते याष्टमी सापरयुताकार्या। शुक्लाकृष्णापि। अष्टम्यानवमीयुतानवम्याप्यष्टमी वि
युता॥ अर्धनारीश्वरप्रायउमामाहेश्वरी तिथिः॥ अष्टमीनवमीयुग्मेमहादोषंमहोत्सवा।
शिवशक्त्योः शिवक्षेत्र पक्षयोरक्षयोरपीतिपा प्रात्। सावित्र्यामिति। सावित्रीव्रतेपूर्णिमाप्र
थ पमापूर्वविद्धाग्राह्या। तद्विवृत्तिः पूर्णिमानिर्णये वक्ष्यते। चपरं चैत्रनपक्षसोश्चैत्रश्रावण
योःपूर्वशुक्लाचतुर्दशी सापूर्वविद्धाग्राह्या। दमनकपवित्रारोपणयोः। पक्षयोः श्रावणमा
उ सस्यशुक्लायां चतुर्दशी साचतुर्दश्यपूर्वविद्धाग्राह्या रात्रिव्यापिनीग्राह्या परापूर्वाण्ह
गामिनीतिबोधायनोक्तेः। अथयुग्मतिथिभेदमाह। पंचाब्धयोः पंचमीचतुर्थ्यौ ५।४

भुजरामयोर्द्वितीयातृतीययोः २।३ षडगयोः षष्ठीसप्तम्योः ६।७ वस्वंकयोः अष्टमीनवम्योः ८।९
भानुविश्वेशोः द्वादश्येकादश्योः १२।११ कुमयोः प्रतिपद्दर्शयोः १।३० तिथीन्द्रमितयोः पूर्णिमा
चतुर्दश्योः १५।१४ एतयोस्तिथ्योर्मिथो युग्मं युग्मं सन्तु श्रेष्ठमुक्तं । तथा च निगमे युग्माग्नि
युगभूतानां २।३।४।५ षण्मुन्योः ६।७ वसुरंध्रयोः ८।९ रुद्रेण द्वादश्यायुक्ता ११।१२ चतुर्द
श्याच पूर्णिमा १४।१५ प्रतिपद्यप्यमावास्या ।।१।३० तिथ्योर्युग्मं महाफलं । एतद्व्यस्तं
महादुष्टं हंति पुण्यं पुराकृतमिति । अयं साधारणो निर्णयः ।।२३।। अथ युग्मादृतिरुच्यते ।।
कर्मानेहसि चेत्तिथिर्द्विदिनयोः पूर्णा न किंचित्तथा भागेनापि दिनद्वयं समभिया तत्रैव युग्मादरः
कर्मारंभणकालगात्र सुधिया ग्राह्या न युग्मात्तीरा व्युत्क्रमे जागरे पि च तथा ग्राह्या निशा गामि
नी ।।२४।। व्याख्या ।। वैधादिकर्मानेहसि कर्मकाले तिथिः दिनद्वये पूर्णा लभ्येत । दिनद्वयेपि न लभ्य
ते वा दिनद्वये समभागेनैकदेशेन समं प्राप्नुयात्तत्रानु केवल विशेष सति युग्मादरो भवतीति

शेषः। अत्र युग्मविचारे कर्मकालव्यापिनी ग्राह्या। तत्र युग्मादरेण। एतदुक्तं भवति। किंचिदष्टमीव्रतं
मध्याह्नकालकर्तव्यमस्ति तत्र पूर्वदिवसे मध्याह्नकालव्यापिनी अष्टमी वर्तते। परेद्युर्नि किंचिन्न्यूना
भवति नवमीयुक्ताप्यस्ति तत्र युग्मादरं विहाय कर्मारंभकालव्यापिनी ग्राह्येति स्पष्टं। रात्रौ सम्पू
र्णत्वे यद्व्रतं तद्व्रतं वा जागरस्तत्र निशाव्यापिनी तिथिर्ग्राह्या। तथा च जाबालिः। अहः सु तिथयः
पुण्याः कर्मानुष्ठानतो दिवा। नक्तादिव्रतयोगेषु रात्रियोगो विशिष्यते इति। नक्तादिशब्देन शि
पूजाजागरणादि ग्राह्यं॥ इति निर्णयसिंधौ साधारणतिथिनिर्णयः॥ २४॥ ॥ अथ व्रतवि
शेषे तिथिविशेषनिर्णयमाह॥ तत्रैकभक्तव्रतनिर्णयः॥ त्रेधा वाहनि पंचधैकभक्तानं मा
ध्याह्निके धेपरे मुख्यं चास्तमयावधीत उदितं गौणं समव्याप्तितः॥ तिथ्यो युग्मतिथी शि
नान्ना हि यदा व्याप्तिर्द्वयोर्वैशात्तु व्याप्यौ प्रथमैव तत्र विषमव्याप्त्याधिकां गृह्यते॥ २५॥
व्याख्या॥ अहनि द्युमाने त्रेधा विभक्ते पंचधा विभक्ते वा मध्याह्निके भागे परे धे मुख्यमेक
भक्तस्नानमित्येकभक्तव्रतं स्यात्॥ दिनार्धसमयेऽतीते भुज्यते नि~~[illegible]~~

का॰नि॰
१७

यमेनयत्। एकभक्तमितिप्रोक्तंन्यूनंग्रासत्रयेणात्विति देवलोक्तेः। इतोमध्याह्नात्परार्धतो
सामयावधिगौणमेकभक्तमुदितं। दिनार्धसमयेऽतीतइतिवचनात्। तिथ्योर्दिनद्वयेम
ध्याह्नेसमव्याप्तितः युग्मतिथीरितान्निर्णयः स्युग्मतिथिवचनादितिभावः। यदाद्वये
र्नव्याप्तिरथवास्पागतस्तुल्याव्याप्तिस्तदाप्रथमैवतिथिरेकभक्तेग्राह्यते। विषमव्या
प्त्यायाधिकासाग्राह्यते॥ अथनक्तव्रतनिर्णयः॥ ॥स्यान्नक्तव्रतकेप्रदोषसम
यकोस्तान्मुहूर्तत्रिकेव्याप्त्याहार्द्वितयेपरव्रनाहिचेद्याप्तिश्चातिथ्योर्द्वयोः॥सायाह्न
स्वपरत्रतोऽन्यविषयेप्येकाशनोक्तोविधिर्दर्शस्यप्युभयांविधवारविव्रतवतांसायंसदास्यान्निशि
॥२६॥ व्याख्या। अर्कास्तात्त्रिमुहूर्तात्मकेप्रदोषकालेनक्तव्रतकंस्यात्। प्रदोषव्याप्तिर्नियो
ज्यातिथिर्नक्तव्रतेसदा। प्रदोषस्त्रिमुहूर्तस्याद्दिवावस्तांगतेसतीतिस्कांदोक्तेः। यद्यप्यर्कास्तम
यादूर्ध्वंत्रिमुहूर्तःप्रदोषकालस्तुकस्तथापिनक्षत्रदर्शनादनंतरंनक्तव्रतंकर्तव्यं। संध्यायां

राम
१७

3

त्तोजननिषेधात् । संध्याकालस्तत्रैवोक्तः । सायंसंध्या त्रिघटिका अस्तादुपरि भास्वतः । चत्वारीमानि
कर्माणि संध्यायां परिवर्जयेत् । आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकं । आहाराज्जायते व्याधिर्दुष्टगर्भ
कृ श्च मैथुनात् । निद्रया ह्रियते लक्ष्मीः स्वाध्यायान्मरणं ध्रुवमिति । अत्र द्वितये दिनद्वये प्रदोषव्याप्तौ परत्र
परदिने नक्तव्रतं स्यात् तत्र जाबालिः । यदि स्यादुभयोस्तिथ्योः प्रदोषव्यापिनी तिथिः । तदोत्तरत्र नक्तं
स्यादुभयत्रापि सा यदि इति । चेद्यदि द्वयोस्तिथ्यो न हि व्याप्तिस्तदा परत्र परेह्नि सायान्हकाले नक्त
तं स्यात् । तथा च स्कांदे । प्रदोषव्यापिनी न स्यात् दिवा नक्तं विधीयते । आत्मनो द्विगुणछायामंदीभूते
दिवाकरे । तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भोजनमिति । अन्यविषये एकदेशसमव्याप्तौ वि
को षमव्याप्तौ वा एकदेशे तौ विधिः । एकभागे न व्याप्तौ पूर्वत्र । विषमव्याप्तौ याधिका सा ग्राह्येति ।
भिक्षूणां यतीनां विधवानां सूर्योपासकानां सदा सायान्हकाले भुजिः स्यात् । नक्षत्रदर्शना
न्नक्तं गृहस्थस्य विधीयते । यतेर्दिनाष्टमे भागे तस्य रात्रौ निषेधतः । अन्यच्च । नक्तं निशायां

कुर्वीत गृहस्थो विधिसंयुतः॥ यतिश्च विधवा चैव कुर्यात्तत्सदिवाकरं॥ सौरनक्तं तु सायाह्नव्या-
पिनी न प्रदोषगेति॥ ॥इत्येकभक्तनिर्णयः॥ ॥अथ व्रतविशेषे तिथिनिर्णयः॥ ॥
शुक्लादर्शयुता दिताप्रतिपदा कृष्णा द्वितीयान्विता तात्क्षैत्र धृतिरिक्तिताथवा केकोरे-
न्विता फाल्गुने॥ मात्स्ये प्रतिपद्युता यमयुजे ग्राह्या द्वितीया सिता शेषाः शुक्ल विधानतो
त्र्य्लीतिभिः कृष्णाः सितास्त्वादृताः॥ २७॥ ॥व्याख्या॥ शुक्लप्रतिपदा दर्श=

युताक्षमा तु द्वितीयान्विता। उदिते नित्यमाग् दिना। चैत्रधुरि स्थिता प्रतिपदा शुक्ला। चैत्रप्रतिपदपि द्वितीया
न्विता ग्राह्या। एतत्तु संवत्सरप्रवृत्ति वृषेश विचार विषयं। उपवासादौ न। तथा चोक्तं। शाशुक्ला प्रतिपच्चैव मासस्य वत्सरस्य वा।
कृत्यक्या पूर्वविद्धा न कर्तव्या परसंयुता। मुहूर्ता द्विता यदापि मुहूर्तं पदिवा परा। वर्तते वासरस्यास्मिन्नतः सा नृपतिर्भवेत्॥ भृगुः। उदये प्रतिपच्छ
षण्मुहूर्तमपि तद्दयां न स्मिन्दिने तु यो वारः स तु संवत्सराधिपः इति। फाल्गुनमासि बहुले पक्षे प्रतिपद्ग्राह्या न्विता। पौर्णमासी
युता कार्या एतदपि होलिकानिमित्तं पा मूल्मवपरं॥ ॥अथ द्वितीया। ऊर्जे सिता द्वितीया यमयजो भगिनीगृहे भोज
न विधौ प्रतिपद्युता ग्राह्या। यमयजिस्तु दीपोत्सवनिर्णये प्रलेख्या। शेषाः सिताः कृष्णाश्च द्वितीया सुमुहूर्ताभिराचा
र्यैरुक्ते विधान नष्टे इति साधारणेनोक्त निर्णयविधौ प्रहृताः संति॥२७॥ अथ तृतीया। माधशुक्लतृतीयका पितृसुराचा
र्योश्च पूर्वाण्हिकाद्विधान्हः कृतखंडयोः पितृमखके श्रेमराहुस्थिता। श्रेष्ठा सामबुधान्विता ऋक्ष४ युतारं भानुपू
तत्पर्धा र्धान्विता गौर्यामोदयिकी मुहूर्तमपि चेद्ग्राह्यौ रिविला॥२८॥ व्याख्या। माधवेशाखमासि शुक्लतृतीया पितृसुराचार्यो
पितृयजने देवतार्चने चान्हो द्विधाकृतखंडयोः पूर्वाह्णिकी ग्राह्या॥ सा सोमबुधान्विता रोहिणीयुता वा श्रेष्ठा भवंति।
तथा च नारदीये। वैशाखस्य सितपक्षे तु तृतीया रोहिणीयुता। दुर्लभा बुधवारेण सोमेनापि विशेषतः इति। रोहिणी
बुधयुक्तापि पूर्वविद्धा विवर्जिता। भक्त्या कृतापि मांधातः पुण्यं हंति पुराकृतं। गौरीविनायकोपेता रोहिणीबुधसं
युताग्विना पिरोहिण्यां योगास्तु शतकोटिप्रदायिनी। गौरी विनायके त्वत्र तृतीया चतुर्थीयुक्ता कार्या सा केश्चिदा
चार्यैः पितृमखे पितृयजने परान्हस्थिता गृह्यते। यतु कालादर्शे। अमावास्या पराह्णिकी त्यक्ता एवं मन्वंतरादीनां

युगादीनांच निर्णयः। महालयस्य पक्षस्य अष्टकानामपि स्मृतः। युगादीनामपि सर्वेषामपराह्णव्यापित्वेन प्राशस्त्यमुक्तं। तदनंतभट्टी
मपि मन्वाद्यास्तु युगाद्यास्तु पूर्वपक्षेश्च कासु चान्यापरे पुदर्शवर्ज्यो तिथ्यादिष्वेवमवहितपन्तु। हेमाद्रौ देवलवाक्ये युगाद्याः कृष्णपक्षे ६
शुक्ले पूर्वाह्णिके ग्राह्याः कृष्णे ग्राह्याऽपराह्णिके इति। तत्र पूर्वाह्णिके इति मध्याह्नात् पूर्वं शुक्लयुगादिश्राद्धारंभपरं। कृष्णे मध्याह्ना
दुपरि अपराह्णिके इत्यर्थः। अतो युगादिप्रयुक्तश्राद्धविषये भावास्याविदपराह्णिकी ग्राह्या। लक्ष्मीनारायणप्रजादौ चतुर्थी
युतैव ग्राह्येति सिद्धांतः॥ रंभाव्रतं तीयापूर्वान्विता ग्राह्या। तत्र रंभाख्यं वर्ज्यं पितृत्यादिष्वाग्नि स्थितं। गौरी मितिगौरीव्रते तु औदयिकी
मुहूर्तमात्रापि ग्राह्या। एतद्व्यतिरिक्ता रविलापि पूर्वाह्णिकी ग्राह्या॥२८॥ अथ चतुर्थीनिर्णयः॥ भाद्रशुक्लचतुर्थी को अंकगा
स्या नाविघ्नराजार्चने मध्याह्नगता। अथ संकष्टचतुर्थी इंदूदयव्यापिनी। चेद्दिनद्वये विधूदये परिगता नैकत्र वा चेदंत्या गागोर्या
घु स्त्या बहुलानतीपत्तिथि ग्राह्या पराह्णस्थिता॥२९॥ माधव्यां॥ भाद्रे मासि शुक्लचतुर्थी काः गणेशार्चने मध्याह्नगता ग्राह्या।
मासि भाद्रपदे शुक्ले चतुर्थ्यां। पूजामर्चयेन्नृपामन्त्रमपस्यगणेशस्य रूपं कृत्वा विधानतः। नित्यकर्म समाप्याथ दोकल्पोक्तविधिना
ततः। गंधपुष्पाक्षतैश्चैव मध्याह्ने देवमर्चयेदिति भविष्योत्तरवचनात्। चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते। मध्याह्नव्या
पिनी सा तु परतश्चेत् परेऽहनीति बृहस्पतिवचनात्। परत्र मध्याह्ने पूर्वदिनाभावे ज्ञातव्यं॥ दिनद्वये विमध्याह्नव्यापित्वे चेदि
नद्वये स्पर्शाभावे वा एकदेशतुल्यत्वाधिक्ये चतुर्थी या युक्ता ग्राह्या मातृविद्धा प्रशस्यत इति वचनात्। कार्तिकशुक्लचतुर्थी नागार्चने मध्या
ह्नव्याप्या युगं मध्यं दिने यत्र तत्रोपोष्य फणीश्वरान्। क्षीरेणाप्याय्य पंचम्यां पूजयेत्प्रयतो नरः। विषाणि तस्य नश्यंति न तं हिंसंति
स पन्नगा इति पुराणसमुच्चयोक्तेः। युगं चतुर्थी॥ अथ संकष्टचतुर्थी। संकष्टहरव्रते चतुर्थी इंदूदयव्यापिनी ग्राह्या। चेद्दिनद्वयेऽहरहर्द्वितीयेवि
धूदयाँ न दात्या ग्रा। परा ग्राह्या। दिनद्वयेपि वर्तते चतुर्थी यावत् विधूदये परैव व्रतिभिः कार्या गणनाथपरायणैः। चंद्रोदये यदा न स्यात् द्वि
दिवापि दिनद्वये प्रदोषव्यापिनी ग्राह्या चतुर्थी संकष्टव्रते इति पुराणसमुच्चयात्। गोर्या व्यापा चतुर्थी बहुला चतुर्थी गौरीचतुर्थी सा
२ चंद्रोदयकाले परिगता प्राप्ता चेत्तत्र विधूदये २

तृतीयायुक् तृतीयायुक्ता परा ण्हाव्यापिसा चतुर्थी स्थिता ग्राह्या। तथा चोक्तं। गौर्याश्चतुर्थी वटधेनुपूजा तु गोवर्द्धने भैरहोलि नं
का चा वत्सस्य पूजा शिवरात्रिरेताः परा विनिघ्नंति नृपं सराष्ट्रमिति पुराणसमुच्चयवचनात्। धेनुपूजा। बहुला चतुर्थी। वत्सपूजा
वत्सद्वादशी॥ २९॥ अथ पंचमी॥ शुक्ला कापि सिता सा त्रयमिता नागार्चने पंचमी ग्राह्या। भाद्रपदे मुनिव्रतपरैः शुक्ला मुहूर्तद्वयी
पजो नदस्कंदे च षट्प्रमाणमिता ऽन्या ग्राह्या षष्ठ्यन्यथा पश्चात्मभिकारूपोदयगता माघे सितान्यां नयुक्ता॥ ३०॥ व्याख्या। शुक्ला वा कृ
ष्णा वा पंचमी सा त्रयमिता मुहूर्तत्रयव्यापिनी नागार्चने नागपूजायां ग्राह्या। श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी।
तां परित्यज्य पंचम्यश्चतुर्थीसहिता हिताः। तां नागपंचमीं विहाय अन्याः पंचम्यश्चतुर्थीसहिताः हिताः मताः। तस्याः श्चतुर्थी वि
पि द्धाया निषेधात्। कूर्मे श्रावणे नागपंचमीकृचिमप्रचरेत्। अत एव शुक्ला वाप्यसिते त्युक्तं। अन्यत्र। नभसः पंचमी शुक्ला प्रोक्ता त्रि
मुहूर्ते पुना परा। एकभक्तव्रते ग्राह्या स्नाने चैवाहि पूजने। इति॥ ऋषिपंचमी॥ भाद्रपदे मासि मुनिव्रतपरैः। ऋषिपंचमीव्रतपरैः।
शुक्ला पंचमी मुहूर्तद्वयव्यापिनी ग्राह्या। भविष्योत्तरे। मासि भाद्रपदे शुक्ले पंचम्यां पूजयेन्नृप। मुनीन्। अत्र नद्यां तु सुस्नाता ह्याकर
मार्द्रींश्च सप्त वै। पंचमी चैव कर्तव्या षष्ठ्या युक्ता च भारत। मुहूर्तद्वितये वापि पंचमी यदि वा भवेत्। ऋषीणां पूजने चैव कर्तव्या
व्रतिभिः परा। चतुर्थी संयुता या तु पंचम्यामृषिपूजने। व्रतिभिर्नैव कर्तव्या यदि चेन्निःफलं भवेत् इति। यद्यपि मुहूर्तद्वयव्याप्य
श्लोक्ता तथापि क्षये मुहूर्तत्रयव्यापिन्यपि त्याज्या। तत्र दक्षः। त्रिमुहूर्ता न कर्तव्या या तिथिः क्षयगामिनी। द्विमुहूर्तापि
कर्तव्या या तिथिर्वृद्धिगामिनी ति। अथ स्कंदस्य जौ। स्कंदार्चने पंचमी तद्वत्परविद्धा ग्राह्येति। स्कंदोपवासे स्वीकार्या पंचमी प
रसंयुते निवचनात्॥ अथ षष्ठी। षण्मुहूर्तमानादल्पो यदि षष्ठ्युः पंचमी। ११ तदा ग्राह्या षष्ठी पूर्वविद्धा कर्तव्येति यावत्। अन्य
थात दधिकपंचमी १२ विद्धाप्यग्राह्या। नागविद्धा च या षष्ठी शिवविद्धा च सप्तमी। द्वादश्येकादशी विद्धा नोपोष्याः कथंचनेति। निषेधप्रयोजक मुः
श्चात्र पंचमविधानसामान्यरूपाद्धि मुहूर्तात्मकः। किंतु षण्मुहूर्तात्मकः। नागो द्वादशनाडीभिः दिक्पंचदशभिस्तथा। भूतोष्टादशनाडीभिः

का॰ नि
२०

ह्यपल्युत्तरां तिथि मिति स्कंदात्। स्कंदषष्ठी तु पूर्वविद्धैव कार्या। कृष्णाष्टमी स्कंदषष्ठी। शिवरात्रिचतुर्दशी एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं
भवेति॥ ॥अथसप्तमी॥ माघे मासि सिता सप्तमिका ऽरुणोदयगनाम्नानदीपकरणादानादौ ग्राह्या। इयं चलासप्तमी प्रोक्ता॥
अथ सर्वासि सप्तमी ॐ अंगयुक्षष्ठीयुक्ता ग्राह्येत्यर्थः॥ ३०॥ अथाष्टमी। तत्रादौ श्रीकृ
ष्णजन्माष्टमी॥ यास्यादष्टमिकानिशीथसमयं पूर्वापरा सैव तद्द्वे दीपनिशा
र्धगाय दिनवा ऽत्याकृष्णजन्माष्टमी॥ राज्यर्धेष्टमिकाकभेन ८ सहितासे पाज
यंती भवेत्तम्यधीद्वितयेष्टमीक मधुति स्तत्रापरा। कीर्तिता॥ ३१॥ व्याख्या॥ सा
रू कृष्णजन्माष्टमी द्विविधा॥ शुद्धा विद्धा च। तत्र सप्तमी योगरहिता शुद्धा। तद्व
ती विद्धा। न चात्र वेध्या याष्टमी अष्टम्यास्तिथ्यंतरव द्विवाप्रवेशो सूर्य्यवेधः कि
तु रात्रिमात्र स्वेपि सप्तमीवेधो भवत्येव। तत्र याऽष्टमिका पूर्वदिने परा
न्वा। निशीथसमये र्धरात्रे स्यात्सा व्रते श्रीकृष्णव्रते ग्राह्या। तथा च भविष्यो
त्तरे। मासि भाद्रपदेष्टम्यां कृष्णपक्षेर्धरात्रके। शशांके वृषराशिस्थे प्राज
पत्यर्क्षसंयुते। उपोषितोर्चयेद्विष्णुं यशोदां देवकीं तथा॥ यद्य[illegible]द्वेस
ष्टमी निशार्धगा वा॥ दिनद्वये पि निशार्धगा न। तदा त्यापरा कार्या। वज

राम
२०

नीयाप्रयत्नेनसप्तमीसंयुताष्टमीतिब्रह्मवैवर्तात्।पूर्वत्रनिशीथयोगाभावेर्ध्वो
पवासेकृतेपरदिनेतिथ्यंतेपारणासाध्याएवमष्टमीनिर्णयेजयंतीनिर्णी
ते।रात्र्यर्धइति।याष्टमिकारात्र्यर्धेकिंभेनरोहिण्यासहिताभवेत्सैषाजयंतीक
र्तव्या।अष्टमीरोहिणीयुक्तानिश्यर्धेदृश्यतेयदि।मुख्यकालःसविज्ञेयस्तत्रजा
तोहरिःस्वयमितिवसिष्ठवचनात्॥अर्धरात्रेतुरोहिण्यांयदाकृष्णाष्टमीभवेत्।
तस्यामभ्यर्चनाच्छौरेर्हन्तिपापंत्रिजन्मजमितिभविष्योत्तरात्।रात्र्यर्धेकिंभेनसहि
ताष्टमीतिसामान्यतउक्ता।तत्रपूर्वस्मिन्नेवदिनेमध्यरात्रेष्टमीरोहिणीयोगस्ते
दापूर्वैवकर्तव्या।तत्रविष्णुधर्मोत्तरे।रोहिणीसहिताकृष्णामासिभाद्रपदेष्टमी।सप्त
अपि म्यामर्धरात्राधःकलयैयदाभवेत्।तत्रजातोजगन्नाथःकौस्तुभीहरिरीश्वरः
तमेवोपवसेत्कालंकुर्यात्तत्रैवजागरं।अर्धरात्रेतुयोगोयंतारापत्युदयेनथा॥
नियतात्माशुचिःस्नातःपूजांतत्रप्रवर्तयेदितिवह्निपुराणेपि।सप्तमीसहिताष्ट
म्यांनिशीथेरोहिणीयदि।साभवेदष्टमीपुण्यायावच्चंद्रदिवाकरावितिपरास्म

का.नि.
२१

न्नेवदिने निशीथेष्टमीरोहिणीयोगेपरायाः ग्राह्यो । यथाज्ञानं । यदितस्य द्वितये
दिनद्वयेर्धरात्रेष्टमीरोहिणीयोगेपि कीर्तितौ । अविधायां व्रसक्षीयां ज्ञानादेव रा
किंनदनइति भविष्योत्तरात् । वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी । सऋक्षा
पि न कर्तव्या सप्तमीसंयुताष्टमी । निर्भ्रमैवं वर्तते हि ॥ ३१ ॥ अथ दिनद्वयेर्धरात्रे रो
हिण्यष्टमीयोगाभावे व्यवस्थापारणानिर्णयं चाह ॥ पूर्वत्राहि निशीथगाष्ट
मीतिथिश्चान्येद्युरेवाष्टमी प्राजापत्यसंयुतिः क्षणमिता याह्यपि जयंतीपरा ।
चेत्पूर्वेद्युरिहार्धरात्रसमयेतिथ्यर्क्षयोगव्रतं रुद्धवान्येद्युरिहोड्डतिथ्यपगमे
रात्रौतु भेवि सारणा ॥ ३२ ॥ प्रांते भस्यतिथेर्निशीथसमये यद्द्वौ हि त्राधंतदा स
क्तिश्चैकतरस्य वाप्यपगमे रात्र्या विहीनस्य सा । तिथ्यृक्षांते इहार्धरात्रस
मये ह्यत्र प्रभातेषु जिः साचेद्व्रतज सौमवारसहिता श्रेष्ठाबुजयंती स्मृता ॥
॥ ३२ ॥ व्याख्या ॥ चेद्यदि पूर्वस्मिन्नहनि निशीथगाष्टमी भवेत् । परेद्युः क्षणमिता राम
ष्टमीरोहिणीसंयुतिस्तदापराजयंती ग्राह्या ॥ विष्णुरहस्ये । प्राजापत्यर्क्ष २१

संयुक्ता कृष्णानभसि चाष्टमी। मुहूर्तमपि लभ्येत सैवोपोष्या महाफलेति वह्निपु
राणेपि। कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि। जयंती नाम सा ज्ञेयाठपोष्या
महाफला। वासरे वा निशायां वा यत्र युक्ता तु रोहिणी विशेषेण नभो मासि
सैवोपोष्या सदा तिथिरिति॥ तथा च स्कांदे। उदये चाष्टमी किंचिन्नवमी सक
अ लायदि। भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता। अपि वर्षशतेनापि लभ्यते यदि
वा न वेति। पद्मपुराणे। प्रेतयोनिगतानां च प्रेतत्वं नाशितं नरैः। यैः कृता श्रावणे
मासि अष्टमी रोहिणीयुता। किं पुनर्बुधवारेण सोमेनापि विशेषतः।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति॥ किंचिदष्टमीयुता नवमीग्रा
ह्येति रोहिणीसहिता चेत्। नान्यथेति। विना ऋक्षं न कर्तव्यं सप्तमीसंयुताष्ट
मी। कार्या विद्धापि सप्तम्या रोहिणीसहिताष्टमीति। पूर्वस्मिन्दिने। निशीथे
रोहि ण्यस्ति निशीथाद्र्ध्वमष्टमी परत्रापरदिने घटिका पि रोहिणी
स्यात्तत्रापरदिने व्रतं तथा च स्कांदे। सप्तमीसंयुताष्टम्यां भूत्वा ऋक्षं द्विजो

का॰ नि॰ २२

त्तमं प्राजापत्यं द्वितीये ह्निमुहूर्त्ते। भिवेद्य दि॥ तदाष्टम्यामिकं ज्ञेयं प्रोक्तं वर्षास
दिभिः पुरेति। अथ जन्माष्टमीजयंत्योः पृथक्त्वे जन्माष्टमी यत्र काजयंतीमुपव
सेत्। तदुक्तं माधवेनायस्मिन्वर्षे जयत्याख्ययोगो जन्माष्टमी न दा अंतर्व
ता जयंत्यास्याद्दृक्षयोगमत्रवास्तिनइति। अथ पारणानिर्णयः। चेत्पूर्धुराति। वे
चेमदिसवेध्यः पूर्वदिवसे धरात्रसमये तिथ्यृक्षयोगे इह व्रतं ह्युवा अन्येद्युरन्य
दिवसेन क्षत्रतिथ्यंते ज्ञातस्य पारणं गोक्तो॥ तदुक्तं पाद्मे कार्या विद्धापि सप्तम्या
रोहिणीसहिताष्टमी। तत्रोपवासं कुर्यात्तु तिथिभांते च पारणं। जन्माष्टमी
रोहिणी च शिवरात्रिस्तथैव च। पूर्वविद्धैव कर्तव्या तिथिभांते च पारण
मिति भृगुः। रात्रस्य ह्येयोरंते पारणं स्यादिति भावः। अष्टम्यामपि रोहि
एयां [illegible]न कुर्यात्पारणं क्वचित्। हन्यात्पुराकृतं कर्म उपवासार्जितं फलं। तिथि
रष्टगुणं हंति नक्षत्रं च चतुर्गुणं। तस्मात्प्रयत्नतः कुर्यात्तिथिभांते च पारण
मिति ब्रह्मवैवर्तनात्। इदं दिनविषयं॥ २२ ॥ रात्रिविशेषमाह। त्रांतो भस्येति राम २२

यत्तिथेर्भस्य चोभयोः प्रांतो निशीथसमयादर्वाक् स्यात्तदा निशार्धेपि
भुक्तिः स्येजिनं॥ निशीथव्यवहितक्षणे वा निशीथे कलाकाष्ठाविहीने
पि द्वयोः प्रांते न वैकतरस्यांते वा तत्रैव पारं मुक्तं यत्तु अन्यतिथ्यागमे रात्रौ ७
नामसस्तेजसो दिवा॥ नामसे पारणं कुर्वंस्तामसीं गतिमश्नुते इ
त्यादीनि रात्रिभोजननिषेधवाक्यानि तानि जयंतीव्रतभिन्नपरा
णि॥ तत्र जयंत्यां तु प्रतिप्रसवमाह॥ न रात्रौ पारणं कुर्यादृते वै रो
हिणीव्रतात्॥ तत्र निश्यपि तत्कुर्याद्वर्जयित्वा महानिशामि
ति निबंधवचनात्॥ वर्जयित्वा महानिशामित्यत्र निषेधप्राप्तौ

प्र
का॰नि
२३ प्रतिप्रसवमाह ॥ तिथ्यृक्षयोर्यदा छेदो नक्षत्रांतमथापि वा ॥ अर्धरात्रे
पि वा कुर्यात्पारणं त्वपरेहनीति हेमाद्रिधृतवचनात् । रात्र्या विहीनस्यै
त्यशक्तस्य तिथिभयोरेकतरस्यापगमे पेकस्यांते भुजिः सर्वनिर्वाह
पुराणे भांते कुर्यात् तिथिर्वापि शास्ते भारत रपाणं । रोहिणीसहिताचैव वि
हद्भिः समुपोषिता ॥ वियोगे पारणं चक्रुर्मुनयो ब्रह्मवादिन इति ॥ इहा रा
र्धरात्रे यदि तिथ्यृक्षांतं स्यात्तदा ऽशक्तस्य प्रातरेव भुजिः ॥
॥ ॥ तिथ्यंते वोत्सवांते वा व्रती कुर्वीत पारणमिति ॥ ॥ जाग
रांते दिवैव पारणमित्यशक्तविषयं ॥ ॥ सान्वे जयंती चंद्र जेन २३

बुधवारेण सोमवारेण वा सहिता न दातव्यं तं प्रशस्ता स्मृता ॥ तत्प्राशात्स्वयं प्रेतयोनिगता नामित्यादिप
मपुराणोक्तं लिखितं प्राक् ॥ ३३ ॥ इति जन्माष्टमीनिर्णयः ॥ ॥ अथ दूर्वाष्टमीनिर्णयः ॥ दूर्वाच्योष्ठ
मिकानभस्यसितगास्या द्रोहिणाख्यक्षणे ऽहर्द्वयेपि वरोहिणक्षणमिता नो वा तदा ऽद्योदिता । ज्येष्ठा
मूलभकन्यकार्कघटजालोके । द्विजैरर्चनं पक्वान्नेकभुजिक्रधिं सहितां त्यक्ताप्य काले व्रतं ॥ ३४ ॥ व्याख्य
ख्या ॥ दूर्वाख्यनिमित्तं याष्टमी सा नभस्यसितगा भाद्रपदशुक्लपक्षगता रोहिणास्थिथे मुहूर्ते स्यात् ॥
भाद्रपदशुक्लाष्टमी या सिता भवेत् ॥ दुर्वाष्टमी लुप्ता ~~कार्या ज्येष्ठामूलं च~~ ज्ञेया नोत्तरा सा विधीयत इ
ति ॥ अन्यच्च ॥ मुहूर्ते रोहिणे ष्टम्यां पूर्वा वा यदि वापरा ॥ दुर्वाष्टमी लुप्ता कार्या ज्येष्ठामूलं च वर्जयेदिति ॥
रोहिणी नवमो मुहूर्ते ज्योतिःशास्त्रप्रसिद्धः ॥ अथाहर्द्वये यदि रोहिणीक्षणे न प्राप्ता ॥ अथ ३
वाहर्द्वये रोहिणेक्षणे न प्राप्ता तदा ऽद्या उदिता । पूर्वा कथिता ॥ श्रावणी दुर्गनवमी दूर्वा चैव हुताशा
नी ॥ पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनमिति बृहस्पतिवचनात् ॥ इदं दुर्वाष्टमीव्रतं । ज्ये
ष्ठामूलरहिता यामष्टम्यां सिंहस्थे सूर्ये ऽगस्त्ये ऽनुदिते कर्तव्यं ॥ सिंहस्थे सा तमा सूर्ये ऽनुदिते
ऽमुनिसत्तमे ॥ इति स्कांदात् ॥ दुर्वाष्टमी लुप्ता कार्या ज्येष्ठां मूलं च वर्जयेदिति पूर्वोक्तवचनात् ॥ सा
शुद्धायां कर्तव्यमिति ॥ तत्र शुद्धायां किं कर्तव्यमित्यत आह । ज्येष्ठामूलभेति । ज्येष्ठा । मूलभं

कन्यास्थसूर्ये। घटजालेकोगस्त्योदयः॥ एतेषामन्यतमैकसत्वेऽष्टम्यां द्विजैर्ब्राह्मणैरर्चनंदू। वी
पूजनंकर्तव्यं॥ ब्राह्मणद्वारापूजाकार्येतिभावः॥ स्त्रीणांकर्तव्यतां शेषमाह॥ पक्वान्नैकभुजिः वि
पक्वान्नेनसिद्धान्नेनैकवारभोजनंस्यादिति। तथाचोक्तं। कर्तव्यात्वेकभक्तेन ज्येष्ठामूलंयदा
भवेत्॥ दूर्वामभ्यर्चयेद्भक्त्या नवंध्यांदिवसंनयेत्॥ पूजनेनित्यत्वंज्ञापितं॥ एंद्रर्क्षे पूजितादूर्वा
हंत्यपत्यानिनान्यथेति दोषाद्दृश्यते इत्युभयोर्वचनाविरोधः॥ परंनायंविरोधः॥ किंतु निषि
द्धयोगाभावेस्त्रीभिः स्वयंदूर्वासंपूज्याऽनग्निपक्वंभक्षयेदित्यादियथाविधिकर्तव्यं। निषिद्ध
योगेतु स्त्रीभिः स्वयंदूर्वां ~~स्वयंदूर्वासंपू~~ ब्राह्मणद्वारापूजांविधायसिद्धान्नेनैकभक्तं
कर्तव्यमिति। अथैकस्मिन्दिने कर्मकालव्यापिनीं ज्येष्ठामूलान्यतरयोगयुक्तां त्यक्त्वाऽन्यस्मि
न्दिने स्वल्पायामपिव्रतंकर्तव्यं॥ कुधिसहितांत्यक्त्वाप्यकालेव्रतमिति। कुधिष्ठ्ययुज्येष्ठामू ष्य
ले॥ ताभ्यांसहितांत्यक्त्वाप्यकालेन्यत्रस्वकालव्यापिन्यांकर्तव्यमिति तात्पर्यार्थः॥ अकु
ते रणेप्रत्यवायश्च। यानपूजयेद्दूर्वांमोहादिहयथाविधि॥ सात्रिजन्मसुवैधव्यंलभतेनात्रसं
शयः। तस्मात्संपूजनीया साप्रतिवर्षंवधूजनैः। सुखसंतानजननी भर्तुः सौख्यकरीस
देतिपुराणसमुच्चयोक्तेः। इति दूर्वाष्टमीनिर्णयः॥ ३४॥ एषैवाष्टमिकं इंदनसहिताज्ये

कन्यास्थसूर्ये। घटजालोकोऽगस्त्योदयः ।। एतेषामन्यतमैकसत्वेऽष्टम्यां द्विजैर्ब्राह्मणैरर्चनं दू। वी
पूजनं कर्तव्यं ।। ब्राह्मणद्वारा पूजा कार्येति भावः ।। स्त्रीणां कर्तव्यत्वे विशेषमाह ।। पक्वान्नैकभुक्तिः। वि
पक्वान्नेन सिद्धान्नेनैकवारभोजनं स्यादिति। तथा चोक्तं। कर्तव्यात्वेकभक्तेन ज्येष्ठामूलं यदा
भवेत्।। दूर्वामभ्यर्चयेद्भक्त्या नवधा दिवसं नयेत्।। पूजने नित्यत्वं ज्ञापितं।। ऐंद्रर्क्षे पूजिता दूर्वा
हंत्यपत्यानि नान्यथेति दोषाद्दृश्यते इत्युभयोर्वचनाविरोधः ।। परं नायं विरोधः ।। किंतु निषि
द्धयोगाभावे स्त्रीभिः स्वयं दूर्वा संपूज्या। नग्निपक्वं भक्षयेदित्यादि यथाविधि कर्तव्यं। निषिद्ध
योगे तु स्त्रीभिः स्वयंदूर्वां ~~स्वयंदूर्वासं~~ ब्राह्मणद्वारा पूजां विधाय सिद्धान्नेनैकभक्तं क
र्तव्यमिति। अथैकस्मिन्दिने कर्मकालव्यापिनी ज्येष्ठामूलान्यतरयोगयुक्ता त्यक्त्वाऽन्यस्मि
न्दिने स्वल्पापामपि व्रतं कर्तव्यं ।। क्रुधिसहितां त्यक्त्वाप्यकाले व्रतमिति। क्रुधिश्लोक्यज्येष्ठामू ष्य
ले।। ताभ्यां सहितां त्यक्त्वाप्यकालेऽन्यत्र स्वकालव्यापिन्यां कर्तव्यमिति तात्पर्यार्थः ।। अक
ले रणे प्रत्यवायश्च। यानपूजयेद्दूर्वां मोहादिह यथाविधि ।। सा त्रिजन्मसु वैधव्यं लभते नात्र सं
शयः। तस्मात्संपूजनीया सा प्रतिवर्षं वधूजनैः। सुखसंतानजननी भर्तुः सौख्यकरी स राम
दितिपुराणसमुच्चये श्लोकः। इति दूर्वाष्टमीनिर्णयः।। ३४।। एषैवाष्टमिकेंद्रभेदन सहिताज्ये

ष्टाष्टमी च व्रतं मो[illegible]षिलं तोष्टमी युक्ता सितां बार्चने ॥ मूलाप्याउ युता त्नमा परादिने सूर्योदये नोभ
वेद्रिक्तात त्र नगान्विता च वकुलाराज्यर्धगास्त्री व्रते ॥ ३५ ॥ व्याख्या एषैव भाद्रपद शुक्लाष्ट
मीइंद्रभे नज्येष्ठया सहिता यदा भवेत्तदा ज्येष्ठाष्टमी व्रतं कार्यं इति शेषः ॥ तथा चोक्तं ॥
कन्यास्थे र्के ष्टमी शुक्ला ज्येष्ठर्क्षे महती स्मृता ॥ अलक्ष्मी परिहाराय ज्येष्ठां देवीं प्रपूज
येदिति लिंगपुराणात् ॥ अथ महाष्टमी निर्णयः ॥ इषे आश्विने मासि सिताष्टमी लवतोप्यं
शेन नवमी युक्ता अंबार्चने देवीपूजने ग्राह्या ॥ य[illegible] अष्टम्यामुदिते सूर्ये दिनांते नवमी भवे
त् ॥ कुजवारो भवेत्तत्र पूज्या देवी ~~प्र अन्ये मध्याह्नपत्ता । अष्टम्यामुदिते ज्य~~ प्रयत्नत इ
ति ॥ नवमी संयुक्ता कार्या सदा दुर्गाष्टमी बुधैः ॥ सप्तमी संयुक्ता हंति पूर्वपुण्य कृतं फल
मिति विष्णुधर्मोत्तरोक्तेः । मूलयुक्तापि सप्तमी विद्धा निषिद्धा ॥ मूलेनापि हि संयुक्ता स पि
दा त्याज्याष्टमी बुधैः ॥ लेशमात्रेण सप्तम्या यदि स्यादपि दूषिते ति । मूलायोगे ति । मूलं ।
आप्यं अब्दे वतं पूर्वाषाढा ॥ तायां युता तु फलमा श्रेष्ठेति । कन्यागते सवितरि याष्टमी मू
लसंयुता ॥ पूर्वाषाढर्क्षया सार्धमृक्षद्वय युता थवा । सा महानवमी प्रोक्ता त्रैलोक्ये

...पि राम व्रतमिति। दिनद्वये मध्याह्ने नवमी योगाभावे पुनर्वसुयोगस्तु दिनद्वये भवति तदोत्तरा ग्राह्या। अष्टमीविद्धनिषेधा
...त्। मध्ये कस्मिन्दिने मध्याह्नव्यापिनी परदिने स्वल्पापि पुनर्वसुयुक्ता चेत्तदाऽल्पापि पुनर्वसुयुता ग्राह्या। तदुक्तमगस्त्य

पि दुर्लभेति। यदा नवमी दिने सूर्योदयोत्तरमष्टम्यास्त्रिमुहूर्तव्यापित्वान्नवमी विलोपेपि परेद्युः सूर्यवशा
न्नवमी सूर्योदये न स्पृशति तदाष्टमी सप्तमी विद्धा ग्राह्येत्याह। परदिन इति। परदिने रिक्ता नवमी यदा
सूर्योदये न भवेत्तदा नगान्विता सप्तमी विद्धा कर्तव्या तथा च स्मृतिसंग्रहे। यदा सूर्योदये न स्यान्नवमी चापि
रेऽहनि। तदाष्टमी व्रतं कुर्वीत सप्तमीसहितां नृप। दुर्गोत्सवेपि। उत्तरत्र तिथिर्यत्र क्षयं याति नराधिप। दुर्गाष्ट
भद्राच मी तदा पूर्वा बुधैर्यदस्तु शुभमन्यथेति॥ तथा च। अहोभिर्द्वाचं नाव योरंतरं क्वचित्। तस्माद्दै सप्तमी विद्धा कार्या दुर्गाष्टमी तिथिरित्या
दिवाक्यानि क्षयविषयाणीति ज्ञेयानि। इति महाष्टमी॥ ॥इहैव मासे बहुलाष्टमी कृष्णाष्टमी श्रीव्रतं लक्ष्मीव्रतं। राज्यर्धगामध्यरा
त्रिव्यापिनी ग्राह्या॥ तत्र पुत्रत्रयश्चंद्रोदयव्यापित्वे पूर्वा। उभयत्राऽव्याप्तौ परा। तथा च पुराणसमुच्चये। पूर्वा वापरविद्धा वा ग्रा
ह्या चंद्रोदये तु या॥ त्रिमुहूर्तापि सा पूज्या परतश्चोर्ध्वगामिनीति। इत्यष्टमीनिर्णयः॥३५॥ अथ नवमी। चैत्रे चैत्रनवमी सिताह्न
दलगादित्यकर्क्षयुक्तोदिताहं द्वे दिति भान्विता वा दिनमध्ये [illegible] मानवाः ऽऽपरा। लग्ने कर्कटके शुभा समतनुव्याप्ता दिनार्धद्वये तत्
त्राद्याऽदितिभेन कर्मसमयेस्वल्पापि रामव्रते॥३६॥ तत्रादौ रामनवमीनिर्णयः॥ चैत्रमासि सिता नवमी ह्यद्दलगा मध्याह्नव्या
पिनी अदितिऋक्षयुता पुनर्वसुयुता सारा मव्रते उदिता॥ तथा चोक्तमगस्त्यसंहितायां॥ मेषं पूषणि संप्राप्ते लग्ने कर्कटकाह्वये॥ आ ॥
विरासीत्सकलया कौसल्यायां परः पुमानिति॥ यदाऽहर्द्वये पुनर्वसुन्विता दिनमध्यमासा दिनमध्यं नाप्नोति तदापि परा का
र्या। नवमी चाष्टमी विद्धा त्याज्या विष्णुपरायणैरित्यगस्त्यसंहितोक्तेः। लग्ने कर्कटके शुभेति प्रागुक्तं। यद्यष्टमी कस्मिन्दिने
मध्याह्नव्यापिनी पुनर्वसुयोगस्तु दिनद्वये विहाय त्र्याक्य श्राद्धवति तदा मध्याह्नसमयव्यापिनी ग्राह्या॥ कर्मसमये स्वल्पा
पि यदि दृश्यते। चैत्रशुक्ले नवम्यां तु सा पुण्या सर्वकामदेति॥३६॥ अथ पारणानिर्णयमाह॥ चेत्पूर्वा नवमी कृता परदि
ने तिथ्यंतके पारणा दुर्गी वा स्विषया च सास्टमा तिथिः सर्वविसर्वान्विताः। कालव्याप्तियुता भवेच्च दशमी ह्युपोष्या राम
यो यदा कृष्णा पूर्वायुता सिता परयुता ग्राह्या व्रते सूरिभिः॥३७॥ चेद्यदि पूर्वा नवमी उपवासे कृता तदा परदिने तिथ्यं २५
ते पारणं भवेत्। उपोषणं नवम्यां तु दशम्यामेव पारणमित्यगस्त्यसंहितोक्तेः॥ इति रामनवमीनिर्णयः॥ अथ दुर्गानवमी॥

वेद्यादिदिनद्वये समतनुव्याप्ता मध्याह्ने आप्ता भवति तत्र पुनर्वसुयुता सा कार्या

तदुक्तमगस्त्यसंहितायां पुनर्वसुऋक्षसंयोगः स्वल्पोपि [illegible] २८

रूषगानवमी॥ आश्विनशुक्लनवमी दुर्गार्चासुदुर्गोत्सवेषु साष्टमतिथि
र्नवमीअष्टमीतिथ्यासहिताग्राह्या॥ श्रावणीदुर्गनवमीदूर्वाचैवहु
ताशनी॥ पूर्वविद्धाचकर्तव्याशिवरात्रिर्बलेर्दिनमितिबृहस्प
तिवचनात्॥ इति नवमी निर्णयः॥ अथ दशमी॥ कालव्याप्तिति
प्रतापवासादेदशमी कर्मकालव्यापिनी ग्राह्या॥ दिनद्वये कर्मका
लव्याप्तिर्वादिनद्वयेप्यव्याप्तिर्वांशेनसमव्याप्तिर्वातदाकृछापू
र्वा॥ शुक्लापरासूरिभिर्व्रतादौग्राह्येसर्वथा॥ २७॥ अथ विजयादश
मीनिर्णयः॥ मासीषेविजयक्षणाद्यदशमीकर्णान्वितासान्व
पप्रस्थानेविजयादशमीतरुसमर्चायांश्रुतिनैयदा॥ धुर्द्दप

का·नि·सि·
२६

पराह्णगा प्रथम युक्कार्या पराह्णे न चेदन्ये द्युर्दशमी मुहूर्त्तकमिताधिष्ण्या
न्वितेवापरा ॥ २८ ॥ इषेमासि आश्विन मासे सितदशमी विजयलक्ष
णाद्या विजयमुहूर्तएकादशमस्तेन युक्ता कर्णभेश्रवणर्क्षेन सहि
तासा विजयादशमी ॥ नृपश्चस्थाने राज्ञां प्रयाणेशमी तरोः समर्चा
पूजा तत्र यासा ॥ पुराण समुच्चये ॥ दशम्यां च नरैः सम्यक्पूजनी
या परा जिता ॥ ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नत इति ॥ श्रवण
र्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः ॥ उल्लंघयेयुः सीमानं तद्दि
न र्क्षे ततो नराः इति कश्यपः ॥ श्रुतिर्न्नैयदिदति ॥ यदा द्युर्द्वये दिनद्व
ये श्रुतिः श्रवणर्क्षेन स्याद्दशमी चापराह्णगा भवति तदा प्रथमयु
क्त पूर्वा कार्या । चेद्दिनद्वयेदशमी अपराह्णे न भवेत् ॥ अथवांशेनेस्य

राम
२६

यातितदापि पूर्वाग्राह्या ॥ तदुक्तं स्मृत्यंतरे ॥ नवमीशेषसंयुक्ता दशमी चापरा
जिता ॥ ददाति विजयं देवी पूजिता जयवर्धिनी ॥ आश्विने शुक्लपक्षे तु दशम्यां
पूजयेन्नरः ॥ एकादश्यां न कुर्वीत अपराजितासमर्चनं ॥ दशम्यां यः समुल्लं
घ्य प्रस्थानं कुरुते नरः ॥ तस्य संवत्सरं राज्ये न क्वापि विजयो भवेत् ॥
अन्येद्युरिति ॥ यदि अन्येद्युः परदिने मुहूर्तमात्रा दशमी भवति प
रत्रैकादशी चेत्तथापि श्रवणे युता स्यात्तदा परैव कार्या ॥ तथा च क
श्यपः ॥ उदये दशमी किंचित्संपूर्णैकादशी यदा ॥ श्रवणर्क्षे तदा काले
यो सा तिथिर्विजयाभिधा ॥ संपूर्णैकादशीति वचमात्तदा कर्मकाल
व्याप्तिरपि नापेक्षिता ॥ इति दशमीनिर्णयः ॥ ३८ ॥ अथैकादशी
निर्णेतुं तद्भेदानादौ विवृण्महे ॥ तत्रैकादश्यां तावद्वेषु वचनेषूप

वासश्चवर्णंतत्राहेरात्रावुद्विच्छिन्नाभोजनसंकल्पस्वरूपविधानंस्पष्टमेव॥
भोजनदोषश्च॥ अष्टवर्षाधिकोमर्त्यो ह्यशीतिर्नचपूर्यते॥ योभुंक्ते
मामकेराष्ट्रे विष्णोरहनिपापकृत्॥ समेवध्यश्चदंड्यश्चनिर्वास्यो
देशतः समृतिसारदीयवचनं॥ अन्यच्च॥ अष्टवर्षाधिकोमर्त्यो
ह्यपूर्णाशीतिवत्सरः॥ एकादश्यामुपवसेत्पक्षयोरुभयोर
पीतिकात्यायनवचनं॥ अत्राहिताग्निब्रह्मचारिणोरप्यतोरेव
सिद्धिरितिच वाक्यादेकादश्यांविधाना प्राप्तिस्तथागृहस्थानां
शयनीबोधिनीमध्यकृष्णैकादश्यन्यकृष्णैकादश्युपवास
निषेधश्चसामान्यवाक्यतस्तथापिसिधांतवचनेसर्वेषां

सर्वा विधेयेति दृश्यते ॥ तद्यथा ॥ गृहस्थो ब्रह्मचारी च अनाहिताग्नि
स्तथैव च ॥ एकोद्दिष्टं न भुंजीत पक्षयोरुभयोरपी हाग्निपुराणात् ॥
तत्रैकादशी द्विधा ॥ शुद्धा विद्धा च ॥ द्विधापि पुनः स्त्रेधा ॥ न्यू
नासमाधिकेति ॥ तत्रैकैका पुनः स्त्रेधा ॥ न्यूनसमाधिकद्वा
दशिकेति ॥ एवमष्टादशधा भिद्यते ॥ तथा चोक्तं पद्मपु
राणे ॥ शुद्धा विद्धा पुनः स्त्रेधा सद्भिर्न्यूनः समाधिकैः ॥ त
त्रैकैका पुनः स्त्रेधा द्वादश्यूनसमाधिकैः ॥ अस्य वचन
स्य विवृत्तिस्तु ॥ ॥ शुद्धा ॥
॥

शुद्धज्ञानवधा	विज्ञानवधा
१ शुद्धन्यूनन्यूनद्वा ५३।५७।५८।२।१०	१ विद्धन्यूनन्यूनद्वादशिका ५६।५७।६८।१३
२ शुद्धन्यूनसमद्वाद ५४।५८।६०।३।१३	२ विद्धन्यूनसमद्वादशिका ५७।५८।६०।१६
३ शुद्धन्यूनाधिकद्वा ५५।५८।६१।४।१२	३ विद्धन्यूनाधिकद्वादशिका ५८।५८।६१।१६
४ शुद्धसमन्यूनद्वा ५५।६०।५८।५।११	४ विद्धसमन्यूनद्वादशिका ५८।६०।५८।१६
५ शुद्धसमसमद्वा ५४।६०।६०।६।१५	५ विद्धसमसमद्वादशिका ५७।६०।६०।१८
६ शुद्धसमाधिकद्वा ५४।६०।६१।८।१४	६ विद्धसमाधिकद्वादशि ५८।६०।६१।१८
७ शुद्धाधिकन्यूनद्वा ५४।६१।५८	७ विद्धाधिकन्यूनद्वादशि ५६।६१।५८।१७
८ शुद्धाधिकसमद्वा ५५।६१।६०	८ विद्धाधिकसमद्वादशि ५७।६१।६०।१७
९ शुद्धाधिकाधिकद्वा ५५।६१।६१	९ विद्धाधिकाधिकद्वादशि ५८।६१।६१

तत्र विज्ञास्याज्यत्वमुच्यते॥ षड्विंशाशादनूरुवेदैंसहितास्याज्यासदावैष्णवैः स्मार्तैरप्युदयेसमाल्पकद्वादशी॥ राम २८
शुद्धाधिकैकादशी॥ निष्कामस्यपराह्यीहरिपरस्याद्याभवेत्कामिनांसर्वेषांगृहमेधिनांनविधवानांभिक्षुकाणां
परा॥३८॥ व्याख्या॥

व्याख्या॥ षट्पंचाशद्घटिका चेद्दशमी भवति तदाऽन्त्यके धोऽरुणोदय
वेधस्तत्सहितैकादशी वैष्णवैस्त्याज्या दशमी रव्युदयपर्यंतमास्ते सस्त्र
यद्युदयवेधस्तत्सहिता स्मार्तैस्त्याज्येति तदुक्तं भविष्यपुराणे। आदित्योद
यवेधस्तु स्मार्तानां कथितो बुधैः। अरुणोदयवेधस्तु वैष्णवानां स्मृतः परै
रिति तत्र प्रथमं शुद्धा निर्णीयते। तत्रापि शुद्धाधिक समद्वादशिकायाः शुद्धा
धिकन्यूनद्वादशिकायाः निर्णयमाह। समन्यूनकहरिरिति। समश्चान्यूनकश्च
समान्यूनौ हरी द्वादश्यौ यत्र सा समान्यूनकहरिरेवंविधा शुद्धाधिका यदैका
दशी भवति तत्र ५५।५९।६० निष्कामस्य मुमुक्षोः परा द्वितीयैकादशी भ
वेत्। तथा च स्कांदे। निष्कामस्तु गृही कुर्यादुत्तरैकादशीव्रतं॥ प्रातर्भवेत्तु वामा
का द्वादशीच द्विजो नेमे निर्हारिपरस्य परमेश्वरपरायणस्य द्वयी एकादशी द्विती
यं भवेत्। संपूर्णैकादशी यत्र प्रभाते पुनरेव सा। लुप्यते द्वादशी तस्मिन्लुप्यवासः

कथं भवेत्॥ उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरविधवसिद्धवचनात्॥ कामिनां
पुत्रिणां गृहिणामाद्या भवेत्॥ सर्वेषामिति गृहस्थानां पुत्रपौत्रधनैषिणामिति॥ निःका
मिनां गृहस्थे धनाविधवानां यतीनां च परेति व्यवस्था॥ तथा च मार्कंडेयः। सम्पूर्णैका
दशी यत्र प्रभाते पुनरेव सा॥ पूर्वामुपवसेत्कामी निष्कामस्तूत्तरां वसेदिति॥ प्रथ
मेहनि संपूर्णव्याप्याहोरात्रमास्थिता॥ द्वादश्यां च तथा तस्यां दृश्येत्पुनरेव सा॥ पूर्वा ते
कार्या गृहस्थैस्तु यतिभिश्चोत्तरा विभो॥ विधवाभिश्च तत्रैव परतो द्वादशी भवेदिति
स्कांदोक्तेः॥२१॥ पुनर्भेदानाह॥ शुद्धाहीनसमा यदा हरितिथिर्न्यूनाथवा तुल्य
य गा भेदा नाचेत्तु ष्टयेष्यपूर्वसेत्स्वामिरोषी जनः॥ वृद्धश्चेद्धरिवासरो भवति वि
रना समा याद्यगास्मार्तैरशेषैर्मिया यदा त्रिवतिथिः कार्या रवेस्तैर्द्वादशी॥ ६॥ शु
धन्यूना न्यूनद्वादशिकायाः १ शुद्धन्यूनसमद्वादशिकायाः २ शुद्धसमन्यूनद्वा
दशिकायाः ४ शुद्धसमसमद्वादशिकायाः ५ निर्णयमाह॥ शुद्धाहीनसमेति

अस्मिन्भेदानांचतुष्टयेभेदत्रेतुषेयशेषोजनःशुक्लामेवोपवसेत्।अत्रविवादए
नास्ति।शुध्दन्यूनाधिकद्वादशिकायाः५५।५७।६०।१शुध्दसमाधिकद्वादशिका
याः५५।५९।६१।निर्णयमाहार्द्धश्लोकेदिति।चेद्यदिहरिवासरोद्वादश्यारंधोभव
ति।चिरेकादशीन्यूनासमावाभवतितदास्मार्तैराद्यागाकार्याःसर्वैर्पोष्या।स्मार्तग्रह
णान्मुमुक्षुभिर्वैष्णवैःपराकार्या।तथाचस्कांदे।शुध्दायदासमाहीनासमा
हीनाधिकोत्तरा।एकादशीमुपवसेन्नशुध्दांवैष्णवोमपीति।एकादशीयदाशुध्दा
सतीसूर्योदयपर्यंतातनोन्यूनावाउत्तरोद्वादशीन्यूनासमाधिकावाभवतितदाशु
ध्दामेकादशीमुपवसेत्।नवैष्णवीदादशीमित्यर्थः।नचेदेकादशीविष्णोर्द्वाद
शीपरतः।स्थिता।उपोष्यैकादशीतत्रयदिच्छेत्परमंपदमितिनारदवचनंस्मार्त
२८ विषयं।परमंपदमित्यर्थवादंमुमुक्षूणामुत्तरत्रोपवासस्यविधानोचित्यात्।तथा
च।एकादशीभवेत्पूर्णापरतोद्वादशीयदा।तदाह्येकादशींत्यक्त्वाद्वादशींस

मुपोषयेदिति । संपूर्णैकादशी साज्या परतो द्वादशी यदि । उपोष्या द्वादशी शुद्धा द्वाद
श्यामेव पारणमिति । आविद्धापि च विद्धा स्यात्परतो द्वादशी यदि । सा हीनि स्काद वचनानि
मुमुक्षुविषयाणि । शुद्धाधिकाधिकद्वादशीकायां निर्णयमाह । वृद्धिमीयादिति । यदाय
स्मिन्विषये द्वादशी वृद्धि विषये शिवतिथिरेकादशी वृद्धिं प्राप्नुयान्न द्वारवले द्वादशी उ
त्तरैवोपोष्या । पूर्णाप्येकादशी साज्या वर्धते द्वितीये यदीति । माधवनिबंधेपि । एकाद
शी द्वादशी चैव प्रभयं वर्धते यदि । तदा पूर्वदिनं साज्यं स्मार्तैस्त्याज्यं परं दिनमिति । तेन वृत्तिः
प्रकारैः शुद्धा निर्णीता ॥ ४० ॥ अथ विद्धा निर्णीयते ॥ ॥ विद्धैकादशीकाधिकाहीनति
थिन्यूना समा सा च वलेका यान्यून द्वादशीः समुदय ग्राहिणां न कर्तुं दास्यात्कचिन्नतु । चेद्वाद
श्याधिकाधिकाभवाले तिथिः सर्वे । विद्धैयापरा विद्धा न्यून समाधिकान्यूनत
तिथिः कार्या वित्तेरां तिमा ॥ ४१ ॥ व्याख्या । विद्धाधिकान्यूनद्वादशीका

याः। विद्धाधिका समद्वादशीकायाः। निर्णयमाह। वीर्येकादशिके॥ ऐकादशीविद्धा

धिका हरेः। तिथिर्द्वादशी न्युना समाना भवति तदा न ते अंसाद्धी। तया कार्या। पाद्मे द्वाद

शी मिश्रिता कार्या सर्वत्रैकादशी तिथिः। द्वादशी चत्रयोदश्यां विद्यते यदि वा न वा इति।

तथा च। सर्वत्रैकादशी याह्या द्वादशी मिश्रिता नरैः। प्रातर्भवतु वा मा स्तु यतो नित्य

मुपोषणमिति। तद्वत्सागरेपि। द्वादश्यैकादशी यत्र संगता त्रयोदशाधिपा तामुपो

ष्य ततः कुर्यात्त्रयोदश्यां तु पारणमिति। यत्तु माधवेन शुद्धाधिकावाद्वशाधिकाया

मापि द्वादश्यनाधिक्ये ग्राह्यैति व्यवस्थैव। ऐकादशी विद्धा चेद्धुकं कैवि

शेषतः उत्तरां तु यतिः कुर्यात् पूर्वामेव सदा गृही इति प्राचेतस सामान्य वचनादि

युक्तं। न संपूर्णैकादशी यत्र प्रभाते पुनरेव से सादि बहुवचनैकवाक्यतया प्रा

चेतस वचनस्य शुद्धाविषयस्यैव युक्तत्वाच्चेति वयुक्तं। विद्धाधिका न्युन द्वा

दशीकायाः काश्ये विशेषयुक्तो न्युन हरिरिति। अन्यत्राविषये द्वादशी ह्रासे

का॰नि॰ ३१

पुत्रवद्गृहिणां क्वाचिंन त्वव्रतं स्यात् । एकादशीं द्वादशीं च रात्रिशेषे त्रयोदशी । उ
पवासं न कुर्वीत पुत्रपौत्रसमन्वितः इति कूर्मपुराणवचनात् । दशम्येकादशीविद्धा
द्वादशी च क्षयं गता । क्षिणा सा द्वादशी यानलक्ं तत्रापि विधीयते इति वृद्धशातातपो ह्रै
क्तेश्च । विद्धाधिकाधिकद्वादशिकाया । निर्णयमाह । चेद्वादश्यधिके काले । चेत्पादे द्वादश्याधि
काभवातीथिरेकादश्यप्याधिकात्तदा सर्वैर्व्रतैः परा विधेया । संपूर्णैकादशी यत्र प्रभा
ते पुनरेव सा । सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि । इति पूर्णाप्येकादशी साड्यावृद्धौ
ते द्वितयं यदीसा । द्विवचनात्स्पष्टमेव । विद्धन्यूनाधिके द्वादशीकायाः । विद्धसमाधि
कद्वादशीकायाः निर्णयमाह । विद्धन्यूनासमेति । यदेकादशी । विद्धान्यूनासमा वाभवाति
अच्युत । तिथिद्वादश्य । धिकाभवाति तदा ष्पखिलैरेति माद्वितीया कार्या । तथा च राम ३१
नारदीये । उपवासदिनं विद्धं यदा भवति पूर्वया ॥ द्वितीये क्रियते दानं स्यात्स्वल्पाप्येकादशी तिथिः । तत्रोपवासो विहितः क

र्थं तद्दशतज्ञ। स्नात्वान्यदानं भाष्यते विप्राद्वादश्यां पूर्ववासरः। रविवक्रो धर्मोत्रापि
तदापोष्यं परं दिनं। उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारयेत्। निर्गते चेत्त्रयोदश्यां
कलावाधिकलापि चेत्॥ ४१॥ तथाच। नंदा विद्धसमा यदा तु रितिथिर्न्यूनासमा
धिकापरे तु कीदृशः परतोयदा भवति तिथिर्न्यूना तदा ग्राह्या ह्यखिलैः॥ कार्यास्मिन् विषये
परासुतयुते भद्रे दद्याच्चाष्टाधिके रवौ कार्दशिको दिनास्यं तिमतां संदेहछेदानां तथा॥
॥४२॥ व्याख्या। विद्धसमन्यूनद्वादशी कार्याः विद्धसमसमद्वादशी कार्या निर्ण
यमाह। नंदा विद्धसमेति। यदा नंदा एकादशी विद्धासमा भवति हरितिथिर्द्वा
दशी न्यूनासमा वास्या तदा परेत्नाचरेत्। तथाचोक्तं नारदेन। दिये देवा धीं
लुसंसिध्येदेकादश्यो तिथित्रयं। तत्र क्रतुशतानां पुण्यं द्वादशी पारणे भवे
दिति। द्वादशीस्वल्पमात्रापि यदि [illegible] न स्यात् [illegible] हनि। दशमी मिश्रिता
कार्या महापातकनाशिनी। त्रयोदश्यां न लभ्येत द्वादशी यदि किंचन॥ उपोष्यैकादशी तत्र दश

का·नि·
३२

मीमिश्रितासदा॥ पारणा हेन लभ्येत द्वादशी कलयापिचेत्॥ तदानीं दशमी
विद्धा प्युपोष्यैकादशी तिथिः॥ त्रयोदश्यां यदा न स्याद्द्वादशी घटिका द्व
यं॥ दशमीमिश्रैकादशी विधा शैवोपोष्यासदा तिथिः॥ आविध्यानि निषिद्धै
श्च न लभ्यते दिनानितु॥ मुहूर्तैः पंचभिर्विद्धा ग्राह्यासाचैकादशी तिथिः॥ पं
चमुहूर्तास्तु अरुणोदयमारभ्य ज्ञेयाः इति विवेकः॥ अन्यथा सूर्योदया
त्प्रणितेस्मृतेनैकादशी पि विहितुं नार्हति॥ दशमीशेषसंयुक्ताउ पोष्यैकादशी तदा॥
यदा न स्यात्त्रयोदश्यां मुहूर्तद्वादशीतिथिः॥ इत्यादि ऋष्यशृंग हारितवि
ष्णुरहस्यादिवचनानि परतो द्वादश्यभावेसकाम स्मार्तपराणि॥ अस्मि
न्विषये पूर्वेद्युरेवोपवासोन्येद्युर्द्वादश्याद्यपादमुक्त्वार्यपारणं॥ द्वादश्याः
प्रथमः पादौ हरिवासरसंज्ञकः॥ तमतिक्रम्यकुर्वीत पारणं विष्णुतत्परः॥ राम
इति विष्णुधर्मोत्तरात्॥ केचित्तु स्मृतिवचनाद्वैष्णवविषयमेतदितिव ३२

दंति ॥ तदप्युक्तं ॥ मुक्तीच्छुः परतस्तरेदिति वैष्णवाद्यात् ॥ तथा च विष्णुरहस्ये ॥ दशमी
मिश्रिता पूर्वा पूर्णा च द्वादशी परा ॥ एकादश्यां महाशास्त्र उपवासः कथं भवेद्
सुपक्रम्योक्तं ॥ शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभिरिति कूर्मपु
राणेपि ॥ दिनक्षये तु संप्राप्ते उपोष्या द्वादशी भवेत् ॥ दशमीशेषसंयु
क्तां न कुर्याच्च कदाचनेति ॥ क्षये न्यूनत्वेन भविष्यति साम्ये किमपर्यमु
च्यते सत्यं ॥ साम्येपि क्षयो भवत्येव ॥ एकादश्याः सूर्योदयास्पर्शित्वात्
तस्मात्साम्यविषयेपिदमुक्तं ॥ न्यूनविषये तूच्यते ॥ विशन्यूना न्यूनद्वा
दशिकायाः विश न्यूना सम द्वादशिकायाश्च निर्णयमाह ॥ यदा
भवति थिर्न्यूनेति ॥ यदा यस्मिन्विषये द्वादश्यान्यूनत्वे साम्यत्वे वा भ
वति थिरेकादशीन्यूना भवति ॥ तदाखिलजनैराद्या कार्या तथा च पद्म

पुराणे ॥ एकादशी दशाविद्धा परतोपि विवर्धते यतिभिर्गृहिभिश्चैव सैवो
पोष्या क्षये तिथेरिति ॥ यतिभिर्गृहिभिरित्यत्र गृहिपदं पुत्रवद्गृहिभि
न्नविषयं ॥ तेषामेकादशी दिनक्षये उपवासनिषेधात् ॥ अस्मिन्विषये
परासुतवतेरिति । अस्मिन्विषये एकादशी क्षये पुत्रवद्गृहिभिः परादि
तीयाद्द्वादश्येव कार्या ॥ एकादशी दिनक्षये उपवासं करोति यः ॥ तस्य
पुत्रो विनश्येत्तीमघायां पीडितो यथेति ॥ दिनक्षये तु संप्राप्ते नोपोष्या
दशमीसुता ॥ यदिच्छेत्सुतपुत्राणां वृद्धिसंपदमात्मन इति ॥ एका
दशी भुनष्टास्करवेः संक्रमणे तथा ॥ पारणं चोपवासं च न कुर्यात्पुत्रवा
न्गृही ॥ इत्यादिवाक्यैः प्रतिषेधान्नैद्वादिनद्वयामेवोपवासः कार्यः
अन्यच्च ॥ एकादश्यां यदा वत्स दिनक्षयस्तिथिर्भवेत् ॥ तत्रोपो

रतत्रोपोष्याद्वादशीस्यात्त्रयोदश्यां च पारणमिति। एकादश्यां यदा ब्रह्मन् दिनक्षयतिथिर्भवेत् २

ष्याद्वादशीस्यात्त्रयोदश्यां तु पारणमिति एकादश्यां यदा ब्रह्मन्दिनक्ष
यतिथिर्भवेत्॥ तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्॥ इत्यादि पि
तामह गोभिलवचनेभ्यः॥ अत्र यद्यपि पुत्रवद्गृहिविषयत्वं स्पष्टं न
श्रूयते तथाप्याकांक्षावशात्तद्विषयत्वं भवति॥ इतरेषां पूर्वत्रो
पवासविधानेनाकांक्षाभावात्॥ एवमेषैकादशीदशाष्टाधिके
रष्टादशभिर्भेदैः स्मृतिमतां स्मार्त्तानां हेतोः सद्वैष्णवानां हेतो
रुदिता एवमेकादशीनिर्णयस्तत्र सनियमादिनिर्णयः॥ तत्र
दशम्यादिद्वादशीपर्यंतदिनत्रये ये नियमा उक्तास्ते तु काम्योप
वासविषयाः संति॥ ते यथा मत्स्यपुराणे॥ कांस्यं मांसं सुरां क्षौ
द्रं तैलं वितथभाषणं॥ व्यायामं च प्रवासं च दिवास्वापं च मैथुनं॥

तिलपिष्टं मसूरं च दन्ताम्यादिषु वर्जयेत् ॥ आदित्याब्दे नैकादशी
द्वादश्यां योगहेतवे ॥ उपवासलक्षणं यथा ॥ उपावृत्तिस्य पापेभ्यो
यस्तु वासो गुणैः सह ॥ उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥
सर्वभोगेति सप्तक स्त्रीवर्ज्यं तदुक्तं ॥ गंधालंकारतांबूलं
पुष्पमालानुलेपनं ॥ उपवासे तु न दुष्यंति दंतधावनमंजनं ॥
मितीगारुडे ॥ भविष्योत्तरे तु ॥ अंजनं च सतांबूलं कुंकुमं
स्त्रकवाससं ॥ धारयेत्सोपवासोपि ह्यवैधव्याकरं यतः ॥ विध
वा पतिमार्गेण कुमारी च यदृच्छयेति सप्तकाया: यदृच्छया
व्रतमाचिनोच्यते ॥ तथा च ॥ पत्यौ जीवति या योषिदुपवासव्रतं

चेरत् ॥ आयुष्यं हरते पत्युर्नरकं चैव गच्छति ॥ विधुर हृस्ये ॥ ना
रीखल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा ॥ निष्फलं तु भवेत्तस्या
यत्करोति व्रतादिकमिति मार्कंडेये ॥ इदं नियमादि काम्य
व्रतविषयं ॥ पुनर्भोजनमध्वानं भारमायासमैथुनं ॥ उप
वासफलं हन्सु दिवानिद्रा तथैव च ॥ शाकं मांसं मसूरं च
चणकाः कोरदूषकाः ॥ क्षौद्रं मधु परान्नं च हन्युरष्टा विमे
फलमिति भष्टेति वचनेषु पुनर्भोजननिषेधस्तु काम्य एव ॥
यतः सायमाद्यंतयोरन्होः सायंप्रातश्च मध्यमे ॥ उपवा
सफलप्रेप्सुर्न स्याद्भुक्तिचतुष्टयं ॥ अथ [illegible] सोपवासी चे
नीधो

का.नि. ३५ त्सायंप्रातस्तु जि[illegible]क्रिया॥ वर्जयेन्मतिमान्विप्रः संप्राप्ते
हरिवासरइति विष्णुरहस्ये॥ ज[illegible]ह्याद्युक्लिद्व्यं निसे
काम्येभुक्तिं च तु ष्पयमिति॥७४॥ अथ श्राद्धादिवसे व्रत
मन्यद्वा एकादशी वा भवति तत्र निर्णयमाह॥ ~~श्राद्धस्यैवादि~~
~~नेष्यद्वा भवति तत्र निर्णयमाह~~॥ श्राद्धस्यैव दिने यदा भ
वति पित्रर्वान्यद्व्रतं वा भवेत्स कथं द्वितयं तथा च न भवेल्लो
पस्तयोस्तथा श्रृणु॥ कहाश्राद्धमिह रविलं द्विजपूजोय
क्षेषमंन्नं भवेत्तस्सर्वं तु निध्याय दक्षिणकेरव घ्राणतः राम ३५
स्याद्व्रतयं॥७५॥ यदाश्राद्धस्य दिवसे स्यादि यत्किंचिदुप

वासरूपेंव्रतंएकादशीवाभवेत्॥ एवंसंकष्टद्वितयेप्राप्तेकिंकार्यमित्यत्रयथातयोः श्राद्धव्र
तयोर्लोपोनभवेत्तथाकार्यं॥ तच्छृणु॥ गृहश्राद्धकालेश्राद्धंकृत्वाद्विजभुजौजातायांब्राह्म
णभोजनेकृतेयच्छेषमन्नंभवेत्तत्सर्वंदक्षिणाकरेधृत्वाऽवघ्राणंकुर्यात्। ततउभयासिद्धिः।
तथाच। श्राद्धंकृत्वातुयोविप्रोनभुंक्तेपितृसेवितं। हव्यंदेवानगृह्णंतिकव्यंचपितरस्तथे
त्यादिबहून्युपवासनिषेधवाक्यानि। तत्रप्रतिप्रसवमाहस्कंदपुराणे। यस्मिन्दिनेपितुःश्रा
द्धंमातुर्वाथभवेद्गुह। तस्मिन्नेवदिनेतातभवेदेकादशीव्रतं। अन्नंचद्वापिव्रतंस्कंदतदाका
र्यंचतच्छृणु। नलुप्यतेयथाश्राद्धमुपवासोथवागुह। इतिविज्ञातिपन्नेर्थेउपायःपरमोम
तः। दृष्टोहितार्थः सर्वेषांनराणांशिखिवाहन। श्राद्धदिनंसमासाद्यउपवासोयदाभवे
त्। तदाकृत्वातुवैश्राद्धंभुक्त्वाशेषंतुयद्भवेत्। तत्सर्वंदक्षिणेपाणौगृहीत्वान्नंतुश्राद्ध
कृत्। अवजिघ्रेदनेनार्थतेनश्राद्धंशिखिध्वज॥ पितॄणांतृप्तिदंजातंव्रतभंगोनविद्यते
इति॥४३॥ ॥इतिनिर्णयसिद्धांतेएकादशीनिर्णयः॥ ॥अथद्वादशी॥ ॥तत्रपारणाहे
स्वल्पाद्वादशीभवतितस्यानिर्णयमाह॥ ॥स्वल्पायांचेद्भवेत्पारणेहरितिथिःपौर्वाह्णि
माध्याह्निकेकृत्वाऽन्नरसमुद्धमेतनुतिथौभुक्त्वाव्रतंपारयेत्। संकष्टेयदिवाथवेत्पक

मिहप्राप्तंतदाद्वादशीमध्येप्राश्यजलंसभोजनमिदंश्राद्धंस्वकालेचरेत्॥४४॥ ॥व्याख्या॥
चैत्रादिपारणेएकादशीव्रतपारणायांहरितिथिर्द्वादशीस्वल्पामुहूर्तमात्रावाभवतित
दाअनूरुसमुद्गमेसमयेऽरुणोदयवेलायामुषायपूर्वाह्णविषयंपौर्वाह्णिकमध्याह्नभवंमाध्या
ह्निकंतेउभेतत्रैवकृत्वातनुतिथौस्वल्पद्वादश्यांव्रतंपारयेत्।तदुक्तंमात्स्ये।यदाभवेदती
वाल्पाद्वादशीपारणादिनेउषःकालेद्वयंकार्यंप्रातर्माध्याह्निकंच॥एतस्मात्कार
णाद्विप्रप्रत्यूषेस्नानमाचरेत्॥नारदीये॥ ॥अल्पायामपिविप्रेंद्रद्वादश्यामरु
णोदये॥स्नानार्चनक्रियांकुर्याद्दानहोमादिसंयुतामिति॥कलाद्वयंत्रयंवापिद्वा
दशीमनतिक्रमेत्॥अतिक्रांताद्वादशीतुहंतिपुण्यंपुराकृतमितिमात्स्यात्॥
॥ ॥अथात्रयदिपैतृकंपितृश्राद्धविषयंसंकष्टंप्राप्तंस्यात्तदाद्वादशीमध्ये
जलंप्राश्यततःस्वकालेश्राद्धकालेसभोजनंश्राद्धंचरेत्॥ ॥तदाहदेवलः॥ ॥
संकष्टेविषमेप्राप्तेद्वादश्यांपारयेत्कथं॥अद्भिस्तुपारणंकुर्यात्पुनर्भुक्तंनदोषकृ
दिति॥ ॥४४॥ ॥अथाष्टौमहाद्वादश्यस्तासांनिर्णयमाह॥ ॥अष्टौद्वाद

उन्मीलिनी
८९९ द्वा
५५६०१ १
वंजुली
८९ द्वा द्वा
५५१९० २

शिका महद्दृश्यमुदिता उन्मीलिनी १ त्रिस्पृशा २ तद्वत्पक्षविवर्धिनी ३ परतस्याद्वंजुली ४ ततो जया ५
पापघ्नी ६ विजया ७ जयंत्यपि ८ यदा शुद्धाधिके काऽदशी सोक्ता उन्मीलिनि का तथा हरितिथि ४८
शुद्धाधिको विंजुली ॥ ४५ ॥ एकादश्यरुणोदये रविलहरिस्ताद्वा त्रिरोषे जया त्रिस्पृक्पक्षाकु
थिता च पर्वयुगले वृध्याथ पक्षेधिनी । ऋक्ष्याद्या विजया जया गुरु भयुक्ता पघ्यथोको उ
नाऽदित्यर्क्षैता जयंति केत्युपवसेद्दष्टौ महाद्वादशी ४ ॥ ४६ ॥ आष्टे महाद्वादश्य उदिताः ४ । थयो
कं व्रह्मवैवर्ते । उन्मीलिनी वंजुली च त्रिस्पृशा पक्षवर्धिनी । जया च विजया चैव जयंती पापना
शिनी । द्वादश्यष्टौ महापुण्याः ४ सर्वपापहराः ४ स्मृता इति । पाद्मे । न करिष्यंति ये लोके द्वादश्य
ष्टौ महाद्वयाः ४ तेषां यमपुरे वासो यावदाभूतसंप्लवमिति च वचनादुपवासे नित्यत्वं ज्ञापितं तत्र ५
तिथियोगाच्च तत्रो नक्षत्रयोगाच्च तस्य श्रेष्ठलीति विवेकः ४ । यदा शुद्धाधिका एकादशी भ
वति तदा उन्मीलिनी संज्ञा महाद्वादशी । एकादशी तु संपूर्णा वर्धते पुनरेव सा । उन्मीलिनी
भृगुश्रेष्ठ कथिता पापनाशिनीति मार्कंडेयोक्ते ४ । यदा हरितिथिर्वृद्धा द्वादशी शुद्धाधिका भ
वर्तिष्यंते तदा । विंजुली ज्ञेया । द्वादशीस्पामुपवासस्थद्वादश्यामेव दर्शितं । विंजुली नाम सा प्रोक्ता को

टिहसाविनाशिनी। यदेकादशी अरुणोदयांतं प्राप्ता भवति समग्रं दिनं हरितिथिर्द्वादशीस्या
देतरा त्रिशेषजयात्रयोदशी भवति सा द्वादशी त्रिस्पृक् त्रिस्पृशा भवति। अरुणोदयमाघ्रा
स्याद्वादशी सकलं दिनं। अंते त्रयोदशी प्रातस्त्रिस्पृशा ब्रह्मकीर्त्तिता। आद्याएकादशी। च
परं पर्वयुगले पुरः पर्वयुग्मे वृद्धिं प्राप्ते पक्षवर्धिनी द्वादशी भवति। कुहूराके यदा वृद्धिं प्रया
तिपक्षवर्धिनी। विहायैकादशीं तत्र द्वादशीं समुपोषयेदिति ब्रह्मवैवर्तात्॥ अस्याश्च वत्न
क्षत्रेण युक्ता द्वादशी विजया १ गुरुभयुक् पुष्ययुक्ता जया २ अथ कस्य ब्रह्मणः उडु। कोडु।
रोहिणी। तथा कापापघ्नी ३ अदितिसक्षेण अदितेर्दैवमातुर्नक्षत्रेण पुनर्वसुना युक्ता जयंती
द्वादशी ज्ञेया ४ पुष्यश्रवणपुष्याद्य ८ रोहिणी ४ संयुता तथा। उपोषिताः समफला द्वादश्यो ये
पृथक् २ इति ब्रह्मवैवर्तात्। एता अष्टौ महाद्वादशीरुपवसेदित्यर्थः॥ ४६॥ ॥अथ विशे
षतः श्रवणद्वादशी निर्णीयते॥ भाद्रे द्वादशिका सिता श्रवणयुक् ·द्यान्विता चेत्तदा योगं वै
ष्णवशृंखलं ह्युपवसेत् तिथ्यंत भांते भुजिः। अस्या द्वादशिकाधिकोभययुतात त्रांतिमा वेद्रू
पो १ स्युः स्वर्गदृग ११ मेवं द्वुम रविलोरुद्र तयो पावसेत्॥ ४७॥ ॥भाद्रे सिता द्वादशी श्रवणनक्ष
वि

त्रयुग्भवति तदोपवसेत्। तथा च स्कांदे। मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता। महती द्वा
दशी ज्ञेया उपवासे महाफला। बुधश्रवणसंयुक्ता सा चेद्द्वादशी भवेत्।। अत्यंतमहती सोक्ता
दत्तं त्वक्षयं भवेदिति। तत्र यदा तावदेकस्मिन्नेव दिने श्रवणयोगवती शुद्धाधिका विद्धाधि
का वा तस्यास्संदेह एव नास्ति। यदा विद्धाधिका दिनद्वयेपि श्रवणयोगवती तदैकादशीयुता
ग्राह्येत्याह। नंदान्विता चेदिति। चेन्न दि द्वादशी नंदान्विता एकादश्यान्विता तदा विष्णुशृंखल
योगस्तमुपवसेत्। मात्स्ये। द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदा। स एव वैष्णवो योगो विष्णु
शृंखलसंज्ञितः। उपोष्य विधिवत्तत्र नरः संक्षीणकल्मषः। प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्ल
भामिति। तत्रैकादशीद्वादशी प्राप्तमुपवासद्वयमेकतंत्रेण कृत्वा तिथ्यंत भांतेउभयोर्हंते भुजि
पारणा कर्तव्येति। तथा च स्कांदे। तिथिनक्षत्रनियमे तिथि भांते च पारणं। अतोन्यथा पारणा
यां व्रतभंगमवाप्नुयादिति। अन्यतरांते कर्तव्यमित्युक्तं। तिथिविधि [illegible] समायोगे उपवासो ष्प
यदा भवेत्। पारणं तु न कर्तव्यं यावन्नैकस्य संक्षय इति नारदीयात्। तिथ्यंते तिथि भांते वा पा
रणं यत्र नोदितं। यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणमिति स्कांदोक्तं महाशक्तविषयं।। यदा

का.नि. ३८ शुक्लाधिकादिनद्वये पि श्रवणयोगस्तत्रांतिमामुपवसेदिति। बृहन्नारदीये। उदयव्यापिनी या
स्याच्छ्रवणद्वादशीव्रत इति। यद्यदिवोद्वादश्यां श्रवणं न भवति। रुद्रगमेकादशीगतं श्रवणं भ
वा तदा विधेरुद्वं विधामेकादशीमुपवसेदखिलोज्जन इत्यर्थः। वह्निपुराणे। द्वादश्येकादशीय
त्र सा नोपोष्या सदा तिथिः। श्रवणेन तु संयुक्ता सा सर्वकामदेति। तदाप्येकादश्युपवा
सस्तेन सहैकतंत्रमेव॥५६॥ एतादृशे महाद्वादश्यस्तासामुपवासो दिनभेदेन प्राप्नोति तदश
क्तेन द्वयं कार्यमशक्तेनैकः। कार्यद्वयमाह शक्तश्चेद्व्रतयुग्मं हरिपुष्ट्या तदा एकादशीं सद्धा
ॐ विष्णुमुपावसेद्यदि गृहीनैकादशीनिश्चयः। तत्रोपांसमुपोष्य चापरदिने ऽभ्यर्च्य विष्णुं तं पार
येत्सा सेद्वादशी कापरा ह। समयमाप्तो दिता गोयजो ५८ यद्यदिकर्ता नैको भवति तदाष्ट
रियुक्तः अष्टमहाद्वादशिकायुक्त एकादशीव्रतमिति युग्ममुपावसेदिति। द्वादश्यशेषे महापु व्रत
ण्याः। सर्वपापहराः स्मृताः इति पूर्वोदाहृतवचनात्। यत्तु तं। पारणांतं व्रतं ज्ञेयं व्रतांते वि राम
प्रभोजनं। असमाप्ते व्रते पूर्वे नैव कुर्याद्व्रतांतरमिति सत्य। तदन्यव्रतांतरविषयं। इदं श्रौतसै ३८
कदेवत्वं भवति। यथा भविष्ये। एकादशीमुपोष्यैव द्वादशीमप्युपोषयेत्। न तत्र विधिलोपः

स्यादुभयोर्दैवतं हरिरिति। यस्तूपवासद्वयासमर्थः शक्तो न भवति स एकादशीं त्यक्त्वा केवलं
द्वादशीमुपवसेत्। तदुक्तं नारदीये। उपोष्य द्वादशीं पुण्यां वैष्णवर्क्षेण संयुतां। एकादश्युद्भ ष्ण
वं पुण्यं नरः प्राप्नोत्यसंशयं। वाजपेये यथा यज्ञे कर्महीनोपि दीक्षितः सर्वं फलमवाप्नोति
अस्नातोप्यहुतोपि सन्निति। यस्तु कृतैकादशीसंकल्प उपवासद्वयासमर्थस्तं प्रत्याह। यदि
गृहीतेकादशीनिश्चय पद्मेति। यदि गृहीतएकादशीव्रतस्य निश्चयो येन एवंविधः पुरुष उपवास
द्वयासमर्थः स्यात्तदा संकल्पितमकृत्वैकादशीव्रतं विधाय परदिने द्वादश्यामच्युतं विष्णुं सं
पूज्य पारयेत्। पारणं कुर्यादित्यर्थः। तदुक्तं मात्स्ये। द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि। उ
पोष्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिमिति। हरिपूजैव नक्तोपवासद्वयार्थः। उपवासकरणेन त
द्गहरिपूजायाः प्राप्तत्वादेतद्विधानं वैयर्थ्यात्। इति श्रवणद्वादशीनिर्णयः। अथ वत्सद्वा
दशी। अपराह्णसमयव्यापिनी द्वादशी। गोयसोगोपूजायां ग्राह्या। वत्सस्य पूजा शिवरात्रि
रेतः परा विनिघ्नति नृपं सराष्ट्रमिति। ॥४८॥ ॥अथ शयनीबोधिनीनिर्णयः॥ ॥द्वादश्यां

का॰नि॰सि॰ ३९

शुचिभाद्रकार्तिकसितेस्वापांगविवर्तनोद्बोधाः मित्रभविष्णुभांत्यभपुरामध्यांत्यभागेहरेः ॥
रात्रौसंधिदिनेषु तत्र भलवाला भेलु तिथ्यंतरालः स्वापाद्यं हरिपादसेवनरतस्तत्रोत्सवंकारये
त् ॥४९॥ ॥ शुचिराषाढो भाद्रो भाद्रपदः कार्तिकस्तत्र सिते शुक्लपक्षे द्वादश्यां हरेर्विष्णोः
स्वापः शयनं । अंगविवर्तनं पार्श्ववर्तनं । उद्बोधः प्रबोधः एते स्युः । क । दोषासंधिदिनेषु दो
षा रात्रिः संधिः संध्या । दिनं दिवसः तेषु । तत्र मित्रभं मैत्रं राधा । विष्णुभं श्रवणः । अंत्यभं रे
वती । एतेषां पुरामध्यांत्यभागे सतीति शेषः । अस्यायं विवेकः । आषाढसितद्वादश्यां मैत्रा
द्यभागे रात्रौ विष्णुः स्वपिति । भाद्रसितद्वादश्यां श्रवणमध्यभागे संध्यायां पार्श्वपरिवर्तनं ।
कार्तिकसितद्वादश्यां दिने रेवत्यंतभागे विष्णुः प्रबुध्यतीति । तथा च भविष्योत्तरे । आभाक
सितपक्षेषु मैत्रश्रवणरेवती । आदिमध्यावसानेषु प्रस्वापवर्तनोत्थितिः । मैत्राद्यपादे स्व
पिती हरिर्विष्णुर्वैष्णवमध्ये परिवर्तमेति ॥ पौष्णांत्यपादे च सुरारिहंता प्रबुध्यते मासचतुष्टयेन ।
तथान्यत्रोक्तं विष्णुः सदाषाढे भाद्रे च परिवर्तते । कार्तिके च प्रबुध्येत शुक्लपक्षे हरेर्दिन इति । नि

राम ३९

शिस्वापो दिवोत्थानं संध्यायां परिवर्तनं ॥ अथ तत्र भांशाऽज्ञाने किमित्याह । तत्र भक्त
वाल्लभ इति ॥ तत्र तिथौ रात्रौ संध्यायां दिने च प्रोक्तमैत्राद्यपादाद्य लाभे । विपरीतयोगे
पि तिथ्यंशात इति प्रोक्तनिद्रादिकाले स्वापाद्यं निश्चितं भवति ॥ विष्णुधर्मोत्तरे ।
विष्णुर्दिवा न स्वपिति न च रात्रौ विबुध्यते । द्वादश्यामृक्षसंयोगे पादयोगो न कार
णमिति । हरिपादसेवनरतो विष्णुपरः स्वापादिकालोत्सवं कारयेदित्यर्थः ॥
इत्याभाको निर्णयः ॥ ४२ ॥ अथ त्रयोदशीनिर्णमाह ॥ शुक्ला पूर्वयुता परयुता सौ परा
कामनोभ्यतिथिश्चैत्रेनंगयजोसितत्रयोदशीगा च्यर्थिया प्रदोषव्रते । तत्कालि
व्यथ माधवे मैनरहरेर्जन्माऽथ भूतः १४ शुभः संध्याव्याप्तुभयोर्नवा समक
व्याप्तात्र राका च्चिता ॥ ५० ॥ ॥ शुक्लामनोभ्यतिथिस्त्रयोदशी पूर्वयुता प्रो
क्ता ॥ परा कृष्णत्रयोदशी परयुता कार्या ॥ साधारण निर्णये पूर्वोदाहृत
वचनात् । चैत्रे मासे सिताऽनंगयज्ञो कामपूजनेनं गरत्रयोदशी शुद्धल
ग्रामध्याह्नव्यापिनी ग्राह्या दिनद्वये मध्याह्नव्याप्तौ अव्याप्तौ वा पूर्वे

व। अनंगत्रयोदशी रंभाउपोष्या पूर्वसंयुतेति वचनात्। प्रदोषव्रते प्रदोषका
वलीना तिथिर्ग्राह्या। प्रदोषस्तु पूर्वं नक्तव्रते व्याख्यातः। शनिप्रदोषव्रते प्र
दोषकाले त्रयोदशी तिथि शार्किणा शनिवारेण युता ग्राह्येति॥ ॥अथ नृसिंह
चतुर्दशीनिर्णयः॥ तात्कालिकीति। माधवे वैशाखे अच्छभूतः शुक्लचतुर्दशी नृ
सिंहचतुर्दशी। सा संध्याव्यापिनी ग्राह्या। नृसिंहपुराणे। वैशाखे शुक्लपक्षे तु च
तुर्दश्यां निशामुखे। मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनं। वर्षे वर्षे तु कर्तव्यं
मम संतुष्टिकारकमिति। उभयोर्दिवसयोः संध्यासमव्याप्तौ समांशव्या
प्तौ। नवानव्याप्तौ स्पर्शाभावस्तदा त्रयोदश्यान्विता पूर्णिमान्विता ग्राह्या। तदु
क्तं स्मृत्यंतरे। अनंगेन समायुक्ता न सोपोष्या चतुर्दशी। पूर्णान्वितां तु तां
कुर्यान्नरसिंहस्य तुष्टये। यः करोति नरो मोहात्कामविद्धां चतुर्दशीं। ध दं
नापत्यैर्वियुज्येत तस्मात्तां परिवर्जयेदिति नृसिंहचतुर्दशीनिर्णयः॥ राम
॥५०॥ अथानंतचतुर्दशीनिर्णयमाह॥ ॥भाद्रेऽनंतचतुर्दशीक्षं ४०

पायुगव्याप्ता॰था चंद्रोदये कृष्णे षे॰ पिच कामयुक्स्नपनके व्याप्ताप्रदो
षे बलो। रात्र्यास्ये च निशीथगा। शिवतिथिः श्रेष्ठा निशीथे समाह्रीनारात्रिमु
रव्वे तपस्युष सि भुग्यामत्रयो र्ध्वेति थो॥५१॥ भाद्रमासि त चतुर्दशी सा यासि
नंत चतुर्दशी। सा च क्षण युग व्याप्ता मुहूर्तद्वयं व्यापिनी ग्राह्येति शेषः। तदु
क्तं स्कांदे। उदये हि मुहूर्ता पि ह्या ग्राऽनंत चतुर्दशी। मुहूर्तमपि चेद्भाद्रे पूर्णि
मायां चतुर्दशी। संपूर्णा तां विदुस्तस्यां पूजयेद्विष्णुमव्ययमिति॥ ॥अथाय
म चतुर्दशी ईषे आश्विने मासि कृष्णा चतुर्दशी सा स्नपने स्नानविधौ चंद्रोद
ये या भवति चंद्रोदयव्यापिनी या सा ग्राह्येति शेषः। भविष्योत्तरे। आश्वि
नस्यासितेपक्षे चतुर्दश्यां विधूदये॥ स्नपनं तिलतैलेन सदा कार्यं नरोत्तमैः।
विधूदये त्रयोदश्यां भवेद्यदि चतुर्दशी। नारकी त्वसा प्रोक्ता चाश्विनस्या ति
सितेबुधेरिति। अपि शब्दाच्चंद्रोदये यदा न स्यात्तदा कामयुक्त्रयोद
शीयुक्ता ग्राह्या। भविष्योत्तरे। विधूदये यदा न स्याद्दिवासितचतुर्दशी॥

जयान्वितामरिक्तायांनरःस्नायाद्विधूदये।दिनद्वयेचंद्रोदयसत्वेपूर्वा।व्याप्तेतिबलोबलिकार्ये
प्रदोषव्याप्ताग्राह्येत्यर्थः॥ ॥अथशिवचतुर्दशी॥ तपसिमाघमासेकृष्णपक्षेशिवतिथिश्च
तुर्दशी।रात्र्यास्येप्रदोषसमये।चपरंनिशीथगामध्यरात्रिव्यापिनीभवतिसाशिवरात्रिःप्रो
क्ता।प्रदोषेवानिशीथेवाद्वयोर्वावास्तिसाभवेत्।शिवरात्रिव्रतेतत्रद्वयोःसत्त्वात्प्रशस्य
तइतिमाधवोक्तेः।प्रदोषार्धरात्रयोर्व्याप्ताग्राह्येतिस्पष्टमुक्तंस्कांदे।दिनद्वयेप्यर्धरात्रे
वर्ततेचेच्चतुर्दशी।परैवसाप्रकर्तव्यानचपूर्वाकदाचनेति।केवलंनिशीथव्याप्तोसमाम
ध्याप्रोक्ता।रात्रिमुखेकेवलप्रदोषव्यापिनीहीनाफलनिष्ठेति।प्रदोषव्यापिनीग्राह्या
शिवरात्रिःशिवप्रियैः।रात्रौजागरणंयस्मात्तस्मात्तामुपोषयेत्।पूर्वोपवासकृतेपर
दिनेयामत्रयोर्ध्वगामिन्यांचतुर्दश्यामुषसिप्रातःकालेभुक्तभोजनंभवति।तिथ्यंतेपारणं
यामत्रयादर्वाक्समापने।अन्यथापारणंप्रातरन्यतिथ्युपवासवदितिमाधवोक्तेः।प्रतिमा
संशिवरात्रिव्रतंरात्रौपूजाजागरणविधानाद्धकरात्रिव्यापिनीग्राह्या।तत्रापिप्रदोषनि
शीथोभययोगोमुख्यः।माघमासस्यकृष्णायांचतुर्दश्यांसुरेश्वर।अहंयास्यामिभूपृ राम
ष्ठेरात्रौनैवदिवाकलौ।लिंगेषुचसमस्तेषुस्थावरेषुचरेषुच।संक्रमिष्याम्यसंदिग्धंवर्षे ४१
पविशुद्धये।तस्माद्रात्रौहिमेपूजांयःकरिष्यतिमानवः।मंत्रैरेतैःस्करस्थेष्टविपाप्मासभविष्य
तीति।केचित्त्वत्रास्पष्टकल्पत्वेनैकस्यवाद्वयोर्वाश्रवणं।अथवाशिवरात्रिंचपूजाज

गरणे नर्येत्। कश्चित्पुण्यविशेषेण व्रतहीनोपियः पुमान्। जागरं कुरुतेयस्तु
पवासस्समतां व्रजेदिति। यच्चेशि वायसमर्पितं तत्प्रसादरूपेण पुष्पनैवेद्या
दि विष्णु निवेदितवस्तुवत्स्वीयं नोपयोज्यं। स्पृष्ट्वारुद्रस्य निर्माल्यं सवासा
संप्लुतः शुचिरिति। कालिकापुराणे। अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं फ
लंजलं। शालग्रामशिलास्पर्शात्सर्वं याति पवित्रतां। नैवेद्यं वस्त्रादीनि
नाददीत। निर्माल्यं तु ग्राह्यमेव। तदुक्तं स्कांदे। नरके पतितो घोरे तिर्यग्यो
नौ च संभवः। ब्रह्महापि शुचिः स्यात्स निर्माल्यं यस्तु धारयेत्। तस्य पापं
महच्छीघ्रं नाशयिष्ये महाव्रतेति। अशुचिना न ग्राह्यमनुपनीतेनेति केचि
त्॥ ~~५१~~॥ ॥ ~~इति निर्णयसिंधौ~~ स्कांदे॥ निर्माल्यं यो हि मद्भक्त्या शि
रसा धारयिष्यति। अशुचिर्भिन्नमर्यादो नरः पापमवाप्नुयात्। शिवदी
क्षारहिते ज्योतिर्लिंगातिरिक्तस्य वा न ग्राह्यमिति केचित्॥ ५१॥ इति निर्ण

का.नि.
४२

भस्मिन्डांते चतुर्दशी निर्णयः॥ ॥अथ पूर्णिमाऽमावास्ये निर्णीयेते॥ ॥सावित्रीव्रते वटपैतृकी मनुयुताग्रा
ह्या वटस्यार्चने चेद्दष्टादशनाडिकाधिकचतुर्दश्यन्विता त्वपरा॥ सर्वास्त्रिक्षणकालगास्तु व्रतविधौ ग्रा
ह्या कुहूः पूर्णिमा राका मासस माख्यभेन सहिता स्नाने च दाने शुभा॥ ५२॥ ॥वटपूजायां सावित्री
पौर्णमासी मनुयुता चतुर्दश्यन्विता ग्राह्या॥ वटपैतृकी तत्संबंधिन्यमावास्या सापि चतुर्दश्यन्वि
ता कार्या॥ तदुक्तं स्मृत्यंतरे॥ कृष्णाष्टमी बृहत्तपा सावित्री वटपैतृकी॥ अनंगत्रयोदशी रंभा उपोष्या
पूर्वसंयुता॥ चेद्यद्यष्टादशनाडिकाधिकचतुर्दश्यन्विता पूर्णिमा कुहूर्वा भवति तदा परा ग्राह्या अष्
टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति॥ रंभेति माधवोक्तेश्च॥ एतद्व्रतद्वयव्यतिरिक्ता सर्वा कु
हूरमाया पूर्णिमा त्रिक्षणकालगा॥ प्राक्त्रिमुहूर्तव्यापिनी पि ग्राह्या॥ भूतविद्धा न कर्तव्या दर्शः पू
र्णा कदाचन॥ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति ब्रह्मवैवर्तात्॥ एकादशी तथा षष्ठी पू
र्णमासी चतुर्दशी॥ अमावास्या तृतीया च उपोष्याः परान्विता इति विष्णुधर्मोत्तरात्॥ राका पौर्ण
मासी॥ मासस माख्यभेन मासनामनक्षत्रेण युता भवति तदा स्नानदानादौ प्रशस्ता॥ स्वनामनक्ष
त्रं तु चैत्रस्य चित्रा॥ वैशाखस्य विशाखेत्यादि॥ ५२॥ ॥इति समाप्तः पूर्णिमयोरुपवासादौ निर्णयः॥ ॥
अथोपाकर्म॥ ॥त्रेधाह्नि श्रवणर्क्ष आद्यलवके नस्पृक्षयुग्यर्ग्विदः कुर्युः श्रावणकर्ममासि नक्षत्रतिस्वल्पेन
भेतत्क्षणात्॥ ॥नंदाद्येंदुतिथौ यजुर्विद इयं ग्राह्यास्ति चेत्संगवं दुष्टा यां न निशी यष्टकृद्राहुभूमत्कासार्क
संक्रांतितः॥ ५३॥ ॥नभसि श्रावणमासि अह्नि दिनमाने त्रेधा विभक्ते त्र्यादिलवके पूर्वाह्णे वसूनाम्नि धनि

राम
४२

निषातद्युजितद्युक्ते श्रवणक्षेसिति ऋग्विदः ऋग्वेदिनः श्रावणं कर्म उपाकर्म कुर्युः। यजुर्विदस्तु
म नंदाघे दुतिथौ निर्द्दोषे कपौर्णिमायां। सामगास्तु चाप्रधि ढ्ययं। चित्रालद्यकहस्ते उपा
कर्म कुर्वीरन्नित्यर्थः। यदौदयिकनक्षत्रग्रहणं तत्त्रिमुहूर्तमितं ग्राह्यं। भेन क्षत्रे त्रिक्षणा त्रि
मे मुहूर्तास्वल्पे न कुर्युः। तथोक्तं परिशिष्टे। उदये संगवस्पर्शी श्रुतौ पर्वणि चार्कभे। कुर्युर्नभस्युपा
क्रमा कर्म ऋग्यजुः सामगा दिति। यजुर्विदस्तु इयं पौर्णमासी चेदुदि संगव प्राप्ता तत्रोपाक
र्म कुर्युः॥ अन्यथा पूर्वविधायामेव॥ तथा च गार्ग्यः। श्रावणी पौर्णिमासी च संगवात्परतो य
मि दि॥ तदैवौदयिकी ग्राह्या नान्या ह्यौदयिकी भवेदिति दुष्टायामिति॥ निशीथान्मध्यरात्रात्प्र
वृत्तश्चंद्रस्य ग्रासस्तथार्कसंक्रांतिस्ताभ्यां दुष्टायां पूर्णिमायां न कुर्युरिति। संक्रां
स्तु तिर्ग्रहणं वा यदि पर्वणि जायते। उपाकृतिं पंचम्यां कार्यवाजसनेयिभिरिति। संक्रांतौ
ग्रहणे वापि सूतके मृतके पि वा। गणस्नानं न कुर्वीत नारदस्य वचो यथा॥ निशीथा
र्ध्वं चेद्धि ग्रहणं वा संक्रांतिस्तदा पूर्णिमायामेव कर्तव्यं। तथा च गार्ग्यः अर्धरात्राद
धस्ताच्चेत्संक्रांतिर्ग्रहणं भवेत्। उपाकर्म न कुर्वीत परतश्चेन्न दोषभाक्॥ निशीथा ति॥
र्ध्वं ग्रहणे संक्रांतौ वा किं कार्यमित्यत आह। दुष्टे पर्वणि पूर्व पंचमितिथौ हस्ते वागर्थ

का॰नि॰ ४३ दयेतत्रौषध्यभवेनभस्यहस्तिभेनस्तृणिमायांकरे सिंहकेंर विभेपराह्णसमयेकुर्युस्त
थासामगाध्ययनहोभेप्यपराह्णगेनचत्वारेस्तन्त्येपुण्डावोदये ॥५४॥ प्रागुक्तग्रहणेसंक्रां
नितःपर्वणिपूर्णमामीति थोडुदसदोषेसतिपूर्वपंचमतिथौश्रावणसितपंचम्यां
हस्तेहस्तयुक्तायांवाद्वयेपृथकुर्यं वन्यामेवहस्तेवोपाकर्मकुर्युः। तदुक्तंकात्यायनेन।
अथातोध्यायोपाकर्मौषधीनांप्रादुर्भावेश्रवणेनश्रावण्यांपौर्णमास्यां श्रावणस्य व५
पंचम्यांहस्तेनवेति। याज्ञवल्क्येनापिकालचतुष्टयमुक्तं। अध्यायानामुपाकर्मश्राव
ण्यांश्रवणेनवा। हस्तेनौषधिभावेवापंचम्यांश्रावणस्यतु॥ अथतत्रश्रावणस्यका
लद्वयेपंचम्यांहस्तेनवापर्वणिचोषधीभावे औषधीनामभावेप्रादुर्भावेनभस्ये
भाद्रपदेहरिभेश्रवणर्क्षेतत्रवानस्तृणिमायाभाद्रपदपूर्णिमायांचाप्यरेभाद्रपदेहस्त
भेप्युपाकर्मकुर्युः। तथाचमनुः। श्रावण्यांप्रौष्ठपद्यांवाप्युपाकृत्ययथाविधि। युक्तश्छंदां
स्यधीयीतमासान्विप्रोर्धपंचमान्॥ अपिशब्देनभाद्रपदहस्तश्रवणपंचमीनामु
१ पादानं। तथाचपरिशिष्टे। अरण्योर्धयदास्तेस्मिन्मासेनोसंभवंतिचेत्। तदा राम
भाद्रपदेमासिश्रवणेनतदिष्यते॥ अथबौधायनतैत्तिरीयशाखिनांग्रहणसं ४३

हृ॰ णा

ते

क्रमपाडुष्टायांश्रावणपौर्णमास्यांप्रौष्ठपद्यादिकालाःप्रशस्ताउक्ताः।ग्रहेसंक्रांतिदुष्टायांश्रावण्यां
तैत्तिरीयकैःप्रौष्ठपद्यामुपाकर्मकार्यंबोधायनेरपीति।अपिशब्दात्बौधायनानामाषाढ्याम
प्युक्तं।अथसामगानामुपाकर्माह॥सिंहेर्कइति।सिंहसंक्रांतौसत्यांरविभेहस्तर्क्षेऽपराह्णकाल
व्यापिनिसामगाउपाकर्मकुर्युरिति।सिंहेरवौतुपुष्यर्क्षेइत्युक्तपक्षस्यशुक्लपक्षेतुहस्तेनउपा
कर्मापराह्णिकमितिगार्ग्योक्तेः।उपाकर्मापराह्णेस्यादुत्सर्गःप्रातरेवहीतिछंदोगविषये।अ
त्रपूर्वाह्णपराह्णविभागोद्विधा।विभक्तोह्छंदोगानामेवनत्वपरा[illegible]छंदोगेनक्षत्रयोगेत्र्य
हौदयिकग्रहणं।किंतुव्यह्णोभइति।व्यह्णोरपराह्णेभेनक्षत्रेसति।चपरं[illegible]व्यह्णोभे
स्याऽभावेपालवैरंशोभेव्यह्णोपरा[illegible]व्याप्तौसत्यामपिऔदयिकेउडोनक्षत्रेसामगाः
कुर्युरित्यर्थः॥उदयेसंगवस्पर्शेमुलोपर्वणिचार्कभे॥कुर्युर्नभस्यपाकर्मऋग्यजुःसा
मगाःक्रमादिति॥अत्रछंदोगानांसिंहेरवावित्युक्तत्वादधिमासेप्युपाकर्मेत्तिगौभिल
तनएव।अतएवस्मृतिसंग्रहेस्पष्टंप्रथमग्रहणं।गुरुभार्गवयोर्मौढ्येबाल्येवावार्धके
पि।तथाधिमाससंसर्पमलमासादिदुष्टेद्विजे॥प्रथमोपाकृतिर्नस्यात्कृतंकर्म
णा।

का॰ नि॰
४४

विनाशकरी रिति। अत्र प्रथमोपाकृतिनिषेधे यदधिमासग्रहणं तद्द्वि(तृ)तीयादिमव्रत्सर्थं छंदो
गविषयं। यच्च उपाकर्मतथोत्सर्गश्च सवाहे सवाष्टकाः। मा सरध्यौ परत्रस्युर्वर्जयित्वा
तु पैतृकमिति निषेधवचनं तच्छंदोगव्यतिरिक्तविषयं॥ तस्मात्सामगानां सिंहार्के एवं
रवं ग्रहसंक्रांतिदूषितेपि। ५४। इत्युपाकर्मनिर्णयः॥ अथोत्सर्गविधिः॥ ॥पौषमा
सिकष्मे[illegible]थवाष्टमतिथौ कृष्णे श्रुत्तोत्सर्जनं प्रोक्तं मंदधियां तदैव दिवसे तत्प्राग्उपाकर्म
तः। तद्वत्साम विदां रवौ हरिगते द्वेधा द्विष्ठवेह्निकेवेदोत्सर्जनमीज्यभेके चिदिदं कर्के [illegible]
स्करे॥ ५५॥ पौषमासिकभे रोहिण्यां वाष्टमीतिथौ अष्टम्यां कृष्णपक्षे श्रुतस्याध्ययनस्यो
त्सर्जनं॥ उत्सर्गः प्रोक्तः। तत्र याज्ञवल्क्यः॥ पौषमासस्य रोहिण्यामष्टकायामथापिवा॥
जलांते छंदसां कुर्यादुत्सर्गं विधिवद्बहिरिति पौषस्य रोहिण्यां मध्यमायामष्टकायां
वाध्यायानुत्सृजेयुरिति कात्यायनवचनात्। अर्धषष्ठान्मासानधीत्योत्सृजेयुर न राम
र्धसप्तमान्वेति कात्यायनवचनं सर्वेषां प्राज्ञं तथापि कलौ मंदमतीनां तस्मिन्नेव दिने ४४
उत्सर्ग उपाकर्मतः प्राग् उक्तः। तथा च खादिरगृह्ये। पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिने
थवेति॥ तद्वत्साम विदां सामगानां रवौ हरिगते सिंहार्के सति द्वेधा द्विविभक्ते पूर्वार्धेक्रे
न

पूर्वाह्णव्यापिनीग्राह्या भद्रे पुष्यर्क्षे वेदोत्सर्जनं प्रोक्तं ॥ सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरे
द्बहिः ॥ धर्मं दोगामि छिता कुर्यु रुत्स र्गं सर्वछंदसामिति ॥ केचिदिति ॥ यदा तु सिंहस्थे स्व
ये प्रथमे तोहस्त एव भवति ॥ न सर्वतः पुष्यस्तु कर्कस्थे ॥ तदा इदमुत्सर्जनं तत्रैव कर्कग
ते भास्करे प्रोक्तं ॥ कदाचिदिति ॥ मासे प्रोष्ठपदे हस्तात्पुष्यः पूर्वोभिवेद्यदा ॥ तदा तु श्रा
वणे कुर्याद्धित्सर्गं छंदसां द्विजः इति कात्यायनोक्तेः ॥ इत्युत्सर्गः ॥ ५५ ॥ अथ रक्षाबंध
नमाह ॥ रक्षाबंधनपूर्वकं हलभिद्प्रागान्वितायां चरेच्छ्रावण्यामपराह्णके स्विलमि
दं विध्योच्छिन्नतायामथ ॥ होलारात्रिमुखभवे च्चुसहितां विध्यात्तदं नेतदारात्रेः शेष
मुहूर्तकेपि चक्रदानमुच्छेकालोथवा ॥ ५६ ॥ साधं चेत्प्रहरत्रयं परदिने पूर्णा भ
ति वेत्तं पुरो वह्निः स्यात्प्रतिपत्तिथौ रिहनिशा पक्षे सनं देज्व लेतु ॥ पाणुतौ प्रतिपद्व्या
लं तिमतिथिः सर्वा च पूर्वा च्चिता ज्येष्ठे मासि तथाश्विने कुह्नितिथिः स्याद्दीपदाना
दिके ॥ ५७ ॥ चेद्दर्शः प्रहरत्रयं च सदत्वं न दाग्नि मावाधिगाते दीपोत्सव केव्य

का॰नि॰
४५

म

थात्तु भवतः प्रागाह्निते सर्वदा। चेदाद्येह्नि रक्षोबंधनमुचितं श्राद्धं परस्मिन्दिने
न कुर्वंति तथैव गोबलिर्हि होलिकादाहो न्विते पक्षतो ॥ ५८ ॥ ॥ व्याख्या ॥ ॥ पूर्वार्धेन
रक्षाबंधनमाह रक्षाबंधनं पूर्वकं हस्तिकर्माचारप्राप्तं होलिकानिक्षेपणं तदत्र प्रागाह्नि-
तायां पूर्वविद्धायामेव चरेत् ॥ अपराह्णके कालेव्यथाउ ड्झिन्ते यत ॥ श्रावणीदुर्गन-
वमीति वचनात् ॥ ततोपराह्णसमये कुर्यात्पौरोलिकां शुभां ॥ कारयेच्छाक्षतैस्त
द्व सिद्धार्थैर्हैमचर्चितमिति ॥ लहिधौ ॥ ॥ अपराह्णकालव्याप्ते तेश्वयद्युक्तं उपा-
कर्मादिकं विधाय ततोपराह्णइत्यादिन तत्पूर्णतिथ्यादौ ज्ञेयं ॥ पर्वण्यौदयि-
के कुर्युरित्यादिवाक्यैरुत्तरविद्धाग्राह्यत्वमुक्तं ॥ ॥ श्रावणीदुर्गनवमीत्यादि-
वाक्यैः पूर्वविद्धाग्राह्यत्वमुक्तं ॥ ॥ अनयोर्विरोधे पूर्वविद्धा ग्राह्यत्वं पुराणोक्त
श्रावणीकृत्यविषयं ॥ नेतूपाकर्मविषयमिति रक्षाबंधनिर्णयः ॥ अथ होलिकानिर्णयः ॥ राम ४५
होलेति होलाहोलिकादीपनं रात्रिमुखे प्रदोषे भवेत् ॥ पूर्वविद्धा प्रकर्तव्या फाल्गुनीपौ न

र्णिमा तथेति शिवरहस्यात्। निशागमे तु पूज्येत होलिका सर्वतो जनैरिति पृथ्वीचंद्रोदये।
तत्र चेद्वेष्टियोगस्तत्राह। सा होला रात्रिमुखव्यापिनी व्यास हिता भवेत्तदा तदंते रात्रेः शेष
मुहूर्तमात्रेऽपि होलिकादीपनं भवितु। शेषः सूर्योदयावधीति पारिभाषिकाः। यच नात्परा
कायामनयादूर्ध्वं चतुर्दश्यां यदा भवेत्। होलाभद्रावसाने च निशांते वा प्रदीपयेदिति भ
विष्योत्तरात्। भद्रायां निषेधश्रवणाच्च। भद्रायां दीपिता होला राष्ट्रभंगं करोति वै। न
गरस्य च नैवेष्टा तस्मात्तां परिवर्जयेदिति। भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी त
था। श्रावणी नृपतिं हंति ग्रामं दहति फाल्गुनीति स्मृत्यंतरात्। यदा पूर्वदिने भद्रारहितः
कालो न प्राप्यते परदिने सूर्यास्तात्पूर्वमेव पौर्णिमासमाप्तिस्तदा किं कार्यमित्यत्राह
नत्सुच्छकाले यत्नेति। पूर्वदिने रात्रावेव भद्रापुच्छसमये होलादीपनं वा भवेत्। तिथि
यां यानिकार्याणि शुभानि त्वशुभानि च। तानि सर्वाणि सिध्यंति विष्टिपुच्छे कृता

निच। विष्टिपुच्छं ज्योतिःशास्त्रे। दशम्यो मष्टम्यां प्रथमघटिकापंचकपरं। ५। ०हरिद्युः।। सप्त
म्यां० द्विशेदे घटिका १२ तेत्रिघटिकं। तृतीयाराकायां नखमितघटी २० भ्यः परतरं भव
विष्टेः पुच्छं शिवतिथि १४ चतुर्थ्यां ४ स्तो विरमे। पूर्णिमायाः विंशतिघटीभुगतास्तु वि
ष्टिपुच्छप्रवृत्तिः। ततस्त्रिघटिकाः ३ पुच्छं तत्र दीपनं पूजां कुर्यात्। यदापरदिने पूर्णिमा
सार्धयामत्रयमिता ततोधिका वा प्रतिपच्चोत्तरदिने वृद्धिगामिनी तदा तत्रैव कर्तव्ये
त्याह। सार्धं चेद्दिनि। चेद्यदि परदिने पौर्णिमा सार्धप्रहरत्रयं भवेत्। पुरोऽग्रे प्रतिप
त्तिथेर्वृद्धिः स्यात्तदा समनंदे प्रतिपत्काले पीह निशामुखे होलाज्वलेत्। तथा च भविष्यो
त्तरे। सार्धयामत्रयं पूर्णा द्वितीये दिवसे यदा। प्रतिपद्वर्धमाना तु तदा सा होलिका स्मृ
तेति। अन्यथा पूर्वविधायां भद्रान्तेन तु पुच्छे वा होलादीपनं कर्तव्यं।। ।।इति होलिकानिर्ण
यः।। अथ दीपोत्सवनिर्णयमाह। प्रागुक्तेति। सर्वांतिमतिथिरमावास्याप्रतिपद्य

तामस्रकृसाधारणनिर्णयेउक्ता।चपरंज्येष्ठेमासितथाश्विनेमासिकुहूतिथिरमापूर्व
दो विद्धाचतुर्दशीविद्धादीपादौनोकथिता।तदुक्तंस्मृत्यंतरे।तुलासंस्थेसहस्रांशौ
प्रदोषेभूतदर्शयोः।उल्काहस्तानराःकुर्युःपितॄणांमार्गदर्शनं।अमावास्यायदमा
त्तोदिवाभागेचतुर्दशी।पूजनीयातदालक्ष्मीर्विज्ञेयासुखरात्रिकेति।यदातूत्तर
दिनेऽमावास्यायामत्रयमिताप्रतिपत्सार्धयामत्रयमिताऽग्रेद्वितीयावृद्धिगा
तदाकिंकर्तव्यमित्यत्राह।चेद्दर्शइति।चेद्यद्यमावास्याप्रहरत्रयमिताऽसद्दलंया
मत्रयंतदाप्रतिपद्भवति।द्वितीयावृद्धिगा।तदादीपोत्सवके।दीपश्चेत्सत्स्वदीपो
त्सवकंतस्मिन्विषयेतेदर्शनंदेभवतः।दर्शेदीपदानं।प्रतिपदिगोमहोत्सवः।तदुक्तं
स्मृत्यंतरे।त्रियामगादर्शतिथिर्भवेत्सोर्द्धत्रियामाप्रतिपद्धिवृद्धौ।दीपोत्सवेते

मुनिभिः प्रदिष्टे अतोन्यथा पूर्वयुते विज्ञेय इति । पुराणसमुच्चयेपि । वर्द्धमानातिथिर्नंदाय

दा सार्धत्रियामिका । द्वितीया वृद्धिमासा चेदुत्तरा तत्र चोच्यते । यदा पूर्वेद्युरेव प्रदो
षव्यापिन्यमावास्या श्राद्धयोग्या च द्वितीयेदिने तद्विषये कार्यमाह । नेदिति । चे
द्यदि प्राग्दिने दीपदानमुचितं कालवशात्सा संपरस्मिंदिने कालवशाच्छ्राद्धं च प्रासं
तत्तथैव स्वे स्वे काले कुर्वीत । प्रदोषभूतदर्शयोरिति । अमावास्या यदा रात्रौ दि ल
वा भागे चतुर्दशी तिथिर्वा दाहृतवचनात् प्रदोषव्यापिन्यां दीपदानादि कुर्यादित्य
र्थः । श्राद्धं त्वपराह्णव्यापिन्यामेव । यद्यपि कृत्वा तु पार्वणश्राद्धमित्यभिधायनतोप
राह्णसमये इत्यादि पितॄणां मार्गदर्शनं इत्यनेन सर्वैरपि श्राद्धानंतरं कर्तव्यमिति
प्रतीयते । तत्तु श्राद्धदिने प्रदोषव्यापिन्यां च तस्यां तत्त्वं भवत्येव । पितॄणां मार्गद राम
र्शनमिति प्रभृति तेद परपक्षागतपितृविषयं । अमावास्या तु प्रतिमासमेव वा ।

तर्थोचोक्तं ॥ शस्त्राशस्त्रहतानां च भूतानां च चतुर्दशी यो: उज्ज्वलज्योतिषा देहं दहेयं
म व्योमवह्निना । उल्कादाने मंत्र: । अग्निदग्धाश्च ये जीवा ये ऽप्यदग्धा: कुले मम । उज्ज्वलज्योतिषा
दग्धास्ते यान्तु परमां गतिं ॥ विसर्जने मंत्र: । यमलोकं परित्यज्य आगता ये महालये । उज्ज्व
लज्योतिषा वर्त्म प्रपश्यंतो व्रजंतु ते इत्यादि मंत्रलिंगात्स्पष्टमुक्तं । प्रतिपन्नो क्रीडने बलिपूज
ह नेच पूर्वविधाय्याहोत्सवा[illegible] ॥ गोबलि: मह इति । दर्शी न्चिनेपक्ष प्रतिपदि गोक्रीडने
बलिमहोत्सव: पूज्यो के जे व्या ॥ प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतं । परविद्धेषु य: कुर्यात् तु
ति पुत्रदारधनक्षय: । अपराग्निकरणं द्वितीयायां तु गोचनं भूपच्छेदकरिष्येन विनातना
शोकुलक्षय[illegible] मिति पुराणसमुच्चयात् ॥ पाकुद्द: प्रतिमिश्रा तत्र गा: पूजये [illegible] पत
न्नृप ॥ पूजने त्रीणि वर्धते प्रजा गावो महीपति: शिति दवलोत्तक्त: । गवां पूजादिने
यत्र रात्रौ दृश्येत चंद्रमा: ॥ सोमो राजा पशून्हंति सुरभी पूजिकं तथेति ॥ अतः
पचे रदर्शनीभाचेद्धाचिद्दीपोत्सवी त्रियामा मा इत्यनेनोलेराधा स्वेनोक्ता ॥ बलि या
पूजने पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनमिति । नीराजनं तु स्वा[illegible]त्यायामपि

द्वितीयास्वेतास्वेवप्रतिपदिकर्तव्यं॥प्रातर्वायदिलभ्येतप्रतिपत्तुघटिकाद्वयं।
द्वितीयायांतदाकुर्यात्सायंमंगलमालिकां।अश्विनीयेयदादर्शेनारीनीराजनं
भवेत्॥नारीणांतत्रवैधव्यंदर्शोडभिक्षमादिशेत्॥भविष्योत्तरे॥एवंगतेनिशी
२ थेतुजनेनिद्रार्धलोचने॥तावन्नगरनारीभिःसूर्यडिंडिमवादनैः॥नि॰का॰स्य॰
निष्काश्याहृष्टाभिरलक्ष्मीःस्वगृहांगणात्॥तत्तुदीपदानानंतरंममावास्यापक्षया
कर्तव्यमिति॥इतिदीपोत्सवनिर्णयः॥अथतात्कालिकतिथिनिर्णयमाह॥
अब्दिःस्नानविधौमृतौजनुषिवाभ्यंगेव्यवायेयुगाद्येमन्वादिषुवैधृतौर
स्मृजोमिथानपातादिषु॥क्षौरेनव्यवधूनरेशसदनावेशेशिलास्थाप
नेकार्येषुबुधःगमेतथानिगदितातात्कालिकीयातिथिः॥५९॥अब्दोस्ना
नंतद्विधौपर्वद्वयंतात्कालिकंग्राह्यं॥मृतौमरणे॥जनुषिजन्मनि॥अ राम ५८
भ्यंगेतैलाभ्यंगनिषेधे॥व्यवायेमैथुननिषेधो॥युगादिमन्वादितिथिषु

भ४

न त्योरदम्र्जो दंतधावनं निषेधे ॥ मंथाने दधिमंथानादौ पातादिषु व्यतीपा य
तवैधृते संक्रांत्यादौ ॥ क्षौरे क्षारकर्मणि ॥ न वधूसदनप्रवेशे ॥ नरेशासद
नप्रवेशेच ॥ शिलास्थापने ॥ वास्तुप्रारंभे । गमेयात्रायां । एतेषु कार्येषु ता
या त्कालिकीतत्कालिका तिथिः निगदिता प्रोक्ता । तथा च स्मृत्यंतरे । अभ्यंगे चो
दधिस्नाने दंतधावनमैथुने ॥ जाते च मरणे चैव तिथिस्तात्कालिकी स्मृ
ता ॥ मन्वादौ च युगादौ च संक्रांतौ धृतिपातयोः क्षौरे वधूप्रवेशे च शिला
स्थायां गमेपि च ॥ दधिमंथनके चैव तिथिस्तात्कालिकी स्मृतेति ॥ इति
तिथ्यादिनिर्णयः ॥ ॥अथ श्राद्धनिर्णयः ॥ ॥ तत्रादौ वैश्वदेव
निर्णयमाह ॥ ॥ श्राद्धादाविह साग्निकस्य २ दि ४ सकलस्थालीपाकांततः प्रोक्तः पं
चमखः सपिंडपितृजं त्यक्त्वा निरग्नेरथ ॥ श्राद्धांते पि च साग्निकस्य विकिरं श्राद्धांततोन्वं
तराद्दादावाप्युदयेषु कर्मस्वगृहान्नादेवसर्वं चरेत ॥ ६० ॥ ॥ साग्निकस्य पंचमखो
वैश्वदेवः श्राद्धादाविह प्रोक्तः ॥ तथा चोक्तं ॥ पक्षांतं कर्म निर्वर्त्य वैश्वदेवं तु साग्निकः ॥

का॰नि॰ पिंडयज्ञंततःकुर्यात्ततोन्वाहार्यकंबुधः॥ पक्षांतमग्न्यान्वाधानादि॥ पिं
४९ डयज्ञंपिंडपितृयज्ञं॥ अन्वाहार्यंदर्शश्राद्धं॥ अन्यच्च॥ श्राद्धात्प्रागेवकुर्वीतवै
श्वदेवंतुसाग्निकः॥ एकादशाहिकंमुक्त्वातत्रचांतेविधीयतेइति॥ सपंचमखः
॥ ॥ पिंडपितृजंपिंडपितृयज्ञंत्यक्त्वासकलस्थालीयपाकोंतेषुप्रोक्तः
स्थालीपाकःपक्षादिश्रवणाकर्मादयस्तेषामंततएवप्रोक्तः॥ ॥
अग्रतोवैश्वदेवस्यस्थालीपाकाःप्रकीर्तिताः॥ ॥अन्यत्र
पितृयज्ञात्तुसोपराह्णेविधीयतइति॥ ॥अथनिरग्नेर
ग्निरहितस्यसपंचमखःश्राद्धांतेप्रोक्तः॥ ॥अना
हिताग्निर्यदिदर्शश्राद्धंकृत्वाविधानतः॥ ॥पितृशे राम
षेणवैकुर्याद्वैश्वदेवंततोद्विजः॥ ॥ ॥ ॥प्रत्यब्दमा ४९

हःस्वाहाकुर्यादिनाभावेकेनचिदाकाष्ठाद्देवेभ्यःपितृभ्योमनुष्येभ्यश्चोदपात्रादिति
५० गृह्यसूत्रविधानात्।तथासायनीये।अन्नाभावेप्रवासेचतंडुलानोषधीस्तथा।पयोद
धिघृतंवापिसक्तुमूलफलंतथा।योजयेद्द्रव्यजातादोजलंचापत्सुवाजलं इतिवैश्वदेव
निर्णयः॥ ६०॥ अथदर्शश्राद्धनिर्णयमाह।दर्शश्राद्धमिहोदितंचकुतुपाद्या
क्सराह्लावधिव्युत्क्रांतकुतपेपराह्णविषयस्वल्पेपराह्णेद्वये।तुल्येवासकलेति
थेःसमचयेःक्षीणेपरापूर्विकाद्धेक्षेद्वविषमापराह्णसमयेतत्राधिकागृह्यते॥६१॥
दर्शश्राद्धमिति।कुतपात्कालात्तुयावत्सराह्णावधिदर्शश्राद्धमिहोदितंकथितं।कु
तपव्युत्क्रांतेव्यपगतेदर्शप्रवृत्तौपराह्णविषयदर्शश्राद्धमुदितं।अपराह्णःपितृणा
तुयापरा ह्णानुयायिनी।साग्राह्यापितृकार्येषुनपूर्वास्नानुयायिनीति। ५०
अपराह्णःपितृणांतस्मादपराह्णेददातीतिश्रुतेः।दिनद्वयेपराह्णयोगस्तत्रव्य

वस्थामाह।यदातुदिनद्वयेसाम्येनैवदेवामपराह्णस्यस्पृशति।अथवा
दिनद्वयेसंपूर्णापराह्णस्पृशतितदोत्तरातिथिःवृद्धौसाम्येयुग्मात्ग्रा
ग्राह्या।क्षयेतुपूर्वा।अमावास्यातुया।हिस्यादपराह्णद्वयेपिसा॥
क्षयेपूर्वापरावृद्धौसाम्येपिचपरामतेति।द्राविराघवसंवादात्।अ
न्यच्च।आ।तत्क्षयेसिनीवालीतिथिवृद्धौकुहूर्मता।साम्येपिच
कुहूर्ज्ञेयावदंवेदांगवेदिभिरिति।दृष्टचंद्रासिनीवालीनष्टचंद्रा
कुहूःस्मृतेति।यदात्वद्धादिनद्वयेपराह्णसमयेविषमाभवतिसाय।
द्यो॥६१॥दिनद्वयेपराह्णाभावेव्यवस्थामाह।चेन्नाहद्वितीयय

का॰नि॰ ५१ राह्णविषये क्षीणे तिथौ साग्निकैः कार्या पूर्वतएव वाह्नि राहते: स्त्री
शूद्रकैश्चापरा। स्त्रीशूद्रेषु सदादर्शस्य कुतपोऽस्याभावतः शारदः
पूर्वं पक्षयवाह्नि साम्यमुदितं ततसक्षयतेरिष्यते ॥ ६२ ॥ चेदाहि ॥ चे
द्यदि अहर्द्वितयेदिनद्वये ऽपराह्णविषये ऽमा नास्ति तदग्नौ तिथेः क्ष
यात्तर्हि चेपि हीयते तदा साग्निकैः पूर्वा कार्या तथा च छंदोगपरिशिष्टे।
चतुर्दशीयदा यामतुरीयमनुपूरयेत्। अमावास्याक्षीयमाणा तदेवश्रा
द्धमिष्यते। तुरीयमनुपूरयेदित्यस्तात्पूर्वं किंचिदमावास्या स्यात्। त्रि
धा विभक्ते दिवसे कृते ऽपराह्णमप्राप्यैव साग्निकैः पूर्वा कार्या॥ अ
स्मिन्विषये वह्निरहितैर्निरग्निकैः स्त्रीशूद्रैश्चापरा कार्या। अमादिनद्व ५१

सिकेनैव च श्राद्धं कृत्वा विधानतः॥ तच्छेषेणैव कुर्वीत वैश्वदेवं ततो द्विजः। च
त्वा दान्महालयाष्टकादावपि विधेयं। चपरसाग्निकस्य विस्तरश्राद्धस्यैकोद्दि
ष्टश्राद्धस्यानंतरमेवान्नांतरान्निर्भिन्नपाकात्संचमखः प्राह॥ एकोद्दिष्टं हि कं
त्यक्तेति प्रागुक्तं। आभ्युदयिकेषु कर्मसु पूर्वमखः आदावेव प्रोक्तः। केचिन्निर
ग्नेर्वैश्वदेवं चतुर्विधं वदंति। दर्शश्राद्धक्षयेचालयमध्ये दर्शानुकुर्वंत। महालये त
पिंडांते वैश्वदेवं चतुर्विधमिति। मध्ये पिंडांते च यदुक्तं तत्पृथक्पाकविषये। यत्तु। पि
तृश्राद्धमकृत्वा तु वैश्वदेवं करोति यः। अकृतं तद्भवेच्छ्राद्धं पितृणां नोपतिष्ठते। इ
त्यादीनि वाक्यानि निरग्निकविषयाणि। इद वैश्वदेवाह्निककर्म गृहान्नादवस्वकी
यान्नादेव चरेत्परान्नादित्यर्थः। गणाचे माषकाद्यादि परान्नपायसं तथा। दग्ध
मन्नं तथा क्षारं वैश्वदेवे विवर्जयेत्। अस्य वैश्वदेवस्यावश्यकत्वं द्विजानां। अहर

येपिस्याद्यदाकुतपगामिनी। पूर्वा तु साग्निकैर्ग्राह्या शूद्रैश्चानाग्नि
कैः परा। जाबालिः सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि।
स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैरित्यादि। यत्तु अपरा
ह्णद्वयव्यापि यादर्शतिथिः क्षये। आहिताग्नेः सिनीवाली निरग्न्या
देः कुहूर्मतेति जाबालिवचनान्निरग्निकस्य कुतपकालिका ग्राह्यत्व
मुक्तं। तथापि। दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितं। अपराह्णः
पितृणां तु तत्रदानं प्रशस्यत इत्यादिवचनेन निरग्निकाणामपि प्रा
समपराह्णस्य दर्शश्राद्धकालत्वं। यदि कुतपकालिकाया ग्राह्यत्ववचन

मन्यथानोपपद्यतेतत्तुद्दिनद्वयापराह्णस्पर्शाभावेवोदितंचं।साम्यन
५२ ग्निन्यवस्थास्याच्चेदद्वारपराह्णयोःपूर्वेद्युःसाग्निकाःकुर्युरुत्तरेद्युर्नि
रग्निकादित्यादिमाधवनिबंधाल्लिखितवचनान्निरग्निकस्यदिनयाम
राह्णस्पर्शाभावेमदन्यास्मिन्पक्षेतुपूर्वोदितसाग्निकवन्निर्णयोवोदि
तव्यः।स्त्रीशूद्रयोःकुतपव्यापिन्येवेत्याह।स्त्रीशूद्रेति।स्त्रीणांशूद्राणां
सदाकुतपएवोदितः।स्त्रीभिःशूद्रैःकुमुहूर्तकार्येतिलौगाक्षिवचनात्
दिनद्वयेकुतपाभावेशारद उदितोऽपराह्णःकथितः।अपराह्णोऽथ
शरादितश्रुतेः।वादिदिनद्वयेकुतपकालव्यापीदर्शस्तदास्त्रीशूद्रै ५२
रुत्तरःकार्यः।अत्रसर्वास्मिन्विषयेक्षयदर्शसाम्ययत्क्वाथितंतत्

का॰ ति सात्सदा ॥ मध्याह्नात्तू घटिकाद्वयं यदधिका च स्यात्तदान्वाहित
५२ यागश्चान्यदिने पराह्णविषयेऽमी लेख्य इष्टीक्षणं · ६५ ॥ आप
स्तंबवनवाश्वलायनयूनि वैवापरेषां केचिद्घाटिः प्रतिपालयेः
क्षयतोर्थैन्यस्य दर्शांतिके ॥ निष्क्रास्येव च निर्णये अपाल्पीद्राहे
१६।१५।१४ गुरुर्मध्यमो हीनोऽत्यष्टिके विश्ववासरभवो युगः। १२।१३।
कदाचिन्नहि ॥ ६६ ॥ चतुर्णां व्याख्या। पूर्वेलोत्यपादः प्रतिपदस्त्रयो
द्वय एवं चतुः पादेन्मितो यागकालः। स चेज्ज्ञातव्या सियुतः प्रातः का
लव्यापी स श्रेष्ठः। तदुक्तं। पूर्वेणायश्चतुर्थांशः आद्याः प्रतिपदस्त्रयः। या
गकालः स विज्ञेयः प्रातरुक्तो मनीषिभिरिति। मध्याह्नवान्तस्तूर्वतः पर्वप्रति ५२

पत्संधौ निर्णयमाह। दिनार्धसमय इति। अत्र पर्वणः संधौ दिनार्धसमये सति
वा तत्स्पूर्वतो मध्याह्नात्स्तूर्वतः संधौ सति तद्दिने यागः इष्टः। आद्य दिनेऽन्वाधान
मुक्तं। तथा च लौगाक्षिः। पूर्वाह्णे वाथ मध्याह्ने यदि पर्व समाप्यते। उपोष्य तत्र पू
र्वेद्युस्तदहर्याग इष्यते। आवर्तनात्तु पूर्वाह्णो ह्यपराह्णस्तथापरः। मध्याह्नस्तु
तयोः संधिर्यदावर्तनमुच्यते। अत एव गोभिलः। आवर्तनेयदा संधिः पर्वप्रतिपदो
र्भवेत्। तदहर्याग इष्येत परतश्चेत्परेहनि। पर्वप्रतिपदोः संधिरवागावर्तनाच्च
दि। तस्मिन्नेवाहनि यष्टव्यं पूर्वेद्युस्तदुपक्रमः इति एतादृशे विषये पर्वचतुर्थांशोप
गारंभः कर्तव्यः। परंतु पर्वमध्ये न समापनीयः। किंतु प्रतिपदि प्रविष्टा
यां समापनं कर्तव्यं। तथा च प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यते। पुनः
प्रणीय कर्तव्येष्टिः कर्तव्या याग एव तेन मेति। गार्ग्योक्तेः। रात्र्यपराह्णयोः संधौ नि
र्णयमाह। यदा वृद्धिविषयसाम्यविषयवा रात्र्यपराह्णयोः संधिर्भवति तद

का.सि संधिदिनेन्वाधानं परेद्युरिष्टिरिति ॥ अपराह्णे थवा रात्रौ
५४ यदि पर्व समाप्यते ॥ उपोष्य तस्मिन्नहनि स्वो भूते
यागइष्यतइति ॥ इदमपराह्णसंधिशास्त्रं वृध्यादि
नासवकाशं ग्राह्यं ॥ ६३ ॥ क्षये विशेषमाह क्षय
तः पराह्ण इति ॥ क्षयतः क्षयवशात् ॥ अपराह्णवि
षये संधिश्चेत्तदाद्यदिनेन्वाधानं यागस्तस्मिन्दि
न इति ॥ प्रतिपच्चतुर्थांशे यागनिषेधात् ॥ न यष्टव्यं च
तुर्थांशे यागः प्रतिपदः क्वचित् ॥ रक्षा ॥ सितद्विलुपानि ५४

तत्पक्षतेः प्रतिपद एवेष्यते ॥ ६४ ॥ इति दर्शाद्याधाननिर्णयः ॥ ॥ अथेष्टि
निर्णयमाह ॥ पर्वसंधिरथ त्रयः प्रतिपदो यागस्य कालः स्मृतः
प्रातर्व्याप्तियुतो दिनार्धसमये तत्पूर्वतः पर्वणः ॥ संधौ तद्दिन इष्टि
राद्यदिवसेन्वाधानमुक्तं यदा संधौ रात्र्यपराह्णयोरिह तदान्वा
धानमिष्टिः परे ॥ ६५ ॥ वृद्धिश्चेत्क्षयतः पराह्णविगमेन्वाधानमा
द्ये दिने यागस्तत्र च पर्वनिर्णय इति प्रोक्तश्च राका तिथिः पूर्वा संग
वतः पुरा दिनदलाद्राका क्षये तत्क्षणं सान्वाधानयजिः पुराह्णवि
षये राकाक्षये खर्विका ॥ ६६ ॥ स्या[illegible]ध्यंदिनशाखिनां तु तमि
हान्यां समन्याजिवासरे दर्शेष्टिः परतो नवेष्टिरुदिता प्राक्पौर्णमा

नोच्यते अन्वाधानं। अन्यस्मिन्वासरे यजिर्याग इति। तथा च भाष्यसंग्रहः।
माध्यंदिनात्स्यादहनीह यस्मिन्नाक्पर्वणः संधिरिति तिलीया। सारव
विकावाजसिनेयिमान्यालस्यामुपोष्याथपरस्युरिष्टिरिति। अथनव
ष्टिः॥ दर्शेष्टिर्द्वितीयागतूपरतः पौर्णमासाद्याग्रयणेष्टि
दिताप्रोक्ता। तथा च वार्तिककारः। यजसूर्यपौर्णमासादूर्ध्वं दर्शान्नवेज्य
षयेति। आवर्तनाद्दूर्ध्वं दर्शान्नवेज्ययेति। आवर्तनीदूर्ध्वं अपरा
ह्णप्राक्सधो निर्णयमाह। मध्याह्नात्तु घटिकाद्वयमिति। यद्यपराव
ह्नेसत्यां मध्याह्नात्परतो घटिकाद्वयं राका तिथिरधिका तदा त्रैतेव
अन्वाधानं कार्यं अन्यस्मिंदिने यागः। परतश्चेत्सरहनीति पूर्वेदा ५५

हृतवचनात्॥ अथापस्तंबाश्वलायनव्यतिरिक्तविषयचंद्रदर्शनदिनयागनिषे
धस्यमन्यतेतदाह॥ यदापराह्णविषये अमांतेसति श्चंद्रेक्षणं स्याच्चंद्रदर्शनंस्यां
तदाऽपस्तंबभवा आपस्तंबायना आश्वलायनाश्च तेषां तदा चंद्रदर्शनदिने यजि
योगोनान्येषामिति॥ आपस्तंबसूत्रभाष्यार्थसंग्रहकारोपि पूर्णमासीवेदवामा
वास्यानिर्णयमाह॥ अपराह्णे पवोरात्रौ यदि पर्वसमाप्यते॥ उपोष्यात्तत्रराका
स्यात्सा पूर्वोह्ऽसर्पिलक्षणा॥ पूर्वाह्णेपेवोमाध्याह्ने यदिपर्वसमाप्यते॥ उपोष्यानुम
तीतत्रसाश्वः पूरितलक्षणेति पूर्णमासीनिर्णीता॥ एवममायामपि॥ अपराह्णेक्ष
पायांचयदिपर्वसमाप्यते। उपोष्यातुकुहूस्तत्र यदहर्नेतिलक्षणा॥ पूर्वाह्णे वाथ
मध्याह्ने पर्वसंधिर्यदाभवेत्॥ तत्रोपोष्यासिनीवाली श्वोनष्टस्वारलक्षणेति॥
संधिशास्त्रमेवैकं निर्णीय चंद्रदर्शनदिनयागनिषेधकानि तु श्रुत्यादिवचना
निसतिसंभवेन्येषां कानि॥ ननुविरोधते यवादवादकानीति सर्वेषामेवेति॥ के

काल·सि· विरुद्धा विसतिसंभवेन्येषां चंद्रदर्शनदिने योगो नैव। प्रायश्चित्तिस्मरणात्। तथा च
५६ कात्यायनः। यजनीये ह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते। तत्र व्याहृतिभिर्हुत्वा दं
डं दद्याद्द्विजातये। द्वितीया त्रिमुहूर्ता चेत्प्रतिपद्यापराह्निकी। अन्वाधानं चतु
र्दश्यां परतः सोमदर्शनात्। अर्वाग् त्समेपाघ्न द्वितीया तु प्रदृश्यते। तत्र याग
न कुर्वीत विश्वेदेवाः पराङ्मुखाः। चतुर्दशी चतुर्यामा अमावास्या न दृश्यं
ते। श्वोभूते प्रतिपच्चेस्यात् त्रयोदश्येव कारयेत्। इत्यादीनि चंद्रदर्शनदिनयागनि
कानि षेधवाक्यानि सतिसंभवे द्रष्टव्यानि संधिनिर्णयश्च तिथिसाम्ये यथास्थितस्यैव।
वृद्धिक्षयविशेषमाह। यावृद्धिरिति। प्रतिपत्तिथ्योर्वृद्धिरथवा क्षयः स्तोरवृद्धिक्ष
पयोरर्धं दर्शांतिके दर्शांतघटीषु न्यस्त्वा॥ शेषोन्यस्य पक्षये निष्कास्य पर्व निर्णयेत्॥ तथा
च लोगाक्षिः। स्तिथेः परस्य घटिकास्तु याः स्युन्यूनास्तथाभ्यधिकाश्च तासां। अर्धं वियोज्य च
तथा च योज्य पंक्त्या से चरस्योप्रथमे दिने तत्॥ कात्यायनोपि॥ परेह्नि घटिका न्यूनास्तथैव ५५

श्रुतिरेषा सनातनी। क्षये परा त्रिसंध्येपि परदिने चंद्रदर्शनेपि प्रतिपद्येव याग
इति निश्चयान्न तत्र विचारः। अपराह्णे थवा रात्रौ वृत्तिपूर्वोदाहृतवचन
त्। इति सामान्यतः पर्वनिर्णयः। अथ परत्र काविशेषनिर्णयः। यश्चाह स्संग
व इति। दिनदलान्मध्याह्नात्पुरा प्राक्। संगवतः पश्चात्परतो राकाक्षये स
ति लक्षणे सद्यः कालीना। सा न्वाधानयागौ। अन्वाधानेन सहिते
एव यागः कर्तव्य इति। तथा च कात्यायनः। संधिश्चेत्संगवादूर्ध्वं प्राक्
दावर्तनाद्रवेः। सा पौर्णमासी विज्ञेया सद्यस्काल विधौ तिथिः। एतच्च
विधानं वैकल्पिकं। पराह्ण विषय इति। पुराह्णः पूर्वाह्णस्तत्र राकाक्षय
एव विकाः स्यात्। इह रवर्विकाया माध्यंदिन शाखिनां वाजसनेयि

न्यधिकाश्रयाः क्षिप्त्वा तदर्शपूर्वस्मिन्कालसंबन्धीं प्रकल्पयेत्। अथ यागावधिमाह॥ नृपतिथि
ति॥ पूर्वेष्टिदिनमारभ्य नृपतिथींद्राहेः नृपा षोडशतिथयः पंचदश॥ इंद्राश्चतुर्दश। एभिर्भिन्ना
न्यहनि ते यागे गुरुमध्यहीना भवति। षोडशादिने गुरुः। पंचदशदिने मध्यः। चतुर्दशदिने ही
नो याग उक्तः॥ तथा चापस्तंबः। षोडश हन्यभीष्टेष्टिर्मध्या पंचदशहनि। चतुर्दशे जघन्येष्टिः
पापा सप्तदशे हनीति। केचित्तु वाक्यमिदं मन्वाधाने वर्णयंति। यत्रोपवासथं कर्मयजनीया
त्रयोदशं॥ भवेत्सप्तदशं वापि तत्र यत्नेन वर्जयेदिति दर्शमाह। असृष्टिक विश्ववासस
भवः। असृष्टिः सप्तदश। तद्वासरभवः। विश्वे त्रयोदश। तत्र भवोपि यागः कदाचिन्नभव
त्येव। अयं त्रयोदशासप्तदशाहर्यागस्तु तदस्याद्यदा द्वितिथिक्षयो वा तिथिद्वयवृद्धिः स्या
त्। यद्यपि तदसंभवस्तथापि तद्वचनं। ऊने पंचदशी याज्यो समे याज्यास्तु षोडशी॥
ऊने वाप्यधिके वापि नेज्या सप्तदशी क्वचिदिति। आहिताग्नेः प्रवासस्थे तस्य पत्नी गृहे द
र्शयागादिस्त्विग्यादिना कारयेत्। तथा च लघुहारीतः॥ अमावास्यादिनियतं प्रोषिते ध
र्मचारिणी। पत्नी तु कारयेन्नित्यं मन्येनाप्यृत्विगादिनेति। अमावास्याद्यत्रादि पदं सांवत्स
रादिकं सर्वं पार्वणमिति शूलपाणिः॥ इति दर्शपूर्णमासेष्टिनिर्णयः॥ ६५॥ ५।

का॰सि॰ अथैकोद्दिष्टनिर्णयः॥ एकोद्दिष्टमहर्द्दले निगदितं पूर्णे द्विमध्याह्नगे स्वल्पे वा न हि तत्र चे
५७ द्वयसमवेतत्क्षये स्याद्दिमा॥ अब्दश्राद्धविधिर्दिनार्धसमयाद्यावत्सराह्णे द्व्यहाभावे प्रा
ग्बहुतास्पयोश्च बहुता शेषेषु देवोक्तवत्॥ ६७ ॥ व्याख्या॥ एकोद्दिष्टश्राद्धमहर्द्दले दिन
दले मध्याह्ने निगदितं॥ तथा च गालवः॥ आमश्राद्धं तु पूर्वाह्णे ऽपराह्णे पार्वणं स्मृतं। एकोद्दि
ष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमिति॥ द्विदिनविषये निर्णयमाह॥ द्वयोर्मध्याह्नयोः पूर्णव्या
प्तौ द्वयोः समांशेनैकदेशे व्याप्तौ वा द्वयोरव्याप्तौ वा तदग्निमतिथेश्चयसमत्वेतुमा ग्राह्या॥
क्षये तु पूर्वैव॥ विषमत्वे अधिका ग्राह्या॥ इत्येकोद्दिष्टनिर्णयः॥ अथाब्दिकनिर्णयः॥ आब्दश्रा
द्धविधिरिति। आब्दं भवमाब्दं श्राद्धं सांवत्सरिकं तस्य विधिः दिनार्धसमयात् कुतुपाद्दार
भ्य ऽपराह्णयावत् तावदाब्दश्राद्धं भवेदिति॥ अपराह्णव्यापिनी या पार्वणे सा तिथिर्भवेदिति।
द्विधा निर्णयमाह॥ द्व्यहाभावे प्रागिति। द्वयोरह्नोरपराह्णाभावे प्रागिति पूर्वैव तिथिर्ग्राह्या। तथा
च मनुः। न द्व्यह व्यापिनी चेत्स्यात् क्षताहस्य तु या तिथिः। पूर्वविद्धैव कर्तव्या त्रिमुहूर्तापि या
भवेदिति। बहुतास्पयोश्च बहुतेति। दिनद्वये विषमापराह्णे अधिकाया भवेत्सा ग्राह्या। शेषे दत्तात्रेय
षु पक्षेषु अदेवोक्तवन्निर्णयः॥ तथा च बौधायनः॥ अपराह्णद्वयव्यापिन्यतीतस्य च या तिथि ५७

थिः।क्षये पूर्वा तु कर्तव्या वृद्धौ कार्या तथोत्तरे।अतीतस्य मृतस्य।।तिथिद्वये समं तुः।
व्यहेतु व्यापिनी चेत्तस्या मृताहस्य तु या तिथिः।पूर्वस्यां निर्वपेत्सिंउानित्यं।गिरसभा
षलमिति।६७।।अत्राब्दिकं पार्वणमेकोद्दिष्ट विकल्पेन कर्तव्यमित्यंत आह।केश्चिदब्दे
डूमिदं सदैवमुद्दितं केश्चिद्द्विदैवत थाद्वौ श्राद्धमिदं चरेत्त्रिपुरुषं भाद्रासिते वादले।श्रा
द्धं चापरपाक्षिकमत्तु तिथिं १४ हित्वा चरेत्सत्यंह पंचम्यादिदिगाद्यष्टाक्ते विषये द्वै
पृथग्वा भवत्।६८।।केश्चिदिति।इदं सांवत्सरिकं श्राद्धं केश्चिदेतत्सदैवं पार्वणमुक्तं
तथा केश्चिद्दिदं विदैवमेकोद्दिष्टमुद्दिष्टं।तथान्वे स्मृत्यंतरे।वर्षे वर्षे तु कर्तव्या मातापि
त्रोस्तु सत्क्रिया।।अदेवं भोजयेच्छ्राद्धे पिंडमेकं तु निर्वपेदिति।।यमोपि।सपिंडीकरणादूर्ध्वं प्रतिसं
वत्सरं सुतैः।मातापित्रोः पृथक्कार्यमेकोद्दिष्टं क्षयेहनि।व्यासोपि पार्वणं प्रतिषेधयति।एकोद्दिष्टं प
रित्यज्य पार्वणं कुरुते यदि।अकृतं तद्विजानीयात्स भवेत्पितृघातक इति।जमदग्निस्तु पार्वणमाह।
आपद्यसहस्रेयं उत्त्वमोरसा।पिपिबत्सुतः।।कुर्वीत दर्शवच्छ्राद्धं मातापित्रोः क्षयेहनि।।शाता

तपोपि। सपिंडीकरणं कृत्वा कुर्यात्पार्वणवत्सदा। प्रतिसंवत्सरं विद्वान् छागलेयोदि
तं विधिरिति॥ सहसपिंडक्रियायां हि कृतायामस्य धर्मतः॥ अनयैवावृता कार्यं पिंडनि
र्वपणं सुतैः। एवं वचनप्रतिपन्नो दाक्षिणात्याव्यवस्थामाहुः॥ औरसक्षेत्रजाभ्यां पार्वण
मेव कार्यं। दत्तकादिभिरेकोद्दिष्टमिति॥ तथोक्तं। प्रत्यब्दं पार्वणेनैव विधिना क्षेत्र
जौरसौ। कुर्यातामितरे त्वेवमेकोद्दिष्टं सुता दशेति जातूकर्ण्येन। पाराशरेपि। पि
तुर्गतस्य देवत्वमौरसस्य त्रिपूरुषं। सर्वत्रानेकगोत्राणामेकोद्दिष्टं क्षयेहनीति।
देवत्वं गतस्य सपिंडीकृतस्य त्रिपूरुषं पार्वणं। औरसेन कर्तव्यं। अनेकगोत्राणां।
भिन्नगोत्राणां मातुलपितृव्यभ्रात्रादीनां आब्दमेकोद्दिष्टमेव। औरसस्य सपिंडीकरणा
दूर्ध्वमेकोद्दिष्टमुक्तं पैठीनसिना॥ एकोद्दिष्टं हि कर्तव्यमौरसेन मृतेहनि। सपिं
डीकरणादूर्ध्वं मातापित्रोर्न पार्वणमिति। केचित्तु साग्निकनिरग्निकविषयं व्य
वस्थापयंति। यथैव पर्वणि प्रकुर्वीत पार्वणं योग्निमान्द्विजः। पित्रोरनग्निमतोरन्यदेको

र्थमाह ॥ इति कृष्णपक्षश्राद्धनिर्णयः ॥ ६८ ॥ भाद्रपदापरपक्षश्राद्धनिर्णयमाह । भाद्रस्यापरपक्षकः पि
तृहितेः श्राद्धं समहत्त्वमपराकायां प्रपितामहस्य पितृतः श्राद्धं त्रयाणां भवेत् । पक्षत्यादि च पंचमी
प्रभृतितो २ष्टम्यादि दिक्तः ४ परदर्शांतं च चतुर्दशीं परिहृत्य प्रागुक्तपक्षं विना ॥ ६९ ॥ भाद्रस्येति । भा
द्रस्यापरपक्षकः भाद्रपदस्य कृष्णपक्षः । पितॄणां हितः प्रियः तत्र श्राद्धं पितॄणां महत्त्वसतये भव
ति ॥ ब्रह्माण्डपुराणे । कन्यागतसवितरि यान्यहानि तु षोडश ॥ क्रतुभिस्तानि तुल्यानि तेषु दत्तं तु
मथाक्षय्यमिति । राकायां प्रोष्ठपद्यां प्रपितामहस्य । पितृतः प्रपितामहात्परतः त्रयाणां श्राद्धं भवेत् ।
प्रपितामहस्य पितृपितामहप्रपितामहाः पाज्याद्युत्सर्थः । तेनांदीमुखाः । तदुक्तं ब्राह्मे । पितापित
महश्चैव तथैव प्रपितामहः ॥ त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः ॥ तेभ्यः पूर्वतरा ये च प्रजाव
तः सुखैधिनः ॥ ते तु नांदीमुखा नांदी समृद्धिरिति कथ्यते इति । हेमाद्रौ । नांदीमुखानामसत्यत्वं क
त्यारा । विगतरवौ । पौर्णमास्यां तु कर्तव्यं वराहवचनं यथेति । एतत्त्र्यवरामेत्युक्तः पक्षश्राद्धप
क्षे सकृन्मतालयः पक्षेऽप्यावृत्तपकमिति प्रयोगपारिजाते गार्ग्यः । पौर्णमासीषु सर्वासु नि
पिंडं पितृपातनं । वर्जयित्वा प्रोष्ठपदीं यथाहुरीस्तथैव संगतिः । अत्र मातामहादीनां श्राद्धं ५९

केचनेच्छंति । पितरो यत्र पूज्यंते तत्र मातामहादयः इति । तदयुक्तं । बहुसंमताभावात् ।
तत्र पक्षश्राद्धे चतुरः पक्षानाह । पक्षत्यादीति । प्रतिपदादिर्वा परं पंचम्यादिः अष्ट
म्यादिः दिक्तः परं दशमीपरतः दर्शांतमिति चतुर्षु पक्षेषु अनुवर्तते । एतदुक्तं
भवति । प्रतिपदमारभ्य दर्शांतं श्राद्धं प्रत्यहं कर्तव्यमित्येकः पक्षः । एवं पंचम्यष्ट
मीदशमीतो दर्शांतं श्राद्धं । तत्र प्रागुक्तपक्षः पक्षत्यादिस्तं विना । त्रिषु पक्षेषु च
तुर्दशीं त्यजेत् । एवं कृष्णपक्षप्रतिपदादिदर्शांतमिति पंचदशदिनात्मकः प्रथम
पक्षः । पंचम्यादिदर्शांतं चतुर्दशीं विना दशदिनात्मको द्वितीयः । अष्टम्यादिदर्शां
तं चतुर्दशीं विहाय सप्तदिनात्मकस्तृतीयः । दशम्यादिदर्शांतं चतुर्दशीं त्यक्त्वा
पंचदिनात्मकश्चतुर्थः पक्षः । चतुर्दशीवर्जनमनुः । कृष्णपक्षे दशम्यादौ वर्जयि
त्वा चतुर्दशीमिति । एते चत्वारः पक्षाः ब्रह्मपुराणे दर्शिताः । अश्वयुक्कृष्णपक्षे
तु श्राद्धं कुर्याद्दिने दिने ॥ त्रिभागहीनपक्षं वा त्रिभागं त्वर्धमेव वा । अथ

गुणितिकृष्णपक्षाद्यभिप्रायेण । तत्र भागहीनमितिपंचम्यादि । त्रिभागदशम्यादि । अ
र्धवेत्यष्टम्यादि । केचित्कृष्णप्रतिपदादिशुक्लप्रतिपदंतः षोडशदिनात्मकः पक्षउक्तः ।
अहः षोडशकं यत्तु शुक्लप्रतिपदा सहेति देवलवचनात् । अत्र केचिच्छुक्लप्रतिपदं विना
कृष्णप्रतिपदमारभ्य दर्शांतं तिथिवृध्या षोडशदिनात्मकं पक्षं मन्यते । अन्ये तु भाद्रप
दपौर्णमास्यादिदर्शांतं षोडशदिनात्मकं मन्यते ॥ ६९ ॥ प्रतिपदादिपक्षे सर्वत्र सपिंड
श्राद्धं स्यादत आह ॥ पक्षस्यादिप्रशिक्षयंतयजेनेन क्वापि चापिंडकं कुर्वीतैकदि
नेयदापि तात्मृतितिथ्यां न दाचारतः ॥ यद्येकत्र दिने शुभे पितृयजिस्यान्नंदादौ नरेवती
याम्यब्राह्मयमघासितारतपनानंदाश्चरिक्तास्तथा ॥ ७० ॥ व्याख्या ॥ पक्षस्यादिप्र
तिपदमारभ्य दर्शांतं श्राद्धं क्रियते तत्र क्वापि कुत्रापि तिथावपिंडं श्राद्धं न । तथा चोक्तं ।
नभस्यस्यापरे पक्षे श्राद्धं कुर्याद्दिने दिने । नैव नंदादि वर्ज्यं स्यान्नैव वर्ज्या चतुर्दशी इत
ति । अत्र केचित्सदाचारप्राप्तपितृमृतितिथिसमानजातीयायामेव चतुर्दशीं विनातस ७०

द्दिष्टं मृताहनीति सुमंतुवचनात् । तदपि संप्रतिपक्षत्वादुपेक्षणीयं । बहुसमयश्रयेवि
प्रायेण्वेकाग्न्य एव वा । तेषां सपिंडनादूर्ध्वमेकोद्दिष्टं न पार्वणमित्यादि । उभयोर्वचनविरो
धाद्व्रीहियवयोरिव पार्वणैकोद्दिष्टयोर्विकल्प एव वा । इदमेव सांवत्सरिकं दर्शे समाग
तं वा भाद्रापरपक्षे समागतं तदा सर्वो पित्रिपुरुषं पार्वणं चरेदिति । अमायां तु क्षयो य
स्य प्रेतपक्षेऽथवा भवेत् । पार्वणं तत्र कर्तव्यं नैकोद्दिष्टं कदाचनेति स्मरणात् । इति क्षया
हनिर्णयः ॥ अथ कृष्णपक्षश्राद्धनिर्णयः ॥ एकोमनुतिथी चतुर्दशी हित्वा सकला अ
परपक्षिकं श्राद्धं कृष्णपक्षश्राद्धं प्रत्यहं चरेत् । तत्र कात्यायनः ॥ अपरपक्षे श्रा
कुर्वीतान्यत्र चतुर्दश्याः । अशक्तविषये पक्षचतुष्टयमाह । पंचम्यादि । द्वितीयादिदशम्या
दि । दशम्यादिपक्षे मनुनोक्तं ॥ कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीं । श्राद्धप्र
शस्तास्तिथयो यथैता न तथेतराः ॥ दर्शोऽथवा भवेत् । दर्शे मावास्यायां । दर्श
श्राद्धास्यथवा कृष्णपक्षे द्वं श्राद्धं विकल्पेन भवेत् । केचिद्दर्शश्राद्धमेव चरिता

जनिः॥ अतो नैमित्तिकं श्राद्धं काम्यं यत्तु मघोडुनि। कुर्यात्तज्ज्येष्ठपुत्रस्य नाशः स्यादि
ति निश्चय इति। अत्रिरपि। महालयेक्षयाहे च दर्शे पुत्रस्य जन्मनि। तीर्थे च निर्वपे
त्पिंडान् रविवारादिकेष्वपि। बृहस्पतिरपि। तीर्थे संवत्सरे प्रेते पितृयोगे महालये।
पिंडदानं प्रकर्तव्यं युगादिभरणीमघे। इदं श्राद्धं मलेनैव कर्तव्यं। मृताहे च
सपिंडं च गयाश्राद्धं महालयं। आपल्लोपि न कुर्वीत श्राद्धमासेन कर्हिचिदि
ति गालवोक्तेः। अतो ह विस्तुतौ कस्मिंश्चिद्दिने कार्यमित्यत्राह। यद्येकत्रेति।
यद्यपरपक्षे पितृमृतिसमानतिथिविस्तुतौ तत्रैकस्मिन् शुभे दिने पितृयजिः
पितृश्राद्धं कार्यं। तदुक्तं नागरखंडे। आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवा
करे। यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे। तस्य संवत्सरं यावत्तृप्ताः स्युः
पितरो ध्रुवमिति। तत्र त्याज्यमेवाह॥ त्याज्येति। नदा रेवती। याम्यं भरणी। ब्रा
ह्म्यं रोहिणी। मघा। सितः शुक्रवारः। आरो भौमः। तपनो रविवारः। नंदाः प्र ६९

तिपत्षष्ठ्येकादश्यः। रिक्ताश्चतुर्दशी। एता वर्ज्याः। तदुक्तं नारदसंहितायां। न नंदासु
भृगोर्वारे रोहिण्यां च त्रिजन्मसु। रेवत्यां च मघायां च कुर्याद्दापरपाक्षिकमिति।
स्मृत्यंतरेपि। भानौ भौमे त्रयोदश्यां नंदाभृगुमघासु च। पिंडदानं मृदा स्ना
नं न कुर्यात्तिलतर्पणमिति। गार्ग्योपि। नंदायां भार्गवदिने त्रयोदश्यां त्रिजन्म
सु। एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयादित्यादीनि वाक्यानि तानि मृताहस
मानतिथिव्यतिरिक्तैकदिनश्राद्धविषयाणि। अत एव पृथ्वीचंद्रोदये। सकृन्म
हालये काम्ये पुनः श्राद्धे खिले तथा। अतीतविषये चैव सर्वमेतद्विचिंतयेदिति
७०॥ अथ चतुर्दशीश्राद्धमाह॥ अतोद्ध्वं विषाहिशस्त्रकृतभुक्तौ यस्य हे
विद्युता लाभावेन च दंष्ट्रिशृंगिनखिभिर्भृत्तहापतितः॥ ये प्राप्तानि धनं तु
दापरदले भूते १४ प्यदेयं चरेद्दते तां जनकस्य चैवमुभयत्र तातकेपि त्र्यं॥७१॥
व्याख्या॥ अतो ग्रहादिः। उद्धं धनं निगडादिबंधनं। विषंगरदानं। द्विधे स

का.सि. पदंष्ट्राः कृतभुग्वाग्निदाहो दिव्यादिः॥ तयमऽजनं ग्रहः ग्रहादिना गृहीतः। विद्यु
६२ तो विद्युत्संपातेन। अन्नाभावेन। धान्यासाध्या। दंष्ट्रिभिः श्वभिः। शृंगिभिर्महिषा
दिभिः। नखिभिर्व्याघ्रादिभिः भुजंग सर्पः पर्वतप्रस्थं तत्संपातः। एभ्यो निमि
त्तेभ्यो ये निधनं मरणं प्राप्तास्तेषां श्राद्धं भाद्रपदापरदले भूते चतुर्दश्यां ओदनमे
कोद्दिष्टं चरेदिति। शस्त्रशस्त्रहतस्यैव चतुर्दश्यां महालये इति कालादर्शोक्तेः। श
स्त्रहतस्य चतुर्दश्यामिति कात्यायनः। यज्ञवल्क्योपि। प्रतिपत्प्रभृतिष्वेकां वर्जयि
त्वा चतुर्दशीं। शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयत इति। तत्र चतुर्दश्यामेको
द्दिष्टविधानात्कर्तव्यं। तथा च गार्ग्यः॥ चतुर्दश्यां तु यच्छ्राद्धं सपिंडीकरणात्परं।
एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिन इति। ब्रह्मपुराणेपि। प्रायोनशा इत्त
नशस्त्राग्निविषाद्यैर्धर्मतिना तथा। चतुर्दश्यां तु कर्तव्यं पित्रर्थमिति निश्चयः। ६२
नागरखंडेपि। येषां तु शस्त्रमृत्युः स्यात् दपमृत्युरथापि वा। उपसर्गान्मृतानां च

क्षांतर्गततिथौ निषेधप्रयोजकयुक्तायामपि सकृत्पक्षे सकलदेशीयाः शिष्टाः महाल
यश्राद्धं कुर्वंतीत्याह॥ कुर्वीतैकदिनेष्विति। यदा एकदिने श्राद्धं कुर्वीत तदा यस्यां तिथौ पि
तृमृतिं तत्समानजातीयतिथौ कार्यं। तदुक्तं निर्णयदीपिकायां। आषाढ्याः पंचमे प
क्षे कन्यासंस्थे दिवाकरे। मृताहनि पितुर्यो वै श्राद्धं दास्यति मानवः। तस्य संवत्सरं
यावत्संतृप्ताः पितरो ध्रुवमिति। नागरखंडेपि। या तिथिर्यस्य तातस्य मृता हेतु प्रवर्त
ते। सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः। तिथिच्छेदो न कर्तव्यो विनाशोचंय
दृष्ट्या। पिंडश्राद्धं च कर्तव्यं विच्छेदं नैव कारयेदिति। अत्र मघाभरण्यादेर्न निषे
धः। तदुक्तं प्रयोगपारिजाते। अमापाते भरण्यां च द्वादश्यां पक्षमध्यगे। तिथिवारं
च नक्षत्रं योगं च न विचारयेदिति। महालयांतर्गतभरण्यां च मृतनिमित्तं श्राद्धं [illegible]
महाफलमुक्तं मत्स्यपुराणे। पितृपक्षे तु भरणी महती परिकीर्तिता। तस्य श्राद्धं
कृतं येन स गयाश्राद्धकृद्भवेदिति। भरण्यादिकाम्ये पिंडनिषेधः॥ काशी

विषमस्थेषु पुत्रेषु । सर्पव्याघ्रहतानां च मृतस्योद्बंधनैरपि । आसंतेषां प्रकर्तव्यं च
तुर्दश्यां नराधिप । अपमृत्युरकालमृत्युः उपसर्गोऽमरणं पक्षिभिर्हता द्वपुरुषाणा
नां । मरीचिरपि । विषसर्पश्वापदादिहि तिर्यग्ब्राह्मणघातिनां । चतुर्दश्यां क्रिया
कार्या येषामन्येषु विगर्हितः । अन्ये तु अपि । वृक्षारोहणलोहाद्यैर्विद्युज्ज्वालाविषा
दिभिः । नखिदंष्ट्रिविनिपातानां तेषां प्रोक्ता चतुर्दशीति । चतुर्दश्यां पितुरेकोद्दिष्ट
रुते पितामहादित्रयस्य धर्महालयगते कतिथ्यां पूर्वेणं कर्तव्यं । स चेच्छस्त्रादिह
तस्तत्र व्यवस्थामाह । एतेषामिति ॥ एतेषां शस्त्रतो हतविषादिमृतानां जनक
स्य पितुर्मरणे एव मृत्युभयमेकोद्दिष्टं कोद्दिष्टं कार्यं । अन्यसंततेरपि । एकस्मिन् द्वयो
र्वैकोद्दिष्टविधिः । प्रपितामहोपि शस्त्रादिहतस्तदेकोद्दिष्टत्रयं कर्तव्यमिति मा
धवः । तेनोक्तं तत्तातकेपि त्रयमिति ॥ ७१ ॥ चंद्रिकाकारापरार्के हेमाद्रिप्रभृतिभि
रुक्तं पार्वणमेवोक्तं तदाह ॥ ॥ उर्मत्युं त्रितयेगते निगदितं केचित्तदा पार्वणं भवेत

का॰सि॰ वा मृतिवासरे स्मरतिथौ पुत्रोज्झिते पार्वणं। कुर्यादत्र न चैकवर्गयजनं सर्वोन्वि
६३ त्तन न च ये केचित्सपिंडविवर्जितं निगदितं तत्काम्यमन्ये ॥ ७२ ॥ मृते दर्श
तिथौ मृताहविषयं श्राद्धं न माहालयं निःपुत्रप्रतिनिर्धवाऽग्निरहिता श्राद्धं
प्रकुर्युः कुहौ॥ चत्वार्येव च पार्वणानि विधवा श्राद्धे स्वभर्तुर्यजेद्दत्तौ दत्रि
तयं स्वतातजननीमातामहादीनपि॥ ७३ ॥ दुर्मृसुमिति॥ त्रितये पितृ
पितामहप्रपितामहे दुर्मृसु दुर्मरणं गते प्राप्ते केचित्सार्वणमुक्तं। तत्कर्तव्यं।
मृते चतुर्दश्यां मृतिवासरे मृततिथौ वा कर्तव्यमित्यर्थः॥ सहगमनादौ वैध
मरणेपि न चतुर्दशी श्राद्धं। युद्धमरणे प्रायोपवेशने वैधमरणे च वचनाच्च
तुर्दशी श्राद्धं भवत्येव। अवैधमरणे नायं नियम इति केचित्। तथा च। जला
ग्निभ्यां विपन्नानां सन्यासे वा गृहे पथि। श्राद्धं कुर्वीत तेषां वै वर्जयित्वा चतुर्दशी ६३
मिति शाकटायनवचनात्। जलाग्निभ्यामिति विवाहितप्रायश्चित्तार्थं जलाग्नि

ष्टपुत्रस्य निश्चितमिति मघायुगादेरभरण्यां न कुर्यात्पिंडपातनं। अज्ञानात्कुरुते य
स्तु ज्येष्ठपुत्रो विनश्यतीत्यादीनि निषेधवाक्यानि तानि काम्यपराणीत्याहुः।
अन्ये स्तत्काम्यमिति निगदितं। यन्मघाश्राद्धं त्रयोदशीश्राद्धं काम्यं तत्र पिंडदानं
निषिध्यते। तत्र कारणं। जनिः। सतैनैमित्तिकाब्दश्राद्धं काम्यं यत्र मघोडुनि। कु
र्यात्तज्ज्येष्ठपुत्रस्य नाशः स्यादिति निश्चय इति। अस्मिंस्त्रयोदशीश्राद्धे पिंडदा
ने द्विजभोजने च मधुयुक्तं केवलं फलमुक्तं। तथा च यमस्मृतिः। गाथास्तत्र पितृ
भिर्गीताः कीर्तयंति पुराविदः। अपि नः सकुले भूयाद्यो नो दद्यात्त्रयोदशीं। पाय
सं मधुसर्पिर्भ्यां वर्षासु च मघासु च। मनुरपि। यत्किंचिन्मधुना मिश्रं प्रदद्या
त्तु त्रयोदशीं। तदप्यक्षय्यमेव स्याद्वर्षासु च मघासु चेति। प्राक्छाये कुंजरस्य चे
ति वा पाठः। अथ महालयं। महालये भवं महालयं। तत्पुत्रवता भर्तृतते चेतुर्द
श्यां॥ दर्शतिथावमावास्यायं न कर्तव्यं॥ निःपुत्रादीनां प्रतिप्रसवमाह॥ निःपु

त्रोऽपुत्रः। व्रती ब्रह्मचारी। निर्धवा विधवा। अग्निरहितो निरग्निकः। एते कुहो दर्शे
श्राद्धं कुर्युः। तथा च प्रयोगपारिजाते। अपुत्रो नग्निकश्चैव विधवा ब्रह्मचारिणः।
दर्शे महालयं कुर्युर्न कुर्यात्पुत्रवान्नहीति॥ अथ विधवाश्राद्धं॥ विधवा स्वभर्तुः श्रा
द्धे चत्वारि पार्वणानि यजेत्॥ तानि यथा। एकं भर्त्रादि। भर्ता। तत्पिता। तत्पिताम
हांतं १ द्वितीयं स्वजनितादि २ तृतीयं स्वजनन्यादि ३ चतुर्थं स्वमातामहादि ४ एतत्पा
र्वणचतुष्टयं भर्तृश्राद्धं कुर्वंत्या विधवया महालये योज्यं॥ स्मृतिसंग्रहे। चत्वारः पा
र्वणाः प्रोक्ता विधवायाः सदैव हि। स्वभर्तृश्वशुरादीनां मातापित्रोस्तथैव च॥ त
तो मातामहानां च श्राद्धदानमुपक्रमेदिति। अशक्तौ तु स्मृतिरत्नावल्यां। स्वभ
र्तृप्रभृति त्रिभ्यः स्वपितृभ्यः स्तथैव च॥ विधवा कारयेच्छ्राद्धं यथाकालमतंद्रि
तेति ७३ अथ दौहित्रश्राद्धमाह॥ जाते तिष्ठति बालकस्य कथितं मातामह
स्त्रियं श्राद्धं चाश्विनपक्षतौ परदलं श्राके पिनाति क्रमेत्॥ प्रोक्तं पार्वणकं हि

का॰सि
६५

मासिकविधोचेद्द्वदीनंतदाप्येकोद्दिष्टविधानतोऽपरदलस्याऽमासमोनिर्णयः ७४
तातइति॥तातेपितरितिष्ठतिजीवतिसतिअनुपनीतस्यापिबालकस्यआश्वि
नपक्षतोशुक्लप्रतिपदिमातामहादित्रयश्राद्धंकथितं॥तथाचवसस्प्रतः॥माता
महोविपद्येतयदिचेसुत्रवानपि॥कुर्यान्मातामहश्राद्धंयावद्वर्ततेपिता॥प्र
तिपद्याश्विनेशुक्लेवर्तमानेपिमातुले॥दौहित्रःकुरुतेश्राद्धंसपिंडंपार्वणेनच।
च्यावृः॥जातमात्रोपिदौहित्रोविद्यमानेपिमातुले।कुर्यान्मातामहश्राद्धंप्रतिप
द्याश्विनेसिते॥दौहित्राख्यंचयच्छ्राद्धंकचिदृष्टोपप्रचक्षते॥सर्वत्रनायमभ्या
रोवदंतिमुनयोहितत्॥तत्रप्रतिपत्संगवस्पर्शिनीग्राह्या॥निर्णयदीपे॥प्रति
पद्याश्विनेशुक्लेदौहित्रस्त्वेकपार्वणं॥श्राद्धंमातामहंकुर्यात्सपितासंगवेस
दिति॥जातमात्रेपिदौहित्रेजीवत्यपिचमातुले॥प्रातःसंगवयोर्मध्येआर्यास्त्वप्र
तिपद्भवेदिति॥अत्रसम्मूलंविमृश्यं॥इतिदौहित्रश्राद्धं॥हारिद्रोणाप्यपर ६५

प्रवेशेनमरणमितिकालनिर्णयस्यक्लिरुक्तं॥अथत्रयोदशीश्राद्धमाह।पुत्रो
क्लिन्नेमृतेपार्वणंकुर्यात्॥तथाचस्मृत्यंतरे।नैवत्रयोदशीश्राद्धंपुत्रवान्यःसुतायुषे।
एकस्यैवनकुर्यात्सपार्वणंतुसमाचरेदिति।यत्तु।अपुत्रायेमृताःकेचित्स्त्रियोवा
पुरुषास्तथा।तेषामपिचदेयंस्यादेकोद्दिष्टंनपार्वणमित्यापस्तंबवचनेन।तथा॥
सपिंडीकरणादूर्ध्वंपित्रोरेवहिपार्वणं।पितृव्यभ्रातृपुत्राणामेकोद्दिष्टंनपार्वण
मितिकात्यायनवचनेनचयाप्राप्तमेकोद्दिष्टंतद्बाधनार्थमेतत्पार्वणविधानमिति
भावः।अत्रत्रयोदशीश्राद्धेएकवर्गयजनंकुर्यात्।किंतुसर्वानशेषान्पितृन्यजेत्
सर्वानितिपितृपक्षीयाणांमातृपक्षीयाणांसर्वेषांयजनंकुर्यादितिभावः।तथाच
कार्ष्णाजिनिः।श्राद्धंनैवैकवर्गस्यत्रयोदश्यामुपक्रमेत्।नतृप्तास्तत्रयेयस्यप्रजां
हिंसंतितस्यते।तत्रत्रयोदशीश्राद्धंकेश्चित्सपिंडविवर्जितंनिगदितं।तथाचज्योति
र्बृहस्पतिः।कृष्णपक्षेत्रयोदश्यांयःश्राद्धंकुरुतेनरः।पंचत्वंतस्यजानीयाज्ये

पक्षेशाकेनाप्येकस्मिंदिनेश्राद्धंकार्यमित्याह॥परदलमिति।परदलंभाद्रपदापर
पक्षःशाकेनापिनातिक्रमेत्॥शाकेनापिकार्यंपरपक्षमतिक्रमेदितिकात्यायनो
क्तेः।आदित्यपुराणे॥प्रावृषींतमयःप्रेतान्पितॄंश्चैवमहालये।विसर्जयतिमानुष्ये
कृत्वाशरत्येस्वकंपुरं॥क्षुधार्त्ताःकीर्तयंतस्तेदुःखितंस्वसुतंस्वयंकृतं॥कांक्षितंपुत्रपौत्रे
भ्यःपायसंमधुसंयुतं॥तस्मात्तांस्तत्रविधिनातर्पयेत्पायसेनतु।मध्वाज्यतिलमि
श्रेणतथाशीतेनपायसा॥ग्राममात्रंपरंलब्ध्वेद्दतयःप्राप्नुयान्नरः॥भिक्षामात्रे
णयःप्राणान्संधारयतिवास्वयं॥योवासंधारयेद्देहंप्रत्यहंस्वालभविक्रयात्॥
श्राद्धंतेनापिकर्त्तव्यंतैस्तैर्द्रव्यैःसुसंचितैरितिवचनादकरणेप्रत्यवायः॥अथ
मासिकश्राद्धमाह॥प्रोक्तंपार्वणकमिति॥मासिकंश्राद्धेपार्वणंप्रोक्तमेकोद्दिष्ट
मपि।सपिंडीकरणादर्वाक्कुर्वन्श्राद्धानिषोडश।एकोद्दिष्टविधानेनकुर्यात्सर्वाणिता
न्यपि।सपिंडीकरणादूर्ध्वंयदाकुर्यात्तदापुनः।प्रत्यब्दंयोयथाकुर्यात्तथाकुर्यात्स
तान्यपीतिपार्वणैकोद्दिष्टव्यवस्था।परदलस्यभाद्रपदापरपक्षस्यनिर्णयोमासस्समोजे

का॰नि ६६ क्षः। अनंतभद्यां। मन्वाद्यास्तु युगाद्याश्च प्रेतपक्षेऽष्टकासु च। आक्षेषु दर्शवत्कुर्यात्तिथ्या
दिष्वेवमेव हि। महालयस्य पक्षस्य अष्टकानामपि स्मृतमिति। इत्यपरपक्षनिर्णयः॥
७४ अथ षोडशश्राद्धानिर्णयमाह॥ मासेषु द्वादशसु त्रिपक्षक ऊनताद्यांगांस मासेषु
नितेष्वेकाहात्रिदिनैश्च षोडश मृतेः श्राद्धानि पक्षद्वये। मासाद्यं तु स भवेस्युरादिम
मृते रुद्राह्नि वा द्वादशे स्यादाद्यं चरमे मृते नदुदितं मासांतकाले खिलं॥ ७५ ॥शक्त
श्चेन्नाहितद्वयं द्वयमनु प्रारंभकालेथवा यद्वा द्वादशवासरेऽथ सकलान्यैकाह्नि
वातान्यपि॥ दाहाहादित आहिताग्निषु भवेच्छ्राद्धं त्रिपक्षांतकं प्रोक्तं वह्नि विही
नकस्य मरणाहात्कुर्याद्वदेत्तथा॥ ७६ ॥द्वयोर्व्याख्या॥ मृतेः प्राणिनो मर
णतः द्वादशसु मासेषु मासेषु ऊनानंतरत्रिपक्षके॥ चपरं॥ एकाह्नात्रिदि
नै रूनितेषु आद्यांगांस मासेषु मासाद्योस्य भवे पक्षद्वये षोडश श्राद्धा ६६
नि स्युः॥ आद्यः प्रथमः॥ अंत्यः षष्ठः॥ अत्यो द्वादशस्तेषु॥ तथा

का॰नि॰
६७

मुद्दिष्टं॥ तद्यथा॥ प्रथममासे एकेनाह्ना त्रिभिर्वा न्यूनेन्यूनमासिकं। प्रथममासांते प्रथम
मासिकं २ त्रिपक्षांते त्रिपक्षिकं ३ द्वितीयमासांते द्विमासिकं ४ एवं द्वितीयचतुर्थपंच
ममासांतेषु ५।६।७ ज्ञेयं॥ एकदिनेन त्रिभिर्वा न्यूनेषु षण्मासेषु न षण्मासिकं ८ एवं
षष्ठांते षष्ठं ९ ततः सप्तमाष्टमनवमदशमैकादशांतेष्वेवमेव १०।११।१२।१३।१४ ज्ञेयं
एकेन वा त्रिभिरूनेऽब्दे ऊनाब्दिकं १५ द्वादशांते आब्दिकं १६ तत्र ऊनश्राद्धे वर्ज्यान्या
ह गार्ग्यः॥ नंदायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे॥ ऊनश्राद्धं न कुर्वीत गृही पुत्रधनक्षया
दिति॥ ऊनेष्वेव कल्पिककालमाह॥ एकद्वित्रिदिनैरूने त्रिभागेनाधिकेन वा॥ श्राद्धान्यूना
ब्दिकादीनि कुर्यादित्याह गौतमः॥ ऊनमासिकेऽप्येव कल्पिककालमाह गालवः॥ मरणाद्द्वा
दशाहे स्यान्मासे न्यूनेऽथ चोनमासिकमिति॥ एतानि षोडशश्राद्धानि सपिंडीकरणात्प्रागेकोद्दि
ष्टविधानेन कुर्यात्संवत्सरे सपिंडीकरणशक्तेः श्रेयः॥ तथा च॥ सपिंडीकरणादर्वाग्यानि श्रा
द्धानि षोडश॥ एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तान्यपीति॥ अशक्तविषये कालमाह॥ नही
ति॥ यदि संवत्सरे सपिंडीकरणं प्रतिमासं श्राद्धाशक्तस्तदा सतु प्रारंभकाले श्राद्धद्वयं द्वयं
कर्तव्यं॥ ऊनमासिकोनषाण्मासिकोनाब्दिकानि तु यथास्थानं कर्तव्यानि॥ संवत्सरे सपिंडीक
रणाशक्तं प्रत्याह॥ यद्वेति॥ अथवा द्वादशाहे सकलानि षोडशश्राद्धानि निर्वर्त्य ६७

ततः सपिंडीकरणं॥ अथवा एकाह्नि एकदिवसे एकादशे द्वादशे वा सर्वाणि षोडशश्रा
द्धानि कृत्वा सपिंडीकरणं कुर्यात्॥ तत्र मरीचिः॥ मुख्यं श्राद्धं मासि मासि अपर्या
प्तावृतुं प्रति। द्वादशाहेन वा कुर्यादेकाहे द्वादशाथ वेति। अपर्याप्ताविति। प्रतिमा
सं श्राद्धासामर्थ्ये द्वादशाहेनेति द्वादशाद्दिनैः सर्वाणि कुर्यात्तदुत्तरदिने सपि
डीकरणं। द्वादशदिनेषु श्राद्धविभागमाह स्वित्थं। तत्रैकादशाहे आद्यं॥ १ तदुत्तरदि
ने ऊनाद्यं २ द्वितीयं च। ३ तदुत्तरदिने त्रिपाक्षिकं तृतीयं च ४।५ तदुत्तरदिने चतुर्थं ६४
तदुत्तरदिने पंचमं ७।८ तदुत्तरदिने षष्ठं ९।१० तदुत्तरदिने ऊनषाण्मासिकं सप्तम
मासिकं च। ११।१७ तदुत्तरदिनेऽष्टमं। ११।८ तदुत्तरदिने नवमं १२।९ तदुत्तरदिने
दशमं १३।१० तदुत्तरदिने एकादशं १४।११ तदुत्तरदिने द्वादशमूनाब्दिकं च १५।१६।
स्थानि। द्वादशदिनैः षोडशश्राद्धानि निर्वर्त्य तदुत्तरदिने सपिंडीकरणं कार्यं। अथैवैकस्मिन्दि
ने षोडशेति। तत्रस्याः श्राद्धषोडश्याः आहिताग्निनिरग्निकव्यवस्थामाह। दाहा
हादिति। आहिताग्निषु त्रिपक्षांतं श्राद्धं दाहाहादिति दाहदिनादारभ्य भवेत्॥

तदूर्ध्वंमरणादिनादिति।तथाचवह्निविहीनस्यानग्निकस्यतथागृह्यवह्नेरावस
थ्याग्नेर्मरणाहात्‌मरणादिनादारभ्येत्यर्थः।तथाचछंदोगपरिशिष्टे।श्राद्धम
ग्निमतःकार्यंदाहादेकादशेहनि।ध्रुवाणीतिप्रकुर्वीतप्रमीताहनिसर्वदेति।
अग्निमतइतिबह्वग्निकस्यैव।अतएवशंखः।मरणादेवकर्त्तव्यंसंयोगोयस्य
नाग्निभिः।दाहादूर्ध्वमशौचंस्याद्यस्यवैतानिकोविधिरिति।ध्रुवशब्देनत्रि
पक्षादूर्ध्वंगृह्यते।तथाचोक्तं।ऊर्ध्वंत्रिपक्षाद्यच्छ्राद्धंमृताहन्येवतद्भवेत्।अ
धस्तुकारयेद्दाहाद्दाहिताग्नेर्द्विजन्मनइतिजातूकर्ण्यवचनात्‌।इतिषो
डशश्राद्धनिर्णयः॥७६॥ ॥अथसपिंडीकरणनिर्णयमाह॥ ॥रुद्रे११
र्केहनि१२वाऽहिताग्निकसपिंडीकारकः।साग्निकस्तत्रैकादशवासरे
यदिनवेद्दशेऽन्यथाद्वादशे॥कर्त्तानग्निरथत्रिपक्षसमयेद्वावग्निहीनो ६८
लदाब्दांतेकादशाषड्द्विमासविगमेकर्हित्रिपक्षेथवा॥७७॥मांगल्येसमये
शुभस्यपुरःकृत्वोदितांषोडशींकालाकर्षणकेनुमासिकमथोकुर्यात्सपिंडक्रियां॥

चब्रह्मपुराणे॥द्वादशेहनिमासेवात्रिपक्षेचततःपरं।मासिमासितुकर्त्तव्यमित्यादि
तथाच॥एकाहेनतुषण्मासायदास्युरपिवात्रिभिः।न्यूनसंवत्सरश्चैवन्यूनषाण्मासिकं
लदा।तत्रमासाद्यमासांतपक्षद्वयेनुक्रममाह।आदिममतेमासाद्यपक्षेआद्यंप्र
थममासिकंनिमित्तंरुद्राह्निएकादशेह्निद्वादशेह्निवास्यात्‌।एकाहेनत्रिभिर्दि
नैर्वाऊनेमासऊनमासिकंद्वितीयमासादिदिनेद्वितीयमासिकं३तृतीयपक्षेत्रैप
क्षिकं४एवंतृतीयमासादिदिनेतृतीयमासिकं५चतुर्थमासादिदिनेचतुर्थमासि
कं६पंचममासादिदिनेपंचममासिकं७षण्मासादिदिनेषाण्मासिकं८एकेन
वात्रिभिरूनेषुषण्मासेषूनषाण्मासिकं९सप्तमादिदिनेसप्तममासिकं१०अष्टमा
दिदिनेअष्टमासिकं११नवमादिदिनेनवमासिकं१२दशमादिदिनेदशममासि
कं१३एकादशमासादिदिनेएकादशमासिकं१४द्वादशमासादिदिनेद्वादशमासि
कं१५एकेनत्रिभिर्वान्यूनेषुद्वादशमासेषुऊनाब्दिकं१६॥ ॥मासांतपक्षेनुक्रममा
ह।चरमेमतेमासांतसमतेपक्षेमासांत्यकालेऽखिलं।मासस्यांत्यकालेऽखिलश्राद्ध

मांगल्येपुरतःसपिंडनकृतौतत्रानुमास्यक्रियामाकृष्याभ्युदयंचरेत्करकन्ना
द्रमैत्रभेकर्हिचित्॥७८॥ ॥रुद्रइति।रुद्रेएकादशाहेअर्केहनिद्वादशा
हेवासपिंडक्रियांसपिंडीकरणांकुर्यात्।आहिताग्निकस्यसपिंडीकारको
यदासाग्निकोभवतितदा।तत्रापियदिसाग्निकस्यदाहाहादेकादशोदशो
भवेत्तदैकादशोहनिसपिंडक्रियांकुर्यात्।अन्यथादशानागमेद्वादशे
कुर्यात्।तथाचोक्तं।यजमानोग्निमान्राजन्प्रेतश्चाग्निमान्भवेत्॥ प
द्वादशाहेतदाकार्यंसपिंडीकरणंस्मृतेरिति।दशापातत्।छंदोगपरिशिष्टे।एकादशा
हेनिवृत्सअर्वाग्दशाद्यथाविधि।प्रकुर्वीताग्निमान्विप्रोमातापित्रोःसपिंडनमि
ति।अनग्निकस्यकर्त्तासाग्निकस्तत्रापिद्वादशाहेसपिंडीकरणं।साग्निकस्त
यदाकर्त्ताप्रेतश्चानग्निमान्भवेत्।द्वादशाहेतदाकार्यंसपिंडीकरणंस्मृतेरिति।सा
ग्निकस्यकर्त्तानिरग्निकश्चेत्तत्राह।कर्त्तानिग्निरिति।यदाकर्त्ताऽनग्निकःप्रेतः
साग्निकस्तदात्रिपक्षसमयेसपिंडीकरणं।तथाचोक्तं।प्रेतश्चेदाहिताग्निःस्यात्

का॰सि॰
६९

कर्त्तानिर्मिर्यदा भवेत्। सपिंडीकरणं तस्य कुर्यात्सिक्षे तृतीयक इति। उभयोरनग्निकत्वे
सपक्षकालाविकल्पिका इष्टाः। द्वावग्निहीनाविति। द्वौ चेदग्निहीनौ तदा अब्दांते संव
त्सरांते १ एकादशमासांते २ षण्मासांते ३ त्रिमासांते ४ द्वादशाहे ५ त्रिपक्षे वा ६ मां
गल्ये मांगल्यस्युदये वा ७ एषु सप्तसु समयेषु उद्दितां षोडशीं पुरः कृत्वा ततः सपिं
डक्रियां कुर्यात्। तथा च भविष्यत्पुराणे। सपिंडीकरणं कुर्याद्य। जमानोह्यनग्निमा
न्। आहिताग्नेः प्रेतस्य पूर्वेद्युर्न्नरतर्षन्न। द्वादशाहे निषष्ठे वा त्रिपक्षे वा त्रिमासि
वा। एकादशे पि वा मासि मांगल्यस्याप्युपस्थिते वेति। नागरखंडे पि। ततः सपिं
डीकरणं वत्सरादूर्ध्वतः स्मृतं। वृद्धिरागामिनी चेत्स्यात्तदर्वागपि कारयेदिति। आनंत्यात्कु
लधर्माणां पुंसां चैवायुषः क्षयात्।। अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यत इति। किं
च। प्रेतश्राद्धानि सर्वाणि सपिंडीकरणं तथा। अपकृष्यापि कुर्वीत कर्त्ता नांदीमुख
स्य चेति। यदा संवत्सरपूर्त्तेः प्रागेव सपिंडीकरणं क्रियते तत्र विशेषविधिमाह।
कालाकर्षणक इति। सपिंडु[illegible]क्रियां प्रतिकालाकर्षणके कृते सति यद्यपि षुरुषोड
शश्राद्धानि कृतानि संति तथाप्यनुमासिकं प्रतिमास्यं श्राद्धं कुर्यात्। तथा च गोभिलः

६९

ऊ

का·नि· तत्रादिनेसपिंडीकरणंकुर्यात्।तथाचऋष्यशृंगः।सपिंडीकरणश्राद्धमुक्तकालेन
७० चेत्कृतं।रौद्रेहस्तेचरोहिण्यांमैत्रभेवासमाचरेदिति।।७८।।अथसहगमनेस
पिंडीकरणमाह।।सापिंड्यंसहगामिकेपितृतनुंसंयोज्यतातादिकेपश्चात्सार्ध
णमाचरेत्सितमुखंतातेंबिकांयोजयेत्।।यद्वादैवमुखंस्वमातृजनकैकोद्दि
ष्टकेपार्वणंकृत्वाताततमहादितःस्वजननींतातेसमायोजयेत्।।७९।।तनु
त्याक्तपितामहादिषुतथाप्यूढःसपिंडक्रियांकुर्याद्द्वादशवासरेत्वधिकृतो
न्याय्यःकृतोनापरः।।नोकुर्यात्सकलाःक्रियाविरहगाःसापिंड्यतानोभ
वेत्प्रागारूढदिनेचरेत्त्रिपुरुषंश्राद्धंसदैवंयतेः।।८०।।इत्योर्व्याख्या।।सहगा
मिकेसहगमनेसापिंड्यंभवति।।तत्कथं।पूर्वंतातादिकेपितामहादौपितृतनुं
मृतपितृपिंडंसंयोज्यपश्चात्सितमुखंपार्वणंश्राद्धमाचरेत्तत्रतातपिंडेअं ७०
बिकांयोजयेत्।पत्न्याचैकेनकर्तव्यंसपिंडीकरणंस्त्रियाइतिवचनात्।।अ राम

थान्यप्रकारमाह।यद्वेति।स्वमातृजनकयोरेकोद्दिष्टकेदैवमुखंतातमहादितःपा
र्वणंकृत्वास्वजननींतातेसमायोजयेत्।पश्चात्तंतातंतातमहादिषुत्रिषुयोजयेत्।
भर्तर्यकृतसपिंडनेप्रेतीभूतेनैवतेनसहकृतस्याःसपिंडनं।पापिष्ठमपिशुद्धेनेय
नेनतुल्यन्यायत्वात्सिद्धमितिभूरुपादिः।।असंस्कृतौनसंस्कार्यौपूर्वौपौत्र
प्रपौत्रकैः।पितरंतत्रसंस्कुर्यादितिकात्यायनोब्रवीत्।पापिष्ठमपिशुद्धेनशुद्धं
पापकृतापिवा।पितामहेनपितरंसंस्कुर्यादितिनिश्चयः।तस्यार्थः।अकृतस
पिंडनौपूर्वौपितामहप्रपितामहौपौत्रप्रपौत्रकैनसंस्कार्यौ।तत्रप्रथमंपितरंसं
स्कुर्यादितिकात्यायनः।तथाच।पापिष्ठमकृतसपिंडनंपितरंशुद्धेनकृतसपिं
डीकरणेनवापापकृताऽकृतसपिंडनेनपितामहेनशुद्धंसम्यक्कुर्यादितिशा
स्त्रीयोनिश्चयः।अतएवदाक्षिणात्याःशिष्टाःपत्युःसपिंडनदिनेतेनसहैक

।का·नि· प्रयोगांतस्तल्या अपि सपिंडीकरणं। अखंडंप्रेतभूतस्यैव भर्तुः पिंडे संयोज्यतात्तत्र भ
र्तुः पिंडं त्रेधाकृत्वा तत्पित्रादित्रये तस्य संयोजनमिति प्रकारेण कुर्वंति वैश्वदेव एको
७१ द्दिष्टद्वयं पार्वणेनेति। तत्पुनर्नातीवयुक्तं। अथ शूद्रस्य सपिंडीकरणमाह। श
शूद्रो द्वादशाहे सपिंडीकु[illegible]र्यात्। मंत्रवर्ज्जं हि शूद्राणां द्वादशेऽहनि। कीर्तित
मिति विष्णुस्मरणात्। अथ श्राद्धाधिकारी। अधिकृत इति। अत्र [illegible] सपिंडी
करणश्राद्धे ऽज्येष्ठः पुत्रो ज्येष्ठपुत्रोऽधिकृत इति। सपिंडीकरणं ज्येष्ठेनैव।
तदन्यत्र प्राकृते अपरः कनिष्ठोप्यधिकारी विकल्पेन। असन्निधाने तदनुज्ञ
या वा। तथा चोक्तं। सर्वैरनुमतं कृत्वा ज्येष्ठेनैव तु यत्कृतं द्रव्येण चाविभक्तेन
सर्वैरेव कृतं भवेदिति वचनात्। अथ सन्यासि॰श्राद्धं। नो कुर्यादिति। यतेर्वि ७१
सुरगार्दैवहीनां सकलां क्रियां नो कुर्यात्। सापिंड्यं तानो भवेत्। तर्हि किं कार्य
मित्यत॰आह। रुद्रदिने प्राप्ते एकादशाहे दैवमुखं त्रिपुरुषं पार्वणं चरेदित्यर्थः।

यस्य संवत्सरादर्वाक् सपिंडीकरणं भवेत्। विधिवत्तानि कुर्वीत पुनः श्राद्धानि षोडशेति।
विधिवदिति पार्वणेनै[illegible]को द्दिष्टविधिना वा। तथा च पैठीनसः। सपिंडीकरणादर्वाक्कु
र्वन् श्राद्धानि षोडश। एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तान्यपि। सपिंडीकरणादू
र्ध्वं यदा कुर्यात्तदा पुनः। प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स तान्यपीति। वृद्धिप्राप्तौ
पुनरप्यनुमासिकानामपकर्षणं कुर्यादित्याह। मांगल्य इति। मंगलकार्ये उप
स्थिते पुरतः पूर्वं सपिंडीकरणात् कृतो जातायामपि शेषानुमास्यक्रियां आकृष्या
प्युदयं चरेत्। तथा च कात्यायनः। सपिंडीकरणादर्वागपकृष्य कृतान्यपि। पुनरप्य
पकृष्यंते वृद्ध्युत्तरनिषेधनादिति। अस्यार्थः। सपिंडीकरणात्पूर्वं षोडशश्राद्धानि
अपकृष्य कृतानि तथा नांदीमुखात् प्रागनुमासिकानि शेषाणि समापनीयानि।
तेषां वृद्धेरुत्तरतो निषेधात्। अथ सपिंडीकरणगौणकालमाह। करक इति। क
राहस्तः। कर्णः रोहिणी। आर्द्रा। मैत्रमनूराधा। कर्हिं विलंबः। विदेशुनेषु संद्रे सति

तथा च स्मृत्यर्थसारे। एकोद्दिष्टं जलं पिंडमाशौचं प्रेतसत्क्रियां। न कुर्यात्सार्वणादन्य
त्रै द्भूस्नी मृताय त्रिक्षवे। सपिंडीकरणं तेषां न कर्त्तव्यं सुतादिभिः। अहन्येकादशे प्रा
प्ते पार्वणं तु विधीयते। प्रतिमासे तु कर्त्तव्यमन्ताह्निमासिकादिकं। महालये तु
यच्छ्राधं द्वादश्यां पार्वणेन तु। सन्यासिनो प्यादिकादिपुत्रः कुर्याद्यथाविधि।
यथाविधिपार्वणे[illegible]नेसर्थः।८०॥ ॥अथ गजच्छायामाह। हस्तेर्के पितृक्षेत्रे वि
धौ स्मरतिथौ १३ श्राधं गजच्छायिकं दर्शे वा करगौ तु सूर्यशशिनावत्रैव चान्
स्वगृहे॥ श्राधं स्यान्न हि सूलके किमपि वस्त्येको परेतक्रियामाद्यं मासिकमेव
सूतकगते कृ[illegible]छे शिवे वा कुहो॥८१॥ हस्तेर्के सूर्ये हस्तनक्षत्रे स्थिते सति। पितृ
क्षेत्रे मघायां विधौ चंद्रे स्थिते। स्मरतिथौ त्रयोदश्यां। गजच्छाया नवं श्राधं स्यात्।
तथा चोक्तं। सूर्ये हस्तगते चंद्रे मघासंस्थे त्रयोदशी। गजच्छाया हि सा प्रोक्ता पि
[illegible]तृणां दत्तमक्षयमिति स्कांदात्। यदेंदुः पितृदैवत्ये हंसे[illegible]श्चैव करे स्थितः। तिथि स

का॰नि॰ वैश्रवणीयाचगजछायेतिसास्मृतेति। पित्र्यदैवत्यं मघा। हंसः सूर्यः। करो हस्तः। वैश्रवणीयात्र
योदशी। अथान्यप्रकारमाह। दर्शे वेति। दर्शेऽमावास्यायां करगौ हस्तगौ सूर्यशशिनौ
७२ तदापि गजछाया। हंसे हंसर्क्षगे यातु अमावास्या करान्विता। सा ज्ञेया कुंजरछायाख्ये
ति बोधायनोऽब्रवीत्। अथ तृतीयप्रकारः। तत्रैवेति। तत्रैवापरपक्षांतगे सूर्यग्रहणे तृतीयो गज
छायायोगः। तथा चोक्तं। सैंहिकेयो यदा सूर्यं ग्रसते पर्वसंधिषु। गजछायेति सा त्रोक्ता
तस्यां श्राद्धं प्रकल्पयेत्। सैंहिकेयो राहुः। हस्तिनो मूर्त्तिमतश्छायायामिति चतुर्थः। इ
ति गजछायानिर्णयः॥ ॥अथ सूतके श्राद्धनिर्णयः॥ सूतके किमपि श्राद्धं न स्यात्।
तत्कांपरेतक्रियां मृतस्य क्रियां सूतकेऽप्यर्थः। दानं प्रतिग्रहो होमः स्वाध्यायः पितृक
र्म च। प्रेतपिंडक्रियावर्जमाशौचे विनिवर्त्तत इति ब्रह्मांडोक्तेः। अन्यच्च। आब्दं अब्दन्न
वं। मासिकं मासोद्भवं। सूतकापगमे कर्त्तव्यं। अथवा सूतकानंतरममावास्यायां
कृष्णैकादश्यां वा कर्त्तव्यं। तथा च षड्त्रिंशन्मते। मासिके ब्देतु संप्राप्ते अंतरा मृतसू ७२
तके। वदंति शुद्धौ तत्कार्यं दर्शे वापि विचक्षणाः इति। देयं पितॄणां श्राद्धं तु आशौ।

५

का.नि.

सहितावितिः।हिनिश्चयंसज्जारंभः।वृतौवरणोजातेयज्ञारंभः।उद्वाहेनांदीमुखेकृतेआ
रंभः।जपतःपंचस्वजपव्रतहोमस्कारार्चनसत्रेषुसंकल्पेकृतेसत्यारंभः।श्राद्धेपाककृतौस
त्यामारंभः।तथाचोक्तंस्मृत्यंतरे।आरंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः।नांदीश्राद्धंविवाहादौ
७३क श्राद्धेपाकपरिक्रिया।होमार्चनजपेषुसंकल्पएव।तत्रारंभस्तुसूतकाद्याशंकयाप्रा
कर्तव्यःसूत्रावधिदिनान्याह।चौलेति।चौलंचूडाकर्म।मौंजीव्रतबंधः।अध्वरोयज्ञः।
उद्वाहोविवाहः।तेषुक्रमाद्विष्णादितएवक्रमेणरामाद्यन्हिप्रागारंभेतु।एतदुक्तंभव
ति।चौलादौरामैस्त्रिभिर्दिनैःप्राक्नांदीमुखंकार्यं।मौंजीबंधानादौदौरसैः
षड्भिर्दिनैर्नांदीमुखं।अध्वराद्यागादादौदिक्संख्यातिवासरैर्नांदीमुखंकृत्वावरणंकर्त
व्यं।उद्वाहादादौआशामितैर्दशदिवसैर्नांदीमुखंकर्त्तव्यं।तथाचोक्तं।एकविंशद
र्यज्ञेविवाहेदशवासराः।त्रिषट्चौलोपनयनेनांदीश्राद्धंपुरोदितं।आरंभेसूत
केनस्यादित्येतद्विषये।प्रारंभादूर्ध्वमाशौचेविवितानांचयज्ञियंकर्मकुर्वतां।कर्मणि
क्रियमाणेचेन्मध्येवैसूतकंभवेत्।यावत्कर्मसमाप्तिःस्यात्तावन्नास्तीतिसूतकं।। ७३

२+ वाहःकार्यएवतु।व्रतादौप्रज्ञनेनैवप्रारंभेनास्तिसूतकं।वृद्धशौनकः।अविजां।दीक्षि+

विनानेसकमन्येषुकर्मस्वाशौचमिष्यते।नैत्यकमितियज्ञादिकमारब्धं।विश्वरूपे।
विवाहादिषुमध्येचेत्सूतकंपतितंसति।पूर्वसंकल्पितंद्रव्यंदीयमानंनदुष्यति।।
विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके।शेषमन्नंपरैर्देयंदातान्भोक्तृंश्चनस्पृशेत्।
इतिविवाहादौसूतकनिर्णयः।। ८२ ।।अथाज्ञाततिथिनिर्णयमाह।।ज्ञातेमासि
मृतेस्तिथिर्नविदिताचेन्मासदर्शेचरेच्छ्राद्धंमासाविदितोनचेत्तिथिरिहज्ञातातदानि
वौ।।मार्गेमाघनभस्ययोश्चवकुलेपक्षेदलाज्ञानतस्त्वज्ञानेगमनाह्निवाश्रुतिदि
यामाचस्यमार्गादयोः।। ८३ ।।व्याख्या।विदेशेमृतस्यमासिज्ञातेमृततिथिर्नज्ञा
तातदातस्यश्राद्धादितन्मासस्यदर्शेचरेत्।।तथाच।।नज्ञायतेमृताहश्चेत्प्रमितप्रोषि
तेसति।मासश्चेत्प्रतिविज्ञाततद्दर्शेस्यान्मृताहिकमितिबृहस्पतिवचनात्।यदा
तुमरणतिथिरिहज्ञाताभवतिमासस्तुनविदितस्तदामार्गेमाघनभस्ययोःमा
घभाद्रपदयोस्तस्यांतिथौकर्त्तव्यं।तथाचोक्तं।दिनमेवविजानातिमासंनैवतु

का॰नि॰ यो नरः। मार्गशीर्षे तथा माघे भाद्रे वाथ समाचरेदिति भविष्यपुराणवचनात्। पक्षा-
ज्ञाने किं कर्तव्यमित्याह। दलस्य पक्षस्याज्ञाने कृष्णपक्ष एव तस्यां तिथौ कर्तव्यं।
७४ त्रयाणां मास पक्ष तिथीनामज्ञाने व्यवस्थामाह॥ व्यज्ञान इति॥ त्रयाणां तिथिमा-
सपक्षाणामज्ञाने गमनाद्गृहाच्च प्रस्थानदिने। यस्मिन्मासे यत्र तिथौ प्रस्थित-
स्तस्यां तिथौ श्राद्धादिकर्तव्यं। तथा च। दिनमासौ न विज्ञातौ मरणस्य यदा पुनः।
प्रस्थानदिनमासौ च ग्राह्यौ पूर्वोक्तया दिशेति बृहस्पतिवचनात्। पूर्वोक्तया
दिशेत्यस्यार्थमर्थः। प्रस्थानस्यापि मासज्ञाने तिथेरज्ञाने तन्मासामावास्या-
यां कर्तव्यं। प्रस्थानतिथिज्ञाने मासाज्ञाने पूर्वोक्तमासेषु भाद्र मार्ग माघेषु प्र-
स्थानतिथौ कर्तव्यं। प्रस्थानपक्षाज्ञाने पूर्ववत्। प्रस्थानस्यापि त्रयाणामज्ञा-
ने श्रुतिदिने तदशुभवार्ताश्रवणतिथौ कार्यं। मृतवार्ताश्रुतेर्ग्राह्यौ पूर्वोक्तके ७४
मेणक्षितिभविष्योत्तरवचनात्। अत्रापि पूर्वोक्तरीत्या। श्रवणमासाज्ञाने भाद्रा ८

स्तं जायते यदि। तदाशौचे व्यतीते तु तेषां श्राद्धं प्रदीयत इति। श्राद्धं मासिकाब्दिकविषयं। श्रा-
द्धविघ्ने समुत्पन्ने त्वन्तरा मृतसूतके। अमायां तु प्रकुर्वीत शुद्धावेके मनीषिण इति व्या-
सवचनात्। व्यापन्ने प्याब्दिके नैव कुर्यादामेन कर्हिचित्। अन्नेनैदममायां तु कुष्ट्या-
वाहरिवासरस्तुतिकाष्टर्णि जिनवचनात्। व्यापन्ने इति सूतकादिविघ्ने। सूतक-
रहिते शुद्धदिने कर्त्तव्या ध्यापदालुरः। पुत्रादिनात्तदिने त्वान्नेन कारणीयं। इ-
ति सूतके श्राद्धनिर्णयः॥ ८१॥ अथ विवाहादौ सूतकनिर्णयः॥ यज्ञोद्वाहजपव्र-
ताहुतिसुराच्यसित्रके श्राद्धके प्रारंभेन हि सूतकं सहिवृत्तो नांदीमुखे पंचसु॥ सं-
कल्पे जपतश्चपाकरचने स्याद्वोलमौञ्ज्यधौ राद्वाहे ष्वादितएषराम ऊरस द विंशा २०
शा १० मितेष्वारंभेत॥ ८२॥ यज्ञविवाहजपव्रतहोमेष्वारासित्रदानश्राद्धकार्ये प्रा-
रंभे जाते सूतकं न स्यात्। तथा। व्रतयज्ञविवाहेषु श्राद्धे होमे स्मरार्चने। प्रारब्धे सू-
तके न स्यादनारब्धे तु सूतकमिति स्मृत्यंतरात्॥ स तेषु कथमारंभः स्यादित्यतंह॥ आ

दिषु। तिथेरज्ञाने तद्दर्शे। पक्षाज्ञाने बहुलेऽद्रसर्पः॥ अथ पूर्वोक्तानां सर्वेषामज्ञाने
मार्गमाघयोरन्यतमस्याममायां कर्तव्यं। तथा च प्रभासखंडे। मृतस्याहर्न जानाति मा
सं चापि कथंचन। तेन कार्यममायां च श्राद्धं माघे च मार्गके। इत्यज्ञातमासपक्षति
थिनिर्णयः॥ ६३॥ अथामश्राद्धनिर्णयः॥ आपत्स्वग्निविवर्जिते सुतनौ ती ज
र्थे प्रवासे रजस्यथ स्त्रीव्परागयोः पित्र्यं द्विजः स्त्रीशूद्रयोरामतः॥ स्यान्मासोद्भव
मादृतापरदलं भाद्रे रजोदर्शने पक्वान्नेन चरेत्तथाब्दिकमिदं पूर्वाह्णकालेऽखिलं॥
६४॥ व्याख्या। आपत्सु कष्टोदयेषु। अग्निर्वर्जिते निरग्नौ। सुतजनौ जातकर्म वि
णि। तीर्थे तीर्थप्राप्तौ। प्रवासे ग्रामांतरे। स्त्रीषु दारेषु रजःस्वषु। अपरागयोः
सूर्यचंद्रग्रहणयोः। एतेषु स्थानेषु पित्र्यं द्विजः श्राद्धं आमेनैव भवेत्। स्त्रीशू
द्रयोस्त्वामेनैव सदेति। तथा च कात्यायनः॥ आपद्यनग्नौ तीर्थे च प्रवासे पुत्र
जन्मनि। हेमश्राद्धं संग्रहे च द्विजः शूद्रः सदाचरेत्। द्विजानां संक्रमादिष्वेवा

का॰नि मश्राद्धाधिकारः स्त्रीशूद्रयोः द्वैसं च ॥ सुमंतुरपि ॥ पाकाभावाधिकारः स्याद्द्विजादीनां नरा
७५ धिप। अपुत्राणां महाबाहो विदेशगमनादिभिः। सदा चैव तु शूद्राणामामश्राद्धं विदुर्बुधा इ
ति। जमदग्निरपि। यावत्स्या [illegible] न्नाग्निसंयुक्तः उत्पन्नाग्निरथापि वा। आमश्राद्धं तदा
कुर्याद्यस्तेग्नौकरणं भवेदिति। प्रचेताः। स्त्रीशूद्रः श्वपचश्चापि जातकर्मणि चाप्यथ।
आमश्राद्धं प्रकुर्वीत विधिनापार्वणेन चेति। श्वपचः स्वयंपचतीत्यपत्नीक इत्यर्थः। इदमा
मश्राद्धं पूर्वाह्णकालेऽरिक्ले कार्यं। आमश्राद्धं तु पूर्वाह्णे पराह्णे पार्वणं स्मृतमिति गा
लवोक्तेः। अथ प्रसंगादामश्राद्धविधिः। आमपदेन वितुषांतंडुलादि लक्ष्यते। तथा च व
सिष्ठः। सस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते। आमं तु वितुषं प्रोक्तं स्विन्नमन्नमुदाहृत
मिति। स्विन्नं पक्वमित्यर्थः। आमं तु द्विगुणं त्रिगुणं चतुर्गुणं यथाशक्त्या दद्यात्। तथा
च व्यासः ॥ आमं दद्याद्विकौंतेय तद्धान्नं द्विगुणं भवेत्। त्रिगुणं च चतुर्गुण्यं न त्वेकगुणम
र्पयेदिति ॥ सिद्धान्ने तु विधिर्यः स्यादामश्राद्धेप्यसौ विधिः ॥ आवाहनादि सर्वं स्यात्सिं ७५

ड दानं च भारत। दद्याद्यद्यद्धि जातिभ्यः शतं वा ऽशतमेव वा। तेनाग्नौकरणं कुर्यात्पिंडां
स्ते नैव निर्वपेत्। षट्त्रिंशन्मते पिंड दाने विशेष उक्तः। आमश्राद्धं यदा कुर्यात्पिंड दानं
कथं भवेत्॥ गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा॥ पिंडान्दद्याद्यथालाभं तिलैः
सह विमत्सर इति॥ गृहपाकादौदनाद्यन्नेन। स्त्रीशूद्रकर्तृके प्यामश्राद्धे पायसा
दिना पिंडदानं भवति। शूद्रस्तु गृहपाकेन तत्पिंडान्निर्वपेत्तथा। सक्तुमूलफलैस्त
स्य पायसं वा भवेत्स्मृतमिति भविष्योत्तरात्। आमश्राद्धे विकिराग्नौकरणादि पिं
डदानाद्यामेन कर्तव्यमित्युक्तं। आमश्राद्धप्रदः पिंडांस्तथाग्नौकरणं च यत्
दद्यात्तत्र च तेनैव यत्किंचिच्छ्राद्धिकं भवेदिति प्रचेतोवचनात्। आमश्राद्धे मंत्रे
षु विशेष उक्तः। उशंतस्त्वा। हविषे स्वितुते। तृप्ता स्थ स्यत्र तृप्यध्वेति। वाजे वाजेऽवत
त्र स्नायाले स्यत्र तृप्यत यथा तृप भिम्भिरिति। तत्र मरीचिः। आवाहने स्वधाकारि
स्वी कृते २

का॰प्र मंत्रवद्यावि सर्जने ॥ अन्यकर्मण्यनुद्ध्या स्युरामश्राद्धविधौ स्मृताः ॥ इत्या
७६ मश्राद्धविधिः ॥ अथ प्रसंगाद्धिरण्यश्राद्धविधिः । हिरण्यं तु धान्यादिके
क ब्राह्मणात् द्विपर्याप्तान्नसिद्धद्रव्यतश्चतुर्गुणं भवति । आमं तु द्विगु
णं प्रोक्तं हेमतश्चतुर्गुणं धान्याच्चतुर्गुणेनैव हिरण्येनसुरोचिषेति
मरीचिवचनात् ॥ पुत्रजन्मनि हिरण्यश्राद्धं जन्मोत्तरं नालच्छेद
नात्पूर्वं कर्तव्यमिति ॥ यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं ॥
छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते । हेमश्राद्धे आमश्राद्धो
क्तो विधिरेव ॥ गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा । पिंडदा ७६
नं प्रकुर्वीत हेमश्राद्धे कृते सतीति भविष्योत्तरात् ॥ इति हेमश्राद्धवि

श्रा

का॰ग्रं नपकेनैव ॥ ननुसर्वथामेनसांवत्सरिकंमासिकश्राद्धानुष्ठानमुचितं ॥
७७ यत्तु । मृताहनितुसंप्राप्तेयस्यभार्यारजस्वला ॥ श्राद्धंतत्रनकर्तव्यंकर्त
व्यंपंचमेहनीतिहेमाद्रिमाधवादिलिखितवचनं ॥ तद्यस्यमृतस्यभार्या
श्राद्धकर्त्री रजस्वलेतिव्याख्येयं ॥ ननुतस्यश्राद्धकर्तुर्भार्यारजस्व
लेति ॥ अतएवगौतमः ॥ अपुत्रायातुयदाभार्यासंप्राप्तेभर्तुराब्दिके ॥ रज
स्वलाभवेत्सातुकुर्यात्तत्पंचमेहनीति ॥ अमावास्यादिश्राद्धंतत्रामेनभ
वति । श्राद्धविघ्नेद्विजातीनामामश्राद्धंप्रकीर्तितं । अमावास्यादिनियतं
माससंवत्सरादृते इतिहारीतवचनात् ॥ माससंवत्सरादितिमासिकाब्दि
कव्यतिरिक्तविषयं । अमावास्यादीत्यादिशब्देनमहालयसंक्रमणादी ७
न्सस्यंतदामेनकर्तव्यं ॥ महालयश्राद्धेन्नाद्यतदृ इतिपक्षोभवति । तत्राहर्तं

ध्दिः॥ अथ भार्यारजोदर्शने श्राद्धनिर्णयः॥ आमश्राद्धं प्रकुर्वीत भार्यारजसि सं
क्रमइति। बोधायनोक्तपूर्ववचनादामश्राद्धप्राप्तिस्तत्र विशेष उच्यते॥ मासोद्भ
वमित्यादि॥ मासोद्भवं मासिकं। अब्दं तं प्रारब्धं अपरदलं॥ प्रारब्धापरपक्षः॥ त
थाब्दिकं सांवत्सरिकं॥ एतत्त्रिकं पक्वान्नेन सिद्धान्नेन चरेदेव॥ तथा च लौगा
क्षिः॥ अनग्निकः प्रवासी च यस्य भार्या रजस्वला॥ आमश्राद्धं द्विज कुर्या
न्न तत्कुर्यान्मृतेऽहनीति॥ पुष्पवत्स्वपि दारेषु विदेशस्थोप्यनग्निकः॥ अन्ने
नैवाब्दिकं कुर्याद्धेम्ना वामेन न क्वचिदिति वचनाभ्यामन्नेनैवाब्दिकं तदह
रेव कुर्यात्॥ अत एव गोभिलः॥ दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थि
ते॥ अन्नेनाऽसंभवे हेम्ना कुर्यादामेन वा सुत इति॥ ग्रहणे ब्राह्मणभो
क्तृणामभावे हेम्ना वाऽऽमेन कार्यं॥ तेन पत्न्यां रजस्वलायामपि तदहरेवान्ने

का॰ चं॰ अथ तीर्थश्राद्धनिर्णयमाह॥ तीर्थे श्राद्धविधिः पुरेव गदितस्तीर्थाप्तिका
७९ ले तथा रात्रौ वा दिवसे श्रितः क्षुधितकः श्राद्धं प्रकुर्याज्जनः॥ तीर्थाप्तेः सम
ये सुराः पितृगणास्तिष्ठंति तस्ताःर्श्वतो नो चेच्छापं कराः शिशुर्विपितृकोऽ
वीरांगनाऽदृश्यरेत्॥ ७५ ॥ व्याख्या॥ आपद्यनग्नौ तीर्थे चेति पूर्वोदि
तवचनादामेन तीर्थे श्राद्धविधिरिति पुरेव गदितः प्रोक्त इत्यर्थः॥ अ
थ तीर्थप्राप्तिकाले रात्रौ वा दिवसे जनः कर्त्ताश्रितः कृताशनो वा क्षु
धितस्तदेव श्राद्धं कुर्यादित्यर्थः॥ तथा च महाभारते॥ भुक्तो वाप्यथवा
भुक्तो रात्रावह्नि खेचर॥ न कालनियमः श्राद्धे गंगां प्राप्य सरिद्वरां॥ देवी
पुराणेपि॥ काले वाप्यथवाऽकाले तीर्थस्नानं सदा नरैः॥ प्राप्तैरेव च कर्त
व्यं पितृणां चैव तर्पणं॥ पिंडदानं च तत्रस्तं पितृणां चैव वल्लभं॥ विलंबो ७९

न च कर्तव्यो न च विघ्नं समाचरेदिति॥ काशीखंडेपि॥ अकाले प्यथवा का
ले तीर्थे श्राद्धं च तर्पणं॥ अविलंबेन कर्तव्यं नैव विघ्नं समाचरेत्॥ तीर्थप्रा
प्तौ मुंडनमुपवासश्च कर्तव्यः॥ तथा चोक्तं॥ मुंडनं चोपवासश्च सर्वतीर्थे
ष्वयं विधिः॥ वर्जयित्वा कुरुक्षेत्रं विशालां विरजां गयां॥ विधौ यत्र कृते ती
र्थे षण्मासाभ्यंतरे यदि॥ प्रसंगाद्वै पुनः प्राप्तो न कुर्यान्मुंडनादिकं॥ अ
र्घ्यमावाहनं चैव वर्हि जांगुष्ठनिवेशनं॥ तृप्तिप्रश्नं च विकिरं तीर्थे पंच विव
र्जयेदिति॥ अत्र नावाहने कारणमाह॥ तीर्थप्राप्तिरिति॥ तीर्थप्राप्ति
समये देवास्तथा पितृमुखाः पार्श्वतस्तिष्ठंत्येव॥ कात्यायनः॥ गृहं त्य
क्त्वा तु यस्तीर्थस्नानार्थमनुजो व्रजेत्॥ पिपासवोनुगच्छंति संहृष्टाः स्व
शरीरिण इति॥ खशरीरिणो देपितृगणाः॥ तस्मात्तीर्थप्राप्तौ श्राद्धमथ

का- ७९

श्यं कार्यं ॥ नोचेद्देवपितरः शापकराः स्युः ॥ पुनरुद्वाहं तत्र श्राद्धं विपित
कः शिशुरनुपनीतो वा ॥ अवीरा ॥ पतिपुत्ररहिता अंगना प्यवश्यं तेषां किंच
रदितितीर्थे श्राद्धनिर्णयः ॥ ८५ ॥ अथैकस्मिन्दिने प्रतिनिमित्तं श्राद्ध
भेदप्राप्ते तंत्रप्रसंगो निरूप्यते ॥ ॥ श्राद्धद्वंद्वमिहागते समदिने कालैक्यदे
वैक्ययोरेकं प्राह सपिंडपिंडरहिते तंत्रेण संकल्प्यतः ॥ प्रासंगादुभयोस्तथा सि
द्धिरुदिता निःपिंडपिंडाढ्ययोरन्ये ह्लिः सुरषद्दुरपृथगिह स्यातां किमत्रो
च्यते ॥ ८६ ॥ व्याख्या ॥ इह समदिने एकस्मिन्दिने कालैक्यदेवैक्ययोः
सतोः सपिंडपिंडरहिते श्राद्धद्वंद्वे आगते श्राद्धद्वयसंभवे सति हेमाद्रिमुख्या विबु
धमुख्यागणस्तंत्रेण संकल्प्यत एकं प्राह ॥ एतदुक्तं भवति ॥ यत्र कालैक्यं संप्रतिपन्नं दे
वैक्यं च तत्र प्रधानविशेषस्तु यान्यायलभ्य एव तंत्रे ॥ एवं च सति निमित्तके दे
शे निमित्तैक्ये व्याप्तौ प्रातनिमित्तकं तंत्रेण करिष्य इति संकल्प्या हेमाद्रिः ॥ एतदुक्तं

रजोदर्शनेपि पक्षेन कर्तव्यं ॥ अनाहितमासे नैव ॥ तत्रैकक्रमेण भिन्नक्रमेण व्य
वस्था ॥ एकमेव श्राद्धं प्रतिदिनमावर्तत इत्येकः पक्षः ॥ भिन्नानामेव कर्मणां
प्रतिदिनं भिन्नप्रयोग इत्यन्यः पक्षः ॥ तत्राद्यपक्षे समाप्तिदिने दक्षिणा दे
या ॥ ब्राह्मणास्त एव ॥ देशोपि स एव ॥ द्वितीयपक्षे प्रतिदिनं दक्षिणा देया ॥
ब्राह्मणा भिद्यंते ॥ अत्राद्यपक्षे आहिते प्रारब्धे रजोदर्शनादिसूतकोत्पत्तौ
पाकेनैव श्राद्धं कर्तव्यं ॥ आरंभो वरणं यज्ञ इत्यादिवचनात् ॥ तथा च ॥
विदेशगो वाविरगतामिको वा रजस्वलायामपि धर्मपत्न्यां ॥ श्राद्धान्न्यप
हे विदधीत पाके वाम नहेम्मान न तु पंचमेहि ॥ धर्मपत्न्यां रजस्वलायां श्र
याहे पाके विदधीत कुर्यात् ॥ हेम्मान ॥ पंचमेहनि नेति हेमाद्रिमाधवौ अ
बंधास्पाके रेव विदध्यात् ॥ इति रजोदर्शने श्राद्धनिर्णयः ॥ ८४ ॥

सुधार्णवे ॥ श्राद्धं स्यादेकदेवस्य मे कमुद्दिश्य वैयदि ॥ आद्यद्वयं न कर्तव्यं मे कस्मिन्ने
ववासरे ॥ एवं हेमाद्रिप्रोक्तं तंत्रं । यत्रामायां पिंडाद्यंगसंक्रांत्यादावपिंडत्वं तत्र गृह्य
माणविशेषतयानैव तंत्रं । किंतु प्रसंगादितरस्य सिद्धिर्जायत इति । प्रसंगादुभयो
क्त सिद्धिरित्याह । अन्ये तु नैः पिंडपिंडाद्ययोः श्राद्धयोरेकस्मिन्कृते तूभयोः सि
द्धिः कथिता । तदुक्तं कालादर्शे । नित्यमासिकयोः श्राद्धकुंभमासिकयोरपि ।
दार्शिकस्य युगादेश्च दार्शिकोऽलभ्ययोगयोः । दार्शिकस्य च मन्वादेः संपाते श्रा
द्धकर्मणा । प्रसंगादितरस्यापि सिद्धेः कृतरमाचरेदित्यस्यार्थः दर्शश्राद्धे कृ
ते नित्यश्राद्धस्य प्रसंगात्सिद्धिः तथा ग्रहणाद्यर्धोदयाद्यलभ्ययोगश्राद्धे कृ
ते दार्शिकस्य सिद्धिः । एवममायां मन्वादिश्राद्धे कृते दार्शिकस्य सिद्धिः । देवता
भेदे तु न ह तंत्रं नापि प्रसंग इत्याह । त्रिः सुरषट्सुर इति । त्रिः सुरं त्रिपिंडात्मकं ।
षट्सुरं षड्पिंडात्मकं । एते पृथक् स्यातां अत्र किं वक्तव्यं ॥ एतदुक्तं कालादर्शे ॥

नित्यस्योदककुंभस्य दर्शमासिकयोरपि ॥ नित्यस्य चाब्दिकस्यापि दार्शिकाब्दिकयोरपि ॥ यु
गाद्याब्दिकयोश्चापि मन्वाद्याब्दिकयोरपि ॥ प्रत्याब्दिकेषु चालभ्ययोगेषु विहितस्य च
संपाते देवताभेदाच्छ्राद्धयुग्मं समाचरेत् ॥ ८६ अत्राब्दिकदार्शिकयोर्योगे आब्दिकमादौ
दार्शिकं पश्चादित्याह ॥ योगे मासिकयोः पुराब्दिकममाश्राद्धं परत्राचरेत्तद्वन्नित्यनिमित्तयोर्यदि
तु भवेत्प्राक्श्राद्धमत्राद्भुतं ॥ पश्चान्नित्यमथाब्ददार्शिकयुतौ मातामहे जीवति श्राद्धं प्रोक्तम
युक्परैरिह युगाद्यं दर्शवन्मानवं ८७ व्याख्या अमाब्दिकयोः श्राद्धिकयोर्योगे पुरा
पूर्वमाब्दिकं । परत्र तदनंतरं दर्शश्राद्धमाचरेत् ॥ तदुक्तं स्मृत्यंतरे । दर्शप्रत्याब्दिके प्राप्ते श्राद्धे
स्यात्तत्र वै कथं । आदौ प्रत्याब्दिकं कृत्वा कुर्याद्दार्शं ततः परं । तद्वन्नित्यनिमित्तयोर्योगे ऽद्भु
तं नैमित्तिकं प्राक्कृत्वा पश्चान्नित्यं समाचरेत् । नैमित्तिकान्यपि तदुदयक्रमेण कार्याणि । त
थाच कात्यायनः । द्वे बहूनि निमित्तानि जायेरन्नेकवासरे । नैमित्तिकानि कार्याणि निमि
त्तोत्पत्त्यनुक्रमात् । जाबालिरपि । श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न तद्दिने । नैमित्तिकं १
तु कर्तव्यं निमित्तानुक्रमोदयं ॥ तदपि मातामहे जीवति दर्शे आब्दिकसंयोगस्तत्राह

यमपित्रिदैवतं वर्तते परंतु न युक्तं ॥ युक्तं कर्तव्यमित्यत आह ॥ मातामहे जीवति त्यादिना । परेरप्युक्तं ॥
यदादिक दार्शिकयोः संयोगाभावाज्जीवन्मातामहवर्गस्य दर्शेनासंततसमावेशः समानदेवतात्वेपि
अन्वाह्निके तत्रप्रसंगोनैव । इति श्राद्धद्वंद्वनिर्णयः ॥ अथ युगादिश्राद्धकालनिर्णयः । युगाद्यं मा
नवं मनुभवं च श्राद्धं दर्शवदपराह्णे कर्तव्यं । तथा चोक्तमनंतभट्टेः । मन्वाद्यासु युगाद्यासु प्रेत
पक्षे ष्टकासु च ॥ श्राद्धानि दर्शवत्कुर्यात्तिथ्यादिद्वैवमादहीति । ८७ अथ युगादिस्वरूपमाह ॥
राधोर्जेऽग्निनिधी ३।९ सितोस्मरकुहू २।३।३० भाद्रेथ माघे परे त्रेतासत्यकलीद्विपादिति तिथ्यथ [illegible]
वंप्रवृत्तं युगं ॥ चैत्राद्ग्नितिथी ३।१५ रव० मक्षग्राग्नि नो १५ दक्षं च दश्यो ०।१५ परे दर्शाष्टेन्वे
२०।८ गुणाग्निधी ९ रवितिथी २।१५ ने०मा ७ मुनीं [illegible] स्तिथी १५ ॥ ८८ ॥ अन्याः शु
क्लतमाश्च तुर्दशमिता प्रोक्तास्तु मन्वादयोऽथो तीर्थेभ्युदये सुतो विरचये च्छ्राद्धं स्वतातेसति ॥ न
सित्राद्विलए दिडिनि तथा तातेच पातित्यगे श्राद्धे नित्यनिमित्तके पि च तथा जीवत्पितुः सर्वदा ८९
राधोर्जे । राधो वैशाखस्तद्युक्त ऊर्जः कार्तिको राधोर्जे तंत्र मासद्वये अग्निनिधी । अग्निनिधि
मिता तिथी ॥ तृतीया नवम्यो । सितो शुक्लपक्षगे ॥ अथ भाद्रे माघे च परे कृष्णे स्मरकुहू । त्रयो
दश्यमावास्ये । एतासु तिथिषु क्रमात्रेता । सत्यकली ॥ द्विपात् द्वापारं : एतद्युगं प्रवृत्तं । द्विपादि
ति धर्मो द्विचरणोयत्रेति ते द्विपाद्वापारं ॥ तथा च भविष्योत्तरे ॥ नवम्यां शुक्लपक्षे तु कार्तिके

का॰ चं
८१ निरगात्कृतं ॥ त्रेतामितत्तृतीयायां वैशाखे समपद्यत ॥ दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगं ॥ कलिः
कृष्णत्रयोदश्यां नभस्ये मासि निर्गतं इति ॥ अथ मन्वादयः ॥ चैत्रादग्नितिथीत्यादि ॥ चैत्रप्रभृ
त्ति द्वादशमासेषु एताश्चतुर्दश मिता मन्वादयो भवंति ॥ तत्प्रकारमाह ॥ चैत्रे अग्नितिथी ॥ अग्निस्तृ
तीया ॥ तिथिः पूर्णमासी ॥ एते द्वे चैत्रे ॥ वैशाखे रवे ॥ नहीसूर्यः ॥ ज्येष्ठे शशिनः १५ पूर्णमास्येव ॥
आषाढे दिक्यं चदश्यो ॥ दशमीपूर्णमास्यो ॥ परे कृष्णे ॥ दर्शाष्टौ ॥ श्रावणेऽपरपक्षे दर्शोऽष्टमी च द्वे ॥
भाद्रपदे गुणस्तृतीया ॥ आश्विने निधिर्नवमी ॥ कार्तिके रवितिथी ॥ द्वादशी पौर्णमास्यो ॥ मार्गेन ॥ ना
स्त्येव मन्वादिः ॥ पौषे ईशाः एकादशी ॥ माघे मुनींद्राः सप्तमी ॥ फाल्गुने तिथिः पौर्णमासी ॥ श्रावणे परे दर्शा
ष्टाविति व्यतिरेकेण अन्याः सर्वाः शुक्लतमाः स्युः ॥ तथा च मत्स्यपुराणे ॥ आश्वयुक्शुक्लनवमी का
र्तिके द्वादशी सिता ॥ तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥ श्रावणे चाष्टमी कृष्णा पौषे चैकादशी
सिता ॥ सिताषाढस्य दशमी माघमासस्य सप्तमी ॥ श्रावणे चाप्यमावस्या ज्येष्ठे पंचदशी सिता ॥ आ
षाढी कार्तिकी चैत्री फाल्गुनी च विशेषतः ॥ एता मन्वादयः १४ प्रोक्ता मुनिभिस्तत्वदर्शिभिरिति ॥
पुण्याश्चतुर्दश प्रोक्ताः श्राद्धार्हाः पुण्यवृद्धये ॥ अत्र केचन श्रावणमासस्य स्थाने फाल्गुनं सामा
वास्यामाहुः ॥ इति मन्वादिश्राद्धनिर्णयः ॥ अथ जीवत्पितृक श्राद्धनिर्णयः ॥ अथोतीर्थे इत्यादि ॥
तीर्थे तीर्थप्राप्तिसमये ॥ अभ्युदये अभ्युदयिके ॥ इत्यादिषु जीवत्पितृकोऽपि सुतः श्राद्धं कुर्यात् ॥ ८१

का॰ नं॰
८२

पात २ वैधृती २ कुहू २ श्राद्धानि मन्वादयो १४ युगाद्या ४ स्तिथयोष्टकाः परपुरस्तिथ्यन्वि
तास्त्वष्टमी॥ मार्गे माघतपस्यभाद्रविषये १२ भाद्रांत्यपक्षोऽखिलः १६ स्तातांवाब्दिक २ एव
षण्णवमितश्राद्धानि ९६ कुर्युर्बुधाः ९० व्याख्या॥ संक्रांतयो द्वादश। व्यतीपाता द्वौ
वैधृतयो द्वादश। कुहवो दर्शा द्वादश। मन्वादयश्चतुर्दश। युगाद्याश्चतस्रः मार्गमाघतप उ
स्यभाद्रविषये मासचतुष्टये। अंत्याष्टमी कृष्णाष्टमी। परपुरस्तिथ्यन्विता अष्टकारूपा द्वा
दश १२ तपस्यः फाल्गुनः॥ परपुरस्तिथ्यान्वितेति नवमीसप्तमीसहिताष्टमी॥ भाद्रस्यांत्य
पक्षः कृष्णपक्षः षोडशतिथ्यात्मकः॥ तानां विकयोग्यविकेदृ॥ एतानि षण्णवतीश्राद्धानि
९६ बुधाः कुर्युः॥ तथाचस्मृत्यंतरे। अमा १२ मनु १४ युग ४ संक्रांति १२ धृति १३ पात १३ म
हालयाः १६ अन्वष्टकाश्च तिथयः १२ षण्णवतेः प्रकीर्तिताः॥ तत्राष्टकानामधेयमाश्व
लायनादीनां होमश्राद्धस्वरूपं॥ कात्यायनादीनां तु होममात्रमेव। तेषामन्वष्टकासु
श्राद्धमुक्तं। येषां परपुरस्तिथ्यन्वितास्वष्टकासु श्राद्धमुक्तं तेषां तद्भवत्येव। इदमन्व
ष्टकाश्राद्धं दर्शश्राद्धवदपराह्णे कार्यं॥ मन्वाद्यासु युगाद्यासु प्रेतपक्षेष्टकासु चेति पू
र्वोदाहृतवचनात्॥ इति षण्णवतीश्राद्धनिर्णयः ९० अथ श्राद्धदेवतान्याह॥ मास्या
ब्दे त्रिसुरेस्त आभ्युदयिकान्वष्टासु तीर्थे गयामुख्येस्यान्नवदैवतं तदपरं श्राद्धं तु ष ८२

ड्दैवतं॥ श्राद्धं स्यान्नवदैवमष्टकतिथौ हित्वा यजुःशाखिनोन्येषां नानुतिथौ क्षयेवं सह
गमेऽन्याब्दिकः पृथक् स्त्रीद्विजे ९१ व्याख्या मासि मासिके। आब्दे आब्दिके। त्रि
सुरे त्रिदैवते श्राद्धेस्तः। आभ्युदयिके अन्वष्टकासु गयामुख्ये तीर्थे श्राद्धे नवदैव
तं श्राद्धं स्यात्। यजुःशाखिनो हित्वा स्त्रकाऽन्येषां श्राद्धं नवदैवतं स्यात्। तदपरं
षड्दैवतं स्यादेव। तदुक्तं स्मृत्यंतरे॥ त्रिदैवत्यं म्रताहे च षड्दैवत्यं च दार्शिके। वृद्धौ
तु नवदैवत्यं मष्टासु तथैव च॥ दर्शे नित्ये युगादौ च मन्वादौ ग्रहणे तथा॥ संक्रांतिषु
भरण्यां च षड्दैवत्यमुदीरितमिति॥ अन्वष्टकासु नवभिः पिंडैः श्राद्धमुदाहृतं॥
पित्रादि मातृमध्यं च ततो मातामहांतकमिति कात्यायनवचनात्। पृथ्वीचंद्रोदये
ब्रह्मांडे॥ पितृणां प्रथमं दद्यान्मातृणां तदनंतरं। ततो मातामहानां च स्वन्वष्टक्ये क्र
मः स्मृतः॥ श्राद्धहेमाद्रौ खागलेयः॥ केवलास्तु क्षये कार्या वृद्धावादौ प्रकीर्तिताः॥
अन्वष्टकासु मध्यस्था नांत्याः कार्यास्तु मातर इति॥ अत्र केचिद्बृ यायां महालये च
विशेषमुक्तः प्रयोगसागरे॥ आषाढ्याः पंचमे पक्षे श्राद्धं कुर्याद्दिने दिने। उद्दिश्य
नवदैवत्यमित्येवं मनुरब्रवीत्॥ स्त्रीणां तु नवदैवत्यं षड्दैवत्यं च दार्शिके। महालये

का॰ वं ८२ गयाश्राद्धेयत्नेद्वादशदैवतं॥ अथसहगमनेभिन्नतिथ्योश्चयाद्दे विशेषमाह। सहगमेन्या
ह्नोः पृथक्कृत्तोद्दृजइति। अन्याह्नोः पुंयोश्चितोरन्याह्नि प्राप्तो ऽनुगमने अरुजेआ
ह्निके पृथक्क्त्तइति॥ तथाचभृगुः॥ यासमारोहणं कुर्याद्भर्तुश्चित्यांपतिव्रता॥ तांमृताहन्निसंप्रा
प्यपृथक्पिंडेनियोजयेदिति भिन्नतिथिविषयमेव ८१ अथपिंडश्राद्धनिर्णयमाह संक्रां
तौग्रहणेयुगादिभरणीमन्वादिशिष्टागमेपि-त्र्यर्क्षे व्यतिपातवैधृतियुजोः श्राद्धंविपिंडंभवे
त्॥ उद्वाहव्रतबंधचौलपरतोवर्षार्धपाद्यावधिश्राद्धंपिंडविवर्जितंचविदितिः केकुर्यात्तथात
र्पणं ८२ व्याख्या संक्रांतौद्वादशस्वपि। ग्रहणेरविशशिग्रहणद्वये॥ युगादिषुचत
सृषु। भरण्यां। मन्वादिषुचतुर्दशस्वपि। शिष्टागमनसमये। पित्र्यर्क्षेमघायां। व्यतीपात
वैधृतियोगयोः। एतेषुविपिंडपिंडरहितंश्राद्धंभवेत्॥ हेमाद्रौ। संक्रांतौग्रहणेपातेयुग
मन्वंतरादिषु॥ शिष्टागमेभरण्यांतु श्राद्धंपिंडैर्विनाभवेत्। तथाच॥ मघायुगादौभर
ण्यांनकुर्यात्पिंडपातनं। अज्ञानात् कुरुतेयस्तु ज्येष्ठपुत्रोविनश्यति॥ विवाहादूर्ध्वंस
पिंडश्राद्धावधिमाह॥ उद्वाहव्रतबंधचौलपरतइति। उद्वाहात्सरतोवर्षंयावदपिंडंश्रा
द्धंकुर्यात्॥ तथाव्रतबंधादूर्ध्वंषण्मासं। चौलानंतरंमासत्रयंयावगावदपिंडंश्राद्धं
कर्तव्यं। तथोद्वाहादित्रिष्वपिकर्मसुकृतेषुतर्पणवितिलंवर्षार्धादिकाल ८२

अत्रादौ॥ सपितुःपितृकृत्येषु अधिकारोनविद्यते। नजीवंतमतिक्रम्यकिंचिद्दद्यादितिश्रु
तिः॥ आमश्राद्धंगयाश्राद्धंश्राद्धंचापरपाक्षिकं। नजीवत्पितृकःकुर्यात्तिलैःकृष्णेश्च
तर्पणमित्यादिनिषेधवाक्यानिसंतितत्रप्रतिप्रसवार्थमुक्तं॥ तथाच॥ उद्वाहेपुत्रजनने
पित्र्येष्ट्यांसौम्यकेमखे। तीर्थेब्राह्मणआयातेषडेतेजीवतःपितुरिति॥ अथपितरिपा
तित्यादिदोषयुक्तेसंन्यस्तेवानत्सुतोनित्यदर्शादि॥ नैमित्तिकंग्रहणश्राद्धादि॥ जीव
त्पितुरपिश्राद्धमुक्तं॥ तथाच॥ रहोतीर्थेचसंन्यस्तेताते चपतितेसति॥ येभ्यएवपिता
दद्यात्तेभ्योदद्यात्सुतस्स्वयमिति॥ येभ्यश्चेतिपितुःपितृपितामहप्रपितामहेभ्यएव।
एवंपितुर्मातामहादिभ्यः॥ एवंपितुर्मातृपितामहीप्रपितामहीभ्योपि॥ मातृश्राद्धंतुपि
तरिजीवतिसतिवक्ष्यमाणस्थानेषुकर्तव्यं॥ तथाचगृह्यपरिशिष्टे॥ अन्वष्टक्यांग
याश्राद्धेसत्यांयत्रमृतेऽहनि॥ मातृश्राद्धंसुतःकुर्यात्पितर्यपिचजीवति॥ नजीवत्पि
तृकःकुर्याच्छ्राद्धंमातुःक्षयादृते॥ ऋतेपिनवमीश्राद्धान्मृतेपितरिलुप्यते॥ गोभिलः॥
जीवमानःपितायस्यमाताचम्रियतेयदि॥ प्रेतपक्षेनवम्यांतुमातुश्राद्धंविधीयते॥ इ
तिजीवत्पितृकश्राद्धनिर्णयः ८२ अथपञ्चवतीश्राद्धान्याह॥ संक्रांति१२ व्यती

पर्यंतं कुर्यात्॥ ज्योतिःपराशरः॥ विवाहव्रतचोलेषु वर्षमर्धं तदर्धकं॥ अतिलंतर्पणं कुर्या
च्छ्राद्धं कुर्यादपिंडकं मिति ९२ अस्यापवादमाह॥ आद्यं तीर्थभवं माहालयगतं कुर्या
त्सपिंडं तु सश्राद्धे वृद्धिभवे कुलेन्वयभुवः कुर्यतति तत्कं त्वखलु॥ प्राक्कर्माहपरेषु मातृमु
खनस्तातादिमातामहाद्यं स्यात्पूर्वदिने प्रागे घुदलके श्राद्धं पराह्णे पिवा ९३ यद्वाग्र
दिवसे प्रगे विरचयेन्मात्राद्ययो वृद्धिनं पूर्वाह्णेऽभ्युदयं पराह्णविषयेग्न्याधानमुख्येवि
धो॥ अग्न्याधानमुख्ये इष्टिसर्वयजने श्रौते तुलापुरुषादौ दानेम हति स्थितो सुरतनोस्तो
मस्य पौराणिके ९४ हेरंबस्नपनादिशांतिषु भवेत्स्मार्तोस्वशेषास्वपि स्मार्तोग्निग्रह
वैश्वदेवमुखतः सौत्रे निजाभ्युद्गमं॥ श्राद्धं गर्भैवादित्ताधुरिकरग्राहांतिके स्त्रजेमां भ६
गत्स्येष्टखिलेषु काम्यवृषभोत्सर्गे तथैतच्चरेत् ९५ त्रयाणां व्याख्या: सकृत्तोद्वाहव्रत
चोलः एतच्छ्राद्धं सपिंडं कुर्यात्। तत्किं। आद्यक्षयाहभवं। तीर्थभवं तीर्थप्राप्तं। महालयग
तं भाद्रपदापरपक्षगतं। तथा च ज्योतिःपराशरः। महालयेगयाश्राद्धेमातापित्रोःक्षयेह
नि। कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं सुतइति॥ कुले वृद्धिभवे श्राद्धे जाते सति। अन्वय
भुवः सपिंडाः कर्तव्यत्सपिंडासपिंडश्राद्धं कुर्वंति॥ इत्यपिंडश्राद्धविधि॥ अत्रापिंड

का.नि.वं मिति संकल्पविधिना कार्यं॥ तत्प्रकारमाह॥ पिंडहीनं तु यच्छ्राद्धं संकल्पाख्यं प्रचक्षते॥ त
८४ त्रापि हि द्विजः कुर्यादित्येवं मनुरब्रवीत्॥ अग्नौकरणमर्घ्यं च आवाहनविसर्जने॥ पिंडश्रा
द्धे प्रकुर्वीत पिंडहीने निवर्तते॥ आवाहनार्घ्ये पिंडाश्च विकिरोच्छिष्टपिंडके। स्वधोक्तिर
ग्नौकरणं संकल्पे सप्त वर्जयेत्॥ इति संकल्पश्राद्धविधिः॥ अथ प्रसंगाद्दरिद्रश्राद्धविधिः॥
अतिदरिद्रस्य तर्पणपर्याप्ततिलाद्यभावे वृद्धवसिष्ठेन विशेष उक्तः॥ अग्निना वा दहेत्कक्षं
श्राद्धकाले समागते॥ तस्मिन्नुपवसेद्वापि जपेद्वा पितृसंहितां॥ विष्णुपुराणे॥ सर्वाभावे
वनं गत्वा कक्षामूलप्रदर्शकः॥ सूर्यादिलोकपालानामिदमुच्चैः पठेदिति॥ न मेऽस्ति वित्तं
न धनं न चान्यच्छ्राद्धोपयोग्यं स्वपितॄन्नतोऽस्मि॥ तृप्यंतु भक्त्या पितरो मयैतौ भुजौ कृतौ व
र्त्मनि मारुतस्येति॥ अथाभ्युदयिकश्राद्धनिर्णयः॥ प्राक्कर्माहपरेद्युरिति॥ प्राक्: कर्मणः प्रा
ग्दिवसे। कर्माहे। कर्मदिवसे। परेद्युः। कर्माहपरदिवसे॥ त्रिषु दिनेषु मातृमुखतः श्राद्धत्र
यं कुर्यात्॥ तद्यथा॥ कर्मप्राग्दिवसे मातृपार्वणश्राद्धं॥ कर्माहे तद्दिने तातादिपित्रादिपार्व दत्तात्रेयु
णं॥ कर्माहपरदिने मातामहाद्यं पार्वणं। तथा च वसिष्ठः॥ पूर्वेद्युर्मातृकं श्राद्धं कर्माहे पैतृकं त
था॥ उत्तरेद्युः प्रकुर्वीत मातामहगणस्य तु॥ अथ वा शक्तश्चेत्स्वदिने प्रागेव प्रातःकाले॥ वृद्ध ८४

ह्णके मध्याह्ने॥ अपराह्णे च श्राद्धत्रयं स्यात्॥ शातातपः॥ अथाग्दिने त्वशक्तश्चेदेकस्मिन्पू-
र्ववासरे॥ श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तांत्रिकं॥ पूर्वाह्णे मातृकं श्राद्धं मध्याह्ने पैतृकं
तथा॥ ततो मातामहानां च वृद्धौ श्राद्धत्रयं भवेदिति॥ अत्यंताशक्तः पूर्वदिवसे श्राद्धत्र-
यं कुर्यादित्याह॥ यद्वेति॥ वा अथवा यदुक्तं श्राद्धत्रयं तस्मादिवसे। प्रगे प्रातःकाले एवमा-
त्रादिमातृपार्वणश्राद्धादिपार्वणत्रयं विधानाच्चरेत्॥ तथा च वृद्धमनुः॥ अलाभे भिन्न-
कालानां नांदीश्राद्धत्रयं बुधः। पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्णे मातृपूर्वकमिति। इदमाभ्युदयिकं
त्रिविधं॥ नित्यं नैमित्तिकमनियतं चेति॥ तत्र विवाहादौ नित्यं॥ अग्न्याधानादिषु निमित्तं॥
पुत्रजन्मादावनियतनिमित्तं चेति। तदाभ्युदयिकं यस्मिन्काले कर्तव्यं तदाह॥ अथोदृधिज-
मिति॥ विवाहनिमित्तं वृद्धिजं पूर्वाह्णे विरचयेत्॥ अग्न्याधानादिविधावाभ्युदयिकमप-
राह्णे कर्तव्यं॥ तथा च गालवः॥ आमश्राद्धं तु पूर्वाह्णे सिद्धान्नेन तु मध्यतः पार्वणं चापराह्णे
च वृद्धिश्राद्धं तथाग्निकं॥ आग्निकमग्न्याधानादिनिमित्तमपराह्णे कर्तव्यमित्यर्थः पुत्र-
जन्मादिनैमित्तिकस्यानियतत्वान्निमित्तानंतरं नालछेदनादर्वागेव विधेयं॥ अत्रिः॥ पूर्वा-
ह्णे वै भवेद्वृद्धिर्विना जन्मनिमित्तकं॥ पुत्रजन्मनि कुर्वीत श्राद्धं तात्कालिकं बुध इति॥

इत्याभ्युदयिकश्राद्धनिर्णयः ॥ निमित्तानां बाहुल्यात्केषु केषु निमित्तेषु आभ्युदयिकमित्य
आह ॥ तत्र श्रौतस्मार्तपौराणिकसूत्रोक्तामांगल्ये कर्मणि नांदीश्राद्धं प्रकर्तव्यं ॥ तत्र कात्या
यनः ॥ अनिष्ट्वा तु पितृश्राद्धे न कुर्यात्कर्म वैदिकमिति ॥ वैदिकग्रहणेन सूत्रोक्तपुराणोक्त
स्मृत्युक्तानामुपलक्षणं ॥ निमित्तानि यथा ॥ अग्न्याधानमुखेष्टिसर्वयज्ञन इति ॥ अग्न्याधा
नादिसर्वयज्ञयजने श्रौते कर्मणि निजाभ्युदकम्माभ्युदयिकं चरेदित्यन्वयः ॥ तुलापुरुषा
दि महतिदाने ॥ सुरतनौ दैवार्चायाः स्थितौ प्रतिष्ठायां ॥ तोयस्य तडागादि जलप्रतिष्ठायां च ॥
शेषं सुगमं ॥ एवं जलप्रतिष्ठादेवप्रतिष्ठादौ पृथक्पृथक्काम्ये कर्मणि आभ्युदयिकं स्याद
त्तिरेव ॥ अग्न्याधानादिनित्यकर्मावृत्तौ सकृदेव ॥ यथोक्तं ॥ आधाने होमयोश्चैव वैश्व
देवे तथैव च ॥ बलिकर्मणि दर्शे च पौर्णमासे तथैव च ॥ नवयज्ञे च यज्ञज्ञा वदंत्येवं मनी
षिणः ॥ एकमेव भवेच्छ्राद्धमेतेषु न पृथक्पृथक् इति ॥ अस्यार्थः ॥ आधानपुनराधान
योः ॥ सायंप्रातर्होमयोः ॥ सायंप्रातर्वैश्वदेवे ॥ बलिकर्मणि तदंग ॥ दर्शपौर्णमासयोः ॥
नवयज्ञे व्रीहियवयोः ॥ एतेषु कर्मद्वंद्वेषु एकमेव न पृथगित्यर्थः ॥ अत्र केचनाधानप
वाभ्युदयिकमेकमेव पुरस्तान्निपृथगितीछंति न तद्वृद्धसंमतं ॥ द्वितीयादिविवाहेष्व ८५

का॰ चं॰ नमुक्तं॥ हेमाद्रौ ब्राह्मे॥ योग्येनोतु विद्यमानेपि सर्वोपिंडान्निर्वपेत्॥ पतंति नरके तस्य पित
८६ रः स च पच्यते॥ इदानीं नांदीमुखं गणशः कर्मसु क्रियमाणेषु सकृदेवोक्तं॥ कात्याय
नः॥ गणशः क्रियमाणेषु मातृणां पूजनं सकृत्॥ सकृदेव भवेच्छ्राद्धमादौ न पृथगा
दिषु॥ स्वकालरहित गर्भाधानादि कर्मसु एककाले क्रियमाणेषु सकृदेवाभ्युदयि
कं भवेन्न पृथगिति॥ विवाहादि कर्म गणो यदुक्तो गर्भाधानादिषु सवनांतः॥ विवा
हादावेकमेव स्याच्छ्राद्धं नादौ कर्मणः कर्मणस्यादिति कात्यायनः॥ नांदीश्राद्धोत्तरं
वर्ज्यमाह गार्ग्यः॥ नांदीश्राद्धे कृते पश्चाद्यावन्मातृविसर्जनं॥ दर्शश्राद्धं क्षयश्रा
द्धं स्नानं शीतोदकेन तु॥ अपसव्यं स्वधाकारं नित्यश्राद्धं तथैव च॥ ब्रह्मयज्ञं चाध्य
यनं नदीसीमातिलंघनं॥ उपवासव्रतं चैव श्राद्धभोजनमेव च॥ नैव कुर्युः सपिंडाश्च
मंडपोद्वासनविधिरिति॥ इति निर्णयसिंधौ नांदीश्राद्धनिर्णयः॥ अथान्नश्राद्धे
कुतुपादिमुहूर्ता दर्श्यंते तेषां संप्रयोजननामानि॥ अह्नो मुहूर्ता विख्याता दश पंच
च सर्वदा॥ तत्राष्टमो मुहूर्तो यः स कालः कुतुपः स्मृत इति मात्स्योक्तेः॥ अन्यच्च॥
पौराणिका रौद्र १ सितारव्य २ मैत्राः ३ क्षणाः स्मृताश्चत्वारभटश्च तुर्यः ४ सा ८६

वित्रः ५ वैराजकसंज्ञकौ ६ च गंधर्वनामा ७ भिजिदष्टमश्च॥ रौहिण्यतो बलो १० विजयो
११ न्यो नैर्ऋत १२ शंभुरवो १३ वरुणाश्च १४ अंतिमस्तु भगसंज्ञकः १५ उक्तोयोष्टमः
स एव भवेत्कुतपाख्य इति रत्नमालोक्तेरिति कुतपकालः ९५ अथैकोत्तरशतं कुलं॥
तातां १ बा २ स्वभगिन्य ३ आत्मदुहिता ४ तातो ५ थ मातामहः ६ इतीरितानि मुनि
भिर्गोत्राणि सप्तैकतः॥ एकैकस्य चतुर्दशान्वयभुवः पूर्वे पृथक्स्वामिनो १ मित्रस्या २
सगुरोः ३ कुलेनिगदितं चैकोत्तरं तच्छतं ९६ मुनिभिरित्येकतः सप्तगोत्राणीरि
तानि॥ इतीति कथं॥ तातभगिनी॥ अंबामातृभगिनी॥ आत्मभगिनी तित्रिणि॥ आ
त्मदुहिता स्वपुत्री॥ तातकुलं॥ मातामहकुलं॥ कांतातात इति श्वशुरकुलं॥ इति सप्त॥
एतेषां मध्यात्सप्त पृथगेकैकस्य चतुर्दशान्वयभुवो वंशाभवाः एवं सप्तनवति
९८ जाताः॥ अन्यदेकं स्वामिनो भर्तुः पोषकस्य कुलं॥ तथा द्वितीयं मित्रस्य॥ तृती
यं गुरोः कुलं॥ एवमेकोत्तरशतं कुलानि १०१ भवंति॥ तथा च स्मृत्यंतरे॥ पितामाता
महश्चैव जामाताभगिनीत्रयं॥ श्वशुरेण च संबंधाः सप्तगोत्राः प्रकीर्तिताः॥ पि

का· त्रादीनां च सप्ता नाम्नैकैकस्य चतुर्दश ॥ मित्रस्वामिगुरूणां च कुलमेकोत्तरशतं मि
८७ ति ९६ अथैकोदरविवाहनिर्णयः ॥ नैकस्योदरयोः सुमंगलविधिर्भ्रात्रोर्भगिन्योर स्या
थैकाहे युग्मजनिं विहाय दुहितुः पाणिग्रहात्सुतः ॥ स्यात्सुतस्य न चान्यथोद्वहपरं चौ
लोपवीतेन हि स्यातामापदि चेदिति तं तु शरद्भेदे परे त्वक्षते ९७ युग्मजनिं यम
ळजननं विहाय सोदरयोरेकोदरयोर्भ्रात्रोर्वा भगिन्योः सुमंगलविधिर्विवाहादि
रेकाहे एकस्मिन्दिने न स्यात् ॥ तदुक्तं स्मृत्यंतरे ॥ प्रत्युद्वाहो नैव कार्यो नैकाहे दुहि
त्रोर्द्वयोः ॥ न चैकजन्ययोर्भ्रात्रोश्च विवाहश्चोपनायनं ॥ एकमातृप्रसूतानामेक
स्मिन्नेव वत्सरे ॥ विवाहं नैव कुर्वीत गार्ग्यस्य वचनं यथेति ॥ उद्वाह्य पुत्रीं न पिता वि
दध्यात्सुत्यंतरस्योद्वहनं कदाचित् ॥ यावच्चतुर्थो विधिरुद्वहस्य समाप्यते तावदसौ
न कुर्यात् ॥ पुत्रीपरिणयादूर्ध्वं यावद्दिनचतुष्टयं ॥ पुत्रांतरस्य कुर्वीत नोद्वाहमिति रयः ॥
एकोदरप्रसूतानां विवाहं चोपनायनं ॥ चौलकर्म प्रकुर्वीत मंगलत्रयमेव तत् ॥ यमले
विशेषः ॥ एकस्मिन्नेव वत्सरे चैव वासरे मंडपेपि च ॥ कर्तव्यं मंगलं स्वस्रोर्भ्रात्रो ८७

र्यमेव कर्तव्यं ॥ नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः ॥ अत ऊर्ध्वं सुतः कुर्यात्सित्वणा
तस्थिवे पितुरिति ॥ तच्छ्राद्धं पितुः पितॄणामिति ॥ अथ जीवत्पितृकः पितुः पित्रादिभ्यो द
द्यात् ॥ यदा जीवत्पितानांदीश्राद्धं कुर्याद्विधानतः ॥ पितुर्मातामहादीनामेष धर्मः सनात
नः ॥ अन्यच्च ॥ नांदीमुखे कर्मणि संप्रवृत्ते पिता यथा जीवति यस्य पुंसः ॥ येषां च कुर्यात्स्वपि
ता स्वयं च तेषां हि कुर्यादिति शास्त्रसिद्धं ॥ येभ्य एव पिता दद्यात्तेभ्यो दद्यात्सुतः स्वयं ॥
पिंडानोद्वाह नान्येषां तस्याभावे पितृक्रमादिति ॥ तस्याभावे पितुरभावे ॥ कनिष्ठभ्रा
त्रादिसंस्कारकर्मसु तत्क्रमादिति पित्रादित एव ज्येष्ठभ्रात्रा देयमित्यर्थः ॥ असंस्कृता
श्च संस्कार्याः भ्रातृभिः पूर्वसंस्कृतैरिति वचनात् ॥ अथैकस्मिन्वर्गे पितृवर्गे मातृवर्गे
मातामहवर्गे वा जीवति कथं श्राद्धमभ्युदयेपि कथं वा कार्यं ॥ तत्रोक्तं ॥ पितृवर्गे मातृवर्गे
तथा मातामहादिके ॥ जीवेत्तु यदि यो वर्गस्तं वर्गं तु परित्यजेत् इति केषांचिन्मतं ॥ नां
दीश्राद्धे पिंडदानं विकल्पेन ॥ वृद्धिश्राद्धे कुलाचाराद्देशकालाद्यपेक्षया ॥ पिंडनिर्व
पणं कुर्यान्न वा कुर्यान्नराधिपेति भविष्योत्तरात् ॥ वह्वो साग्निकस्य नियमेन पिंडदा

का॰ चं हि मुंडनं च स्यात् मुंडनाभ्यंजनमन्वगेति॥ सहितारत्नावल्यां॥ चौलं मुंडनमेवोक्तं वर्जितं वर
८८ णासरं॥ सतु त्रयं पुनर्थी वन्न कुर्यात्कृघु मंगले॥ कुले सतु त्रयादर्वाक् अंडनाल्लतु मुंड
नं॥ प्रवेशनिर्गमं यावन्न कुर्यात् मंगलत्रयं॥ अथोर्ध्वं प्रतिप्रसवमाह॥ आपदि त्वेति॥ आ
पत्काले॥ इदमीरितमुक्तं तदपि स्यादेव॥ ईरितमिति निषेधीकृतं तन्नस्यादेव॥ अयं रेशि
ष्टः अब्दभेदे चक्षते व दंतीति॥ एकोदरयोर्द्वयोरेकदिनोद्वहने भवेन्नाशः॥ नद्यंत
रतो व्यभिदेकेप्याहुः संकटे च शुभ्रं॥ नं प्रतिषिध्यं तत्सं प्राप्ते संकटे महति॥ एकोदर
संभवयोरेकोद्वहे मंडपे काले॥ न चैव जन्योः स्त्रीपुंसोर्विवाहस्त्वेकवत्सरे॥ अब्द
भेदे शुभं केचित्साहुर्महति संकटे॥ फाल्गुने चैत्रमासे च पुत्रोद्वाहोपनायने॥ अ
ब्दभेदे न दोषः स्यादित्याचार्योऽब्रवीदथ॥ व्याघ्रपात्॥ पुत्रोद्वाहात्सरं दोषो दुहि
तुः स्याद्विवाहिके॥ अब्दभेदाच्च कुर्वंति न तु त्रयविलंबनं॥ अन्यच्च॥ कृते वो
पनयने भवेद्यावद्दिनत्रयं॥ कंन्यादानं न कर्तव्यमित्याहुः पर्वसूरयः॥ व्रतमेक ८८
स्य संप्राप्तं तथैकस्य विवाहकं॥ एकस्मिन्नपि चान्यस्मिन्दिने कुर्यात्तु वै पिता॥ मध्ये वै

कृतबंधस्य विवाहो यदि वा भवेत्॥ अलाभे सुमुहूर्तस्य कन्याया वा सुतस्य च॥ इत्येकोदरोद्वा
हादिनिर्णयः॥ ९७॥ अथ नवरात्रनिर्णयमाह॥ आदावश्वयुजः क्षणं प्रतिपदात्रो तेद्विती
यभवेन्नंदायां कलशस्थितिर्न हि यदा चित्रांत्ययोगाविह॥ नंदर्धेश्वयुजोः परत्रतिथियुग्मा
नांवियोगो न चेत्सा तत्र हि पक्षतौ वभिजिति स्याद्वा मुहूर्तेककचित्॥ ९८ नोदर्शान्वितपक्षतौ
निरचयेडगी चैन स्थापने दर्शश्लेषक्षणयुग्मकं प्रतिपदाक्षीणात राद्या घटी॥ त्यक्त्वा षोडशभा ५
कुंभसंस्थितिरिहान्येन क्रकाले व्रतप्राङ्गौडमुखास्ततः प्रतिपदः प्राप्तो प्रदोषस्थितिः ९९
व्याख्या॥ अश्वयुज आश्विनस्य आदौ शुक्ले पक्षे प्रतिपदा क्षणं क्षणमिता भवति तद
नंतरद्वितीयभवेत्तदा नंदायां प्रतिपदि कलशस्थितिर्भवेत्॥ तदुक्तं मात्स्ये॥ प्रतिपद्याश्विने
कार्यं नवरात्रं क्रमात्ततः॥ कुहूयुक्ता सदा त्याज्या नाशयेच्च कुलं यतः॥ न च दर्शकलाप्रा
प्ति नंदायामंबिकार्चने॥ उदये द्विमुहूर्तापि प्रतिपत्सज्जनेमम॥ मुहूर्तापि प्रकर्तव्या द्वितीयासं
युता सदा॥ वर्जनीयाः प्रयत्नेन दर्शयुक्ता तु पार्थिवेति॥ तिथिभयोगयोर्निषेधमाह॥ नहि यदीति॥
इह प्रतिपदि चित्रा अंत्ययोगो वैधृतिरिमौ चेन्न तदा कलशस्थितिः स्यात्॥ मत्स्यपुराणे॥ स्वल्पा
पि प्रतिपच्छस्ता चित्रा वैधृति वर्जिता॥ यदाश्वयुजोश्चित्रावैधृत्योः के स्थितिः स्यात्॥

का॰ ८९ तदाप्रतिपत्स्वरस्त्रतिथियुक् द्वितीयायुक्ताभवतितत्रैवतिथियुग्मानांप्रतिप
द्वैध्यतिचित्रायांसंभवोन॥ तदाप्रातरेवतत्रपक्षेतोप्रतिपदिकलशस्थिति
र्भवेत्॥ यदाचेदभिजित्प्रतिपल्लभ्यतेतदाभिजितिमुहूर्तेऽष्टमेमुहूर्ते
कलशस्थितिर्भवेत्॥ तथाचतत्रैवोक्तं॥ चित्रावैधृतियोगस्तुभवेद्याम
त्रयंयदि॥ प्रातरेवतदाकार्यंकलशस्थापनंबुधैः॥ वैधृतिश्चतथाचित्रा
समग्राप्रतिपद्यदि॥ प्रभातेप्रतिपन्नास्तितदाकार्यंतथैवतु॥ चित्रावैधृति
युक्ताचेत्प्रतिपद्द्वितीयान्विता॥ तत्रैवपूजनंदेव्याकर्तव्यंशुभकांक्षिभिः॥
तुल्याचेत्प्रतिपच्चित्रावैधृतिश्चापिवायदि॥ कलशस्थापनंकुर्यात्प्रति
पद्येववादिवा॥ स्वल्पेवैधृतिचित्रेचेत्प्रतिपच्चाधिकायदि॥ हित्वाचि
त्रांवैधृतिंचकुर्यात्कलशसंस्थितिं॥ रवेरस्तमदर्वाग्विचिरेषडुदाहृतः॥ ८९

यमलजातयोः॥ सहोदराणामेकस्मिन्मंडपेमंगलत्रयंनकुर्यात्॥ एकस्मिन्मंड
पेप्येकोनकुर्यान्मंगलत्रयं॥ यदिभिन्नोदरस्तस्यात्समाप्यैकंपुनर्भवेत्॥ भिन्नो
दराणामेकस्मिन्नकुर्यान्मंडपंपिता॥ समाप्यमंगलंचैकंपुनःकुर्याच्चनादिकमिति॥
अन्यच्च॥ एकजन्येतुकन्येद्वेपुत्रयोरेकजन्ययोः॥ कन्येद्वेतुनचैकस्मिन्नदद्यात्तु
कदाचनेति॥ कन्योद्वाहानंतरंपुत्रोद्वाहःस्यादित्यत आह॥ दुहितुःपाणिग्रहा
दिति॥ दुहितुंपाणिग्रहादनंतरंपुत्रस्यपाणिग्रहणंस्यात्॥ अन्यथानेति॥ सु
तविवाहानंतरंदुहितुर्विवाहोनस्यादेव॥ ज्योतिःप्रबंधे॥ पुनर्विवाहो
र्ध्वमृतुत्रयेपिद्विवाहःकार्यंदुहितुःपरंस्यात्॥ अस्यार्थः॥ पुंविवाहादूर्ध्व
मृतुत्रयेषण्मासेषुदुहितुर्विवाहादिकार्यंकिमपिनस्यात्॥ दुहितुर्विवा
हात्परंषण्मासमध्येपिपुरुषविवाहादिकार्यंनस्यात्एव॥ इतिसहोदरोद्वा
हनिर्णयः॥ अथमंडनमुंडनयोर्निर्णयमाह॥ अथोद्वहपरमिति॥ उद्वहपरं
विवाहात्परंचौलोपवीतेचूडाकर्मोपनयनेनस्यात॥ ज्योतिःशास्त्रे॥ नमुंडनाद्यपि

ताकुर्याद्यदिकुर्यात्कदाचनाराज्यनाशमवाप्नोतिपंचत्वंचाधिगच्छतिइत्या
दिनिवचनानिउत्तरविधायाद्यत्वेनोक्तानि॥अथपूर्वेद्यापिक्षयवशाद्वा
ह्येयाह॥दर्शश्चेत्क्षणयुग्मकमिति॥यदाऽमावास्याक्षणद्वयमिताभवतिपु
रःप्रतिपदाक्षीणातदाआद्याःषोडशघटीस्त्यक्त्वाकुंभस्थापनंभवेत्॥तथान्य
त्रांतरे॥प्रतिपत्स्वल्पमात्रापियदिनस्यास्सरेहनि॥अमायुक्तातदाकार्यात्यक्त्वा
षोडशनाडिकाः॥घटिकाःषोडशत्याज्याआद्याःप्रतिपदस्तुयाः।कलशस्थापनेप्येवमभीष्टंजायतेध्रुवमितिमाधवहेमाद्रिरघुनाथवाजपेयीप्रभृ
तिभिर्महद्भिर्निबंधकर्तृभिर्नवरात्रस्यनक्तंव्रतत्वमुक्तमस्तितत्राह॥इ
हान्येनक्तकालेव्रतमिति॥इहनवरात्रेऽन्येगौडप्रमुखाःप्रतिपदःप्रदोषव्या
प्तिर्नक्तेव्रतत्वाज्जानाचपिकलमपुरस्थितिमाहुः॥तथान्यत्रांतरे।आश्वि
नेमासिमेघान्तेमहिषासुरमर्दिनीं॥प्रतिपदादिनिशासुपूजयेद्भक्त्यासो

९०

पवासादिकंक्रमात्॥आश्विनेमासिमाघांतेपतिपद्यादितिथिर्भवेत्॥
तस्यानक्तंप्रकुर्वीततरात्रौदेवींचपूजयेत्॥मासिचाश्वयुजेशुक्लेनवरा
त्रेविशेषतः॥संपूज्यनवदुर्गांश्चनक्तंकुर्यात्समाहितः॥नक्तंनक्तभोजन
मितिपाक्षिकनक्तभोजनपरामर्शः॥तथाच॥रात्रिव्रतमिदंदेविस
र्वपापप्रणाशनं॥सर्वकामप्रदंनृणांसर्वशत्रुनिवर्हणं॥रात्रि
व्रतमिदंतस्यरात्रौकर्तव्यतेष्यतेइत्यादिदेवीपुराणादिवच
नेभ्यश्चावगम्यते॥यद्यपिसानवरात्रिःपूजाकालत्वेनश्रुतातत
थापिप्रदोषकालएवतत्कालः।प्रथमातिक्रमणेकारणाभावात्॥तत्र
तिथिद्वैधेविशेषमाह॥तत्रद्वितीयदिनेस्तमयात्पूर्वंसमाप्तापूर्वदिनए
वव्याप्तेकदेशेनवाकालयोगेपूर्वेद्युर्ग्राह्येतिवाजपेयिभिर्लिखितमस्तितनो

लिखितंपुरःर्दंनवरात्रंसर्वेषांन्निःसृतंतेनावगम्यते॥भविष्योत्तरे॥एवंचविंध्यावा
सिन्यानवरात्रोपवासतः॥एकभक्तेननक्तेनस्वशक्त्यायाचितेनवा॥पूजनीया
जनैर्देवीस्थानेस्थानेपुरेपुरेगृहेगृहेभक्तिपरैर्ग्रामेग्रामेवनेवनेस्नातैःप्रमुदितैर्हृष्टैर्ब्राह्म
णैःक्षत्रियैर्नृपैः॥वैश्यैःशूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्चमानवैः॥स्त्रीभिश्च
कुरुशार्दूलतद्विधानमिदंशृणु॥कालिकापुराणे॥कृत्वैवंपरमामायु
र्निर्वृत्तिंत्रिदिवौकसः॥एवमन्यैरपिसदादेव्याःकार्यंप्रपूजनं॥विभूति
मतुलांलब्ध्वाचतुर्वर्गार्थसाधये॥भविष्योत्तरे॥भवानीतुष्टयेपार्थसं
वत्सरसुखायचेति॥अन्यत्रापि॥पूजयित्वाश्विनेमासिविशोको
जायतेनरः॥वर्षेवर्षेविधातव्यंस्थापनंचविसर्जनंमितिदेवीपुरा
णेवीप्साश्रवणात्॥योमोहादथवालस्याद्देवींदुर्गांमहोत्सवे॥नपूजयतिदु ९१

नोचेद्द्विवैवकर्तव्यंदिनार्धेकलशस्थितिमिति॥अमायुक्तायांनिषेधमाह॥नो
दर्शान्वितेति॥दर्शान्वितेपक्षेतोप्रतिपदिदुर्गार्चनकलशस्थापनेनोविरचयेत्॥
तथाचोक्तं।यास्यादश्वयुजेमासिप्रतिपद्भद्रयान्विता॥शुद्धामप्यर्चनंतस्यांरि
तयत्नेफलप्रदं॥नंदायांदर्शयुक्तायांयत्रस्यान्ममपूजनं।देशभंगोभवेत्तत्र
दुर्भिक्षंचोपजायते॥तस्माद्भद्रान्वितानंदानवरात्रेप्रशस्यते॥आश्वि
नेमासिमद्भक्तैःकर्तव्याशुक्लपक्षगा॥प्रतिपत्त्रिमुहूर्तापिपुत्रपौत्रप्र
वर्धिनी॥धनवृद्धिकरीपुंसांसर्वसौख्यकरीसदा॥अतोन्यथानक
र्तव्यानवरात्रव्रतेमम॥योन्यथाकुरुतेमोहाद्द्वारापूजाविधौमम॥तस्य
राष्ट्रेप्रजानाशंकरिष्यामिनसंशयः॥सोमयासहिताग्राह्यानकदाचि
द्विचक्षणैः॥सर्वक्षयकरीयस्मात्तस्मात्तांपरिवर्जयेत्॥नामावास्यायु

शास्त्राद्देवाद्वाप्यथभैरवक्रुद्धा भगवती तस्य कामानिष्टानि निहंतिचेति कालिकापु
राणश्रवणं तत्पूजाया एवं नित्यत्वावगमाच्च शरत्काले महापूजा क्रियते तयाच्च वाक्यी
ति मार्कंडेयपुराणेपि नियत्वमवगम्यते। तस्मात्सर्वेषां कलेशास्त्रापूजनं च सूतके
पि प्रारब्धं भवत्येव। अत एव प्रारब्धे सूतकं चेत्स्यान्नवरात्रं कथं भवेत्। तत्र विश्व
रूपः। आश्विनस्य सिते पक्षे प्रारब्धे नवरात्रके। अंतरा सूतके तत्र क्रिया कार्या क
थं बुधैः। सूतकं वर्तमानं चेत्तत्रोत्पन्नं यदा भवेत्। देवीपूजा प्रकर्तव्या मंत्रैर्यज्ञवि
धानतः। सूतके पूजनं प्रोक्तं दानं चैव विशेषतः। देवीमुद्दिश्य कर्तव्यं तत्र दोषो न
विद्यते॥ प्रारंभात्प्राक्समायाते यदि चेत्सूतकादिके। चंडिकापूजनं तत्र कथं स्या
दिति संशयः। कारयितव्यमन्येन द्रव्याः पूजादिकं च यत्। न यत्नेन सुजनं द्रव्याः का
र्यं यदग्निहोत्रवत्। इति नवरात्रनिर्णयः॥ १९॥ अथ संक्रांतिनिर्णयः। हेमाद्रौ ब्राह्म
स्पष्टः॥ गृहे रवौ हरिपदं याम्यायनं कर्कमे ४ मेषे १ तौलिनि ७ संक्रमे च विषुवत्सं।

म्यायनंनक्रभे।१॰ ग्यंगांकार्कभे ३।६।९।१२। णरवौद्विषडशीत्यास्यंहिसाधारणात्रयाः
का॰नि॰ १२ पुण्यतमाश्चषोडशकलापश्चात्तथासंमताः॥१३०० व्याख्या। अत्रमेषादिद्वादशरा
शीनांचत्वारित्रिकानि। तत्रैकस्मिंत्रिकेचरस्थिरद्विस्वभावइतिसंज्ञा। तत्रद्विती
यपंचमाष्टमैकादशसंज्ञाख्यस्थिरराशिषुसंक्रांतिरूपेणप्रवृत्तेर्केहरिपदंभवति।
कर्कभेरवौसमायातेयाम्यायनंदक्षिणायनं।मेषतथातौलिनिसंक्रमेविषुवद्भव
ति। नक्रभेमकरगेर्केसौम्यायनं। ग्यंगांकार्कमित ३।६।९।१२। भेद्विस्वभावराशिग
रवौसंक्रमेषडशीत्यास्यंषडशीतिमुखंभवेत्। एतदुक्तंभवति। स्थिरराशिसंक्रांती
नांचतसृणांहरिपदमितिसंज्ञा। द्विस्वभावराशीनांचतसृणांषडशीतिमुखसंज्ञा।
चरराशीनांचतुर्णांमध्येमेषतुलासंक्रांत्याविषुवत्संज्ञा। कर्कसंक्रांतौदक्षिणाय
नं। मकरसंक्रांतौउत्तरायणमिति। तथाज्योतिःशास्त्रे। हरिपदंस्थिरभेरविसंक्र
मेद्वितनुभेषडशीतिमुखंभवेत्। उदगपागयनेमृगकर्किणोःक्रियतुलाधरयो १२
र्विषुवत्स्मृतमिति। वसिष्ठः॥ अयनेद्वेचविषुवेचतस्रःषडशीतयःचतस्रोवि

१

र्त्तितः। मरीचिरपि। नाड्यः षोडश पर्वणि संक्रांतेरपरेण च। राहोर्दर्शनमात्रेण पुण्यका
९२ लः प्रकीर्त्तितः। तथा जाबालिः। संक्रांतेः पुण्यकालस्तु षोडशोभयतः कलाः।
ज्योतिःशास्त्रे। पूर्वतोपि परतोपि संक्रमात्पुण्यकालस्तु घटिकाः षोडश। अ
र्धरात्रसमयादनंतरं संक्रमे परदिनं तु भावह। केषांचिन्मते संक्रांत्योभयतः
पंचदश घटिका अपि वर्त्तंते। संक्रांतिसमयतः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः।
तद्योगाच्चाप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रतेति देवलोक्तेः। एवं साधारण्येन सं
क्रांतित उभयतः पंचदश षोडश घटिकाः प्रोक्तास्तत्र विशेषः। मध्ये तु विषुवं पु
ण्यं प्राग्विष्णोदक्षिणायने। षडशीतिमुखे तीते अतीते चोत्तरायणे। याम्याय
ने विष्णुपदे तथा दृष्टेशानायनं तं विषुवे च मध्ये। वदत्यतीते षडशीति वक्रे महर्ष
यः खल्वयने च सौम्ये इत्यादीनि वाक्यानि संक्रांतिभेदेन पूर्वापरकालयोः प्र
तिपादकानि तत्रापि कति घटिका इति निर्णयमाह। पुण्याः प्राग्घटिकास्तपा ९२

गयनगे सौम्यायने विंशतिः पाश्चात्याः परतः कलास्तु ८ षडशीत्यास्त्वथ पूर्वा
पराः। दिङ्नाड्यो विषुवेथ षोडश ८ हरेः पद्यां पुरां साध्वकैर्नक्रेरवाब्धिमिताः ८४
पराः राशिग्रहे त्रिंशत्पुरस्यात्स्मृताः॥ १०१॥ पारस्का। अपागयनगे। दक्षिणा
यने मरवौ। प्राग्विंशतिः घटिकाः पुण्याः पुण्यदाः स्मृताः। सौम्यायने मृगेर्के पाश्चा
त्याः विंशति घटिकाः पुण्यदाः। अयने विंशतिः पूर्वा मकरे विंशतिः परेति बृहस्प
तिवचनात्। तु पुनः षडशीत्यास्त्यपरतः कलाः षोडश घटिकाः पुण्याः षडशीत्यामती
तायामष्टि ८ रुक्तास्तु नाडिकाः इति व्यासोक्तेः। अष्टिरिति षोडश। षडशीत्या
मतीतायां षष्टिरुक्तास्तु नाडिका। इति केचिदुक्तं। तत्रापि चतस्रः षोडशीया
स्यानां पृथक् पंचदश पक्षमंगीकृत्य मिलिताः षष्टिरिति हेमाद्रिः। अथ विषु
वे तुलामेषयोः पूर्वापरा आद्या अंत्याश्च दिङ्मिता नाड्यः पुण्याः ० वर्तमाने
तुलामेषे नाड्यः स्तु उभयतो दशेति वचनात्। अथ हरेः पद्यां विष्णुपद्यां पुराः

का॰ति डशनाड्यः पुण्याः। केचित्तु दंस्याः॥ उभयोरपि षोडशैक्यक्तं। पुण्यहानिविष्णुपद्यांतश्च
९४ कपश्चादपि षोडशेति हि ध्रुवसिद्धांतः। केचित्त्वत्र मकररवौ ध्रुवमितश्चत्वारिंशद्घ
टिकाः पराः पुण्याः। शशिगृहे कर्किणि याम्यायने पुरस्ताः पुरोभवाः। त्रिंशद्घटिकाः
पुण्याः स्मृताः। अतीतानागते पुण्ये द्वे उदग्दक्षिणायने। त्रिंशत्कर्कटके नाड्यो मक
रे तु दशाधिका इति ब्रह्मवैवर्तवचनात्॥१०१॥ संक्रांतयः पूर्वापरभागिन्यो यदि दिवा
मध्याह्नादिषु जायंते तदा दिवैव तत्रोदितप्रशस्तकाललाभात्सम्यगेव। रात्र्यागमे
तु विशेषमाह। प्राक्पश्चाद्युदलावधि विषुवतीक्रांतो निशार्धद्वयेशेषास्त्वेवमृतेऽ
यने धुरि पराह्नास्वायननाड्यः शराः॥ पुण्या रात्रिदले तथायनक्रांते प्राक्पश्चिमायां
तिथौ पूर्वाह्ने परवासरपूर्वमुखकं प्याहरह्नो द्वयोः॥१०२॥ विषुवसंक्रांतौ मेषतु
लासंक्रांतौ निशार्धद्वयरात्रेः प्राक्पश्चिमदले सत्यां प्राक्पश्चाद्युदलावधिः पु
ण्याः घटिका उक्ताः। एतदुक्तं भवति। रात्रेः पश्चिमार्धसंक्रांतौ सत्यां पश्चात्सरे दि ९४
स वसस्य परदलावधि मध्याह्नात्तरं पुण्यकालः। रात्रेः पश्चिमार्धसंक्रांतौ सत्यां पश्चा

३

सप्तरश्च संक्रांतौ द्वादश स्मृताः। न कर्कटसंक्रांतौ द्वे उदग्दक्षिणायने। तुलामेषौ विषु
वतीतयोर्मध्यतत्तः पराः। वृषवृश्चिककुंभेषु सिंहे चैव यदा रविः। एतद्विष्णुपदं नाम
विषुवादधिकं फलं। कन्यामिथुनमीनेषु धनुष्यपि रवेर्गतिः। षडशीतिमुखी प्रोक्ता ष
डशीतिगुणा ८६ फले। अत्र दानफलमुक्तं कालिकापुराणे। अयने कोटिपुण्यं च ल
क्षं विष्णुपदे फलं। षडशीतिसहस्रं तु षडशीत्यां स्मृतं बुधैः। शतमिंदुक्षये दानं सहस्रं
तु दिनक्षये। विषुवे शतसाहस्रं व्यतीपाते त्वनंतकं। अत्र स्नानश्राद्धयोरकरणे
प्रत्यवायस्मरणान्नित्यत्वमवगम्यते। शातातपः। रविसंक्रमणे नस्नायाद्यस्तु मा
नवः। सप्तजन्मनि रोगी स्याद्दरिद्रश्चैव जायते। अयने द्वितये श्राद्धं विषुवद्वितये
तथा। संक्रांतिषु च कर्तव्यं पिंडनिर्वपणाद्वृते इति ब्रह्मांडात्। स च कालः किमु भ
यतः किंवान्यतरतः कियांश्चेत्यपेक्षायामाह। सर्वसंक्रांतिषु साधारण्येनोदित
था पश्चाच्च षोडश कला घटिका पुण्यतमाः स्मृताः। शातातपः। अर्वाक् षोड
श विज्ञेया नाड्यः पश्चाच्च षोडश। कालः पुण्योर्कसंक्रांतेर्विद्वद्भिः परिकी

एतदुक्तं भवति।

सरस्योरस्यान्मध्यान्हावधिः पुण्यकालः। एवं विधेयनं विषयपूर्वपरदिनमेव
पुण्यकालः। दक्षवसिष्ठः। अर्धरात्रादधस्तस्मिन्मध्यान्हस्योपरि क्रिया। ऊर्ध्वं
संक्रमणे चोर्ध्वमुदयात्प्रहरद्वयं। आसन्नसंक्रमं पुण्यं दिनार्धं स्नानदान
योः। रात्रौ संक्रमणे भानो विषुवसयने दिनमिति। यदि पूर्वापररात्रौ विषुवत्सं
क्रमस्तदासंक्रमासन्नमहर्दलं पुण्यकालः। एवमयनेक्रांत्तिविनाशेषासु स्थि
रद्विस्वभावसंक्रांतिषु निशार्धद्वयसतीषु शराः पंचधुरिपराह्णायाद्यनाड्यः पु
ण्याः। निशापूर्वार्धगास्वष्टासु डशीति विष्णुपद्याः सेयाधुरि दिनस्यांत्याः पंच
नाड्यः पुण्याः। निशापरार्धेतास्वष्टासु संक्रांतिषु सतीषु परदिनस्याद्याः पंचना
ड्यः पुण्याः। विष्णुपद्यां धनुर्मीननृयुकन्यासु चैव यदा। पूर्वोत्तरगतं रात्रौ भानोः
संक्रमणं भवेत्। पूर्वाह्ने पंचनाड्यांत्याः पुण्याः प्रोक्ता मनीषिभिः। अपराह्ने तु
पंचाद्याः श्रौतस्मार्तेच कर्मणि इति दक्षवसिष्ठवचनात्। अथ निशीथव्यवस्था। अ
यनेक्रांतेशेषास्वासंक्रांत्योर्यदारात्रिदले निशीथसमये प्राक्पश्चिमायांतिथौ।

का॰नि॰
८५
स्युस्तदा पूर्वमहि ऽपरवासेऽर्धानमुखं वाहुः। यदा निशीथे प्राक्तिथिस्पृष्टा संक्रांतिस्तदा
प्राक्तिथेर्मध्यान्हात्तरं पुण्यकालः। यदा निशीथे परतिथिस्पृष्टा संक्रांतिस्तदा परदि
नेमध्यान्हावधिपुण्यकालः। तथा च देवीपुराणे। आदौ पुण्यं विजानीयाद्यद्यभि
न्ना तिथिर्भवेत्। अर्धरात्रे व्यतीते तु विज्ञेयमपरेऽहनीति। अस्यार्थः। अर्धरात्रे संक्र
मणे पूर्वदिनोत्तरार्धवर्ति तिथ्यभिन्ना संक्रमकालीना तिथिर्भवेत्। तदादौ पूर्वदिनो
त्तरार्धे पुण्यं विजानीयात्। एवं सति यदि निशीथे परदिनपूर्वार्धतिथ्यभिन्ना स्या
त्तदोत्तरदिनपूर्वार्धमर्थात्सिद्धं। तत्र व्यवस्था। अर्धरात्रव्यतीते तु पूर्वतिथ्यभेदे
पि परेऽहन्येव। यत्रार्धरात्रसमकालीना तिथिर्दिनार्धद्वयेपि भवति तदा पूर्वभोगि
नीषु पूर्वदिनोत्तरार्धं। परभोगिनीषूत्तरदिनपूर्वार्धं। उभयतो भोगिनीष्विच्छातो वि
कल्पः। केचित्तु। अस्मिन्विषये संक्रमस्तु निशीथे स्यात्षड्यामाः पूर्वपश्चिमाः॥
संक्रांतिकालो विज्ञेयास्तत्र स्नानादिकं चरेत् इति। केचिद्दिनद्वयं पुण्यमाहुः। वृ ८५
द्धवसिष्ठः। पूर्णं चेदर्धरात्रे तु यदा संक्रामते रविः। प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकर
६

कर्कटकाविति ॥१०२॥ अयने विशेषमाह। रात्रौ कर्कटसंक्रमे धुरिदिनां सार्धतद्
स्याः शराः चंद्वः पुण्यतरा मृगे निशि तथांस्याहार्धमाद्याः शराः। नाड्यः पुण्यत
मा हि केचिदयनक्रांतौ तु रात्र्यंतराकस्ता सन्नत एव दृष्टफलसंक्रांतौ पुरा पुण्यदं ॥
१०३॥ मार्तंडोदयतः पुरादि फलदः क्रांतौ तु सूर्योदयात्पुण्यं पश्चत एव पुण्यसमये
आद्यस्य कालः स्मृतः॥ सार्धस्य व्याख्या। रात्रौ यदाकदापि कर्कसंक्रमे सति धुरि
दिनस्यात्सार्धपुण्यं। तदंत्याः तस्माद्दिनस्यांत्याः पंचघटिकाः पुण्यतमाः। विशे
षपुण्यदा इति। तथा निशि मृगे मकरसंक्रमे यदाकदापि सति अंत्याहस्तस्या
र्धं पूर्वार्धं तदाद्यास्तस्य पूर्वाः पंचघटिकाः पुण्यतमाः विशेषफलदाः। तथा वाज
पेयिनः। निशीथादुत्तरमपि कर्के पूर्वदिनोदयात्। जाते परदलं पुण्यं पूर्वस्याद्
स्तथाङ्गपे। अर्धरात्रात्पूर्वमपि सूर्यास्तमयतः परं। जाते पूर्वदलं पुण्यं परस्या

का०नि० ९५

न्हस्तथार्पणे। पूर्वोत्तरदिनांस्पार्द्धपंचनाड्यस्तथोत्तमा।। भविष्योत्तरे। मिथुनात्कर्क
संक्रांतिर्यदास्याद्धंशुमालिनः। प्रभाते वा निशीथे वा कुर्यादहनि पूर्वतः। कार्मुकं तुप
रित्यज्य मकरं याति भास्करः। प्रदोषे वार्धरात्रे वा स्नानं दानं परेहनि। अर्धरात्रे त
दूर्ध्वं वा संक्रांतौ दक्षिणायने। पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविरिति। अन्ये तु। पुण्यं
अयनक्रांतौ कर्कमकरसंक्रांतौ कश्चिद्राव्यंतरा रात्रिमध्य एव स्नानदानाद्य
हः। मकरकर्कटरात्राव प्याचारादनुष्ठितिरिति माधवः। गोभिलः। राहुदर्शनसंक्रां
तिर्विवाहात्ययवृद्धिषु। स्नानदानादिकं कुर्यन्निशि काम्यव्रतेषु चेति। मनुः। ग्र
हणोद्वाहसंक्रांतियात्रार्त्तिप्रसवेषु च। श्रवणे चेतिहासस्य रात्रौ दानं प्रशस्यते।
तत्पुनर्यदोत्तरभागक्रांतौ सूर्यास्तासन्नत एव पुण्यसमयः। पूर्वभागसंक्रांतौ तम
तोउदयासन्न एव समयस्तदा प्रागुत्तरकालयोः स्नानदानादिस्यात्। तथा च ९५
कालतत्वविवेचने। यदा तु पूर्वभागिन्युदयात्क्षमनंतरं। एवमुत्तरभागिन्यस्त

५

९७ रोगंपितृपूर्विकांतकमथद्वीशानलेमिश्रके। हस्तोऽश्विभिजिल्लघुर्मृग। धीरश्चित्रांसमैत्रंमृदु
ज्येष्ठाऽऽर्द्रोरगमूलमेतुदुदितंतीक्ष्णंशशीनारतः। एतदुक्तंनामसप्तकं। शशी। इनः। सूर्यः। आ
रोभौमस्तात्क्रमेणज्ञेयं। शशीचरः। रविर्ध्रुवः। भौमः क्रूरः। सौम्योमिश्रः। जीवोलघुसंज्ञः।
शुक्रोमृदुसंज्ञः।। शनिस्तीक्ष्णः। अथासांसंक्रांतीनांनामानिज्योतिःशास्त्रे। सूर्येघो
राविधोध्वांक्षीभौमवारेमहोदरी। बुधेमंदाकिनीनाममंदासुरगुरौहिता। मिश्रितामृ
कवारस्याद्राक्षसीचशनैश्चरे। मंदाध्रुवेषुविज्ञेयामृदौमंदाकिनीतथा। क्षिप्रेध्वांक्षी
विजानीयाद्घोराक्रूरप्रकीर्तिता। चरेमहोदरीज्ञेयातीक्ष्णेकष्टेतुराक्षसी। मिश्रिताचे
वनिर्दिष्टामिश्रधिष्ण्येषुसंक्रमादिति। अथासांसंक्रांतीनांववादिकरणवशाद्वाहना
निसंति। तानियथा। सिंहव्याघ्रादि। ववतः एकादशसुकरणेषुरवेः संक्रमवाहनंक्रमात्।
ववेसिंहः।१ बालवेव्याघ्रः।२ कौलवेवराहः।३ तैतिलेरासभः।४ गरेगजः।५ वणिजि
कालीस्कंतोमहिषः।६ विष्टौक्रमाश्वः।७ शकुनिकरणेश्वाकुक्कुरः।८ चतुष्पदेजः
छागः नागेगोवृषभः।१० किंस्तुघ्नेकुक्कुटः।११ तथाचज्योतिःशास्त्रे। सिंहोबवेगरेहस्ती ९८

व्याघ्रोबालवसंज्ञके। वराहः कौलवेवाहोमाहिषोवणिगाह्वये। रासभस्तैतिलेविष्टौवश्वः
श्वाशकुनौस्मृतः। चतुष्पदेवृषोनागेकिंस्तुघ्नेकुक्कुटोरवेः। वाहनानिववाद्येषुनाश
नादुःखिंजीवनमिति। इतिनिर्णयसिंधौतेरवेसंक्रमणकालनिर्णयः।१०५। अथा
न्यग्रहसंक्रमणस्नानदानकालनिर्णयमाह। प्राश्चांकप्रतवचरस्यसंक्रमणतः पु
ण्यप्रदानाडिकाप्यकाक्षिचफलाविधोः।१।१२। क्षितिस्कृतस्यैवचतस्रो।४। मताः ति
स्रःसाप्रयइंदुजस्य।३।१५। चगुरोःसार्धाब्धयोनाडिका।४।३० शुक्रस्याब्धिमिताश्च।४।
षोडशशनेः१६ दीनार्चनेतुष्ट्यै।१०६। व्याख्या। रवचरस्यचंद्रादिग्रहस्यसंक्रमणेराश्यं
तरप्राप्तौप्राक्पश्चाद्वक्ष्यमाणानाडिकाः पुण्यदा। अोकाः तोःकाः। विधोःसंक्रमणात्प्रा
क्पश्चाद्विश्वमितास्त्रयोदशफलान्विताघटिकैकास्नानार्चनेपुण्यदा।१।१२। एवंक्षि
तिसुतस्यभौमस्यचतस्रोघटिकाः।४। इंदुजस्यबुधस्यसाप्रयः सपादाःतिस्रोनाड्यः।३।१५
गुरोःसार्धाब्धयोऽर्धाधिचतस्रोनाडिकाः।४।३० शुक्रस्याब्धिमिताश्चतस्रोनाड्यः।४।
शनेरवषोडशनाड्यः पुण्यदाः। अत्रकालेदानमर्चनंचग्रहाणांतुष्ट्यैभवति। प्राक्प

का॰नि॰ ९८

श्चादित्तिसर्वत्रानुषज्जति। तथाचजैमिनिः। नक्षत्रराश्योरविसंक्रमेस्यूरवोक्परत्रापिरसं
ङ्गुनाड्यः १६। पुण्यस्तथेंदोस्त्रिधराफलैर्युगंकेवनाडी। १।१३। मुनिभिः शुभोक्ता। नाड्यश्च
तस्त्रः सफलाः कुजस्य ४।२। बुधस्यतिस्त्रोमनवः फलानि। ३।१४। सार्धाश्चतस्त्रः पलसप्तयु
क्तागुरोश्च। ४।३७। शुक्रेसपलाश्चतस्त्रः ४।१ द्विनागं ९ नाड्यः फलसप्तयुक्ताः शनैश्चरस्य। १६।७।
भिहिताः सूक्ष्मण्याः। अत्रदानार्चनेसूर्यादिग्रहणांतुष्ट्यैसंतोषाय भवतः। एतदुक्तं
भवति। गोचरेग्रहातुष्टाभवंतितदादानंपूजनंचकर्तव्यं। तेनतुष्ट्यैश्चभायभवंति। तदुक्तंज्यो
तिःशास्त्रे। नानाविधैःसज्जपहोमदानैःसर्वग्रहास्थंदुरितंनिहंतीति। तत्रादौसूर्यसंक्रमणे
दानान्युक्तानितानिसामान्यतोयथा। विश्वामित्रः। मेषसंक्रमणेभानोर्मेषदानमहाफलं।
वृषसंक्रमणेप्रोक्तं गवांदानंतथैवच। वस्त्रान्नपानदानानिमिथुनेकेहितानिच। घृतधे
नुःप्रदातव्याकर्कटेपिविशेषतः। सस्वर्णछत्रदानंसिंहेपिविहितंसदा। कन्याप्र
वेशेवस्त्राणांवेश्मनांदानमेवच। तुलाप्रवेशेतिलागोरसानांमहावचोमहाप्टदो। वृ
श्चिकेचलितेभानोर्दीपदानंमहाफलं। धनुःप्रवेशेवस्त्राणांयानानांचमहाफलं। मकर ९८

(८)

हस्तात्पूर्वमेवच। जायंतेतत्रसामान्यवचनप्राप्तयोरपि। कालयोकतरस्याचोर्ग्रहः
स्नानादिकर्मस्विति। अथवारक्षवशात्संक्रांतिनामान्याह। घोराक्रूरभसूर्ययोः
शशिदिनेध्वांक्षीलघुडुष्वपि२क्षोणिजेचरभेमहोदरयुता३मंदाविनीसौम्यभे। ३०४
मत्रक्षसे४ध्रुवजीवयोर्निगदितामंदा५मृगेमिश्रभेमिश्रा६तीक्ष्णभसूर्यसूनुदि
वसंक्रांतिषु घोरराक्षसी। सिंह१ व्याघ्र२ वराह३ रासभ४ गजाः५ कालीसुतो६ श्वो७ क्रमात्स्या८
त्रौ९ गोः खलु कुर्कुटः ११ श्यचवक्तोवाहारवेःसंक्रमे। १।३०५। साधस्यव्याख्या क्रूरभेषुतथा
सूर्यवारयासंक्रांतिस्तन्नामघोरेति। लघुडुषुतथाशशिदिने ध्वांक्षीतिनाम२ चरभेचरनक्ष
त्रेषुक्षोणिजेभौमवासरेमहोदरयुतामहोदरीतिनाम३मृदुक्षेमृदुनक्षत्रेतथासोमजेबुध
वारेमंदाकिनीसंक्रांतिः। ४ ध्रुवभेषुजीववारेमंदासंक्रांतिः। ५ मृगेमिश्रेभेमिश्राभेमिश्रा ६ ती
क्ष्णभेषुसूर्यसूनोवारेशनिवारक्रांतिःसंक्रांतिः। राक्षसीतिनिगदिता। यदाक्रूरभवार
योगसंक्रांतिस्तदातुतद्वघोराख्यैकमेवनाम। यदावारक्षयोर्भेदस्तदावारवशाद्भिन्ननाम
भवति। नक्षत्राणांक्रूरादिसंज्ञोक्तिःशास्त्रे। स्वासादियहस्त्रियंचरचलंधात्रोत्तराध्रुवस्थिराक्रू

वेशेदारुणांदानमग्नेस्तथैवच।कुंभप्रवेशेदानंतुगवामंबुघटस्यच।मीनप्रवेशेस्थानानांमा
लानामथस्थापनमिति।एतानिपुण्यार्थंहस्यानि।अधुनासूर्यादिग्रहदुष्टपूजाकार्या।दान
कार्यं।तत्रजातकाभरणे।माणिक्यगोधूमसवत्सधेनुःकौसुंभवस्त्रंगुडहेमताम्रं।आ
रक्तकंचंदनमंबुजंचवदंतिदानंहिविरोचनाय॥१॥ सत्कांस्यपात्रस्थिततंडुलांश्चक
र्पूरमुक्ताफलशुभ्रवस्त्रं।युगोपयुक्तंवृषभंसरोप्यंचंद्रायदद्याद्घृतपूर्णकुंभं॥२॥प्रवा
लगोधूममसूरिकाश्चवृषारुणश्चापिगुडःसुवर्णं।आरक्तवस्त्रंकरवीरपुष्पंताम्रंहि
भौमायवदंतिदानं॥३॥चैलंचनीलंकलधौतकांस्यंमुद्गाज्यगारुत्मतसर्वपुष्पं।दासीच
दंतोद्विरदस्यनूनंवदंतिदानंविधुनंदनाय॥४॥शर्कराचरजनीतुरंगमःपीतधान्यमपि
पीतमंबरं॥पुष्परागलवणंचकांचनंप्रीतयेसुरगुरोःप्रदीयतां॥५॥चित्रांबरंशुभ्रतर
स्तुरंगोधेनुश्चवज्रंरजतंसुवर्णं॥सुतंडुलान्योत्तमगंधयुक्तंवदंतिदानंभृगुनंदनाय॥६॥
माषाश्चतैलंविमलेंद्रनीलतिलाःकुलित्थामहिषीचलोहं॥सदक्षिणंचेतिवदंतिदानंदु
ष्टायनूनंरविनंदनाय॥७॥गोमेदरत्नंचतुरंगमश्चसुनीलचैलानिचकंबलश्च।तिला

श्वतैलं खलु लोहमिश्रं स्वर्भानवे दानमिदं वदंति ॥८१॥ वैडूर्यरत्नं सतिलं च तैलं सुकंबलं श्वा
पिमदो भृगस्य ॥ शस्त्रं च केतोः परितोषहेतोरुदीरितं दानमिदं मुनींद्रैः ॥८२॥ दानांते
दक्षिणा देया ॥ तथा च वासिष्ठ्यां ॥ धेनुः शंखः२ स्तथानड्वा३ न्हेम४ वासो५ हयः६ क्रमात् ॥
कृष्णा गौरायसं छाग९ एता वै दक्षिणाः स्मृताः ॥ इति ग्रहसंक्रमनिर्णयः ॥१०६॥
अथ ग्रहणकालनिर्णयमाह ॥ सूर्येंदुग्रहणे सर्वं गांगं जलवद्व्यासोपमा वाडवाः
स्पर्शे स्नानमथांतरा हवनकं स्यान्मुच्यमाने परं रात्रावप्यशितं स्वपित्र्यय
नं चंद्रोपरागे स्मृतं स्नानं दानमथैतयोर्निगदितं शावेपियोनसति ॥१०७॥
व्याख्या ॥ सूर्येंदुग्रहणे ग्रासे सर्वमप्यंबु गांगजलवत् ॥ गंगायाः इदं गांगं तत्
जलं तत्तुल्यमित्यर्थः ॥ तथा च कात्यायनः ॥ स्वर्धुन्यंभःसमानि स्युः सर्वाण्यंभां
सि भूतले ॥ कूपस्थान्यपि सोमार्कग्रहणे नात्र संशय इति ॥ सूर्येंदुग्रहणका
ले सर्वे वाडवाः ॥ विप्राः व्यासोपमाः ॥ वेदव्यासतुल्या इत्यर्थः ॥ सर्वं गंगासमं
तोयं सर्वे व्याससमा द्विजाः ॥ सर्वं भूमिसमं दानं ग्रहणे चंद्रसूर्ययोरिति ॥ अ

यनेन।आपद्यनग्नोतीर्थैचचंद्रसूर्यग्रहेतथा।आमश्राधंप्रकुर्वीतहेमश्रा
१०० धमथापिवा।तत्रपिंडदानेनियममाह।दासीदासीसुतोवाभवतियदिकु
लेमित्रपुत्रोपिभृत्यः।कुर्यात्पिंडप्रदानंग्रहणमुपगतेभास्करेशीतगौवा।यां
छन्नक्षीणलोकान्सपदिचपितरः।किंपुनःपुत्रपौत्रस्तस्मात्कुर्वीतपिंडंगुडस
हिततिलैःकिंकृतैःकोटिपिंडैरितिमरीचिः।तत्रचंद्रोपरागेरात्रावपिश्राधंक
र्तव्यमित्याह।रात्रावप्यशितस्येति।रात्रौअशितस्यापिदिवाभुक्तस्यापि
पितृयजनंश्राद्धंकर्तव्यंतयोक्तं।संध्यारात्रौनकर्तव्यंश्राधंखलुविचक्षणैः।त
योरपिचकर्तव्यंयदिस्याद्राहुदर्शनमितिशातातपवचनात्।मुक्तेस्नानं
विधीयीतइतिवचनान्मुक्तोस्नानंनित्यमेवकार्यं।ग्रहणेशावमाशौचंविमु
क्तोसौतिकंस्मृतं।तयोःसंपत्तिमात्रेणअपस्पृश्यक्रियाक्रमेति।विमुक्तौ १००
यदिनस्नायाद्ग्रहणेचंद्रसूर्ययोः।तस्यतावदशौचंस्याद्यावत्स्याद्परोग्र

हइतिब्रह्मवैवर्तेवचनाद्उभयतःसचेलंस्नानमावश्यकं।ग्रहणकालेयो
नेशावाशौचंवासतस्तत्रापिस्नानादिकर्तव्यमेवेत्याह।स्नानंदानमिति।एतयो
श्चंद्रसूर्योपरागयोर्यनियोनित्संबंधेजातकाशौचेशावेशावसंनंधिमृता
शौचेवासत्यपिस्नानंदानंश्राधंवापिभवत्येव।तदुक्तंलिंगपुराणे।चंद्रसू
र्यग्रहेस्नानायासूतकेमृतकेपिवा।अस्नायीमृत्युमाप्नोतिस्नायीमृत्यु
नविंदति।मृत्युपापे।सूतकेमृतकेचैवनदोषोराहुदर्शने।तावदेवभवेत्शु
द्धिर्यावन्मुक्तिर्नदृश्यते।यद्यपिग्रहणेसामान्यस्नानमुक्तं।तत्रविशेषउ
च्यते।।वापीकूपनदातोयेषुगिरिप्रस्रवणेषुच।नद्यांनदेदेवखातेसरसीषुधृ
तांबुनि।उष्णोदकेपियास्नायाद्ग्रहणेचंद्रसूर्ययोः।रितिशंखोक्तेः।।उत्त
तादुत्तरोत्तरंप्राशस्त्यमुक्तं।।तत्रमार्कंडेयः।।भूमिस्थमुद्धृतात्पुण्यंततः

का॰नि॰ त्रस्नवयोरदकं॥ ततोपि सारसं पुण्यं ततः पुण्यं नदीजलं॥ तीर्थं पुण्यंतत
१०१ तोयं ततः पुण्यं माहानद्यंबु पावनं॥ ततस्ततोपि गंगांबु पुण्यं स्या
च्च ततोऽबुधैः॥ शीतमुष्णोदकात्पुण्यमपारक्यं परोदकादिति।
व्यासः॥ चंद्रसूर्यग्रहे चैव यावगाहेत जाह्नवीं॥ सस्नातः सर्व
तीर्थेषु किमर्थं भटते महीमिति॥ यत्तूष्णोदकेन स्नानमुक्तं
तदातुरविषयमेव। तत्रव्याघ्रः॥ आदित्यकिरणैः पूतं पुनः
पूतं तु वह्निना॥ ऋतेव्याधिं तु न स्नायाद्ग्रहणेप्युष्णवारिणे ११०
ति। यमोपि॥ मृतेजन्मनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः॥ अ

१०

थ स्पर्शेस्नानंकार्यं॥ अंतरामध्ये हवनं होमादि। मुच्यमाने तर्पणं दानं देयं। विमुक्ते स्नानं
च। स्पर्शे स्नानं जपं कुर्यान्मध्ये होमं सुरार्चनं। मुच्यमाने सदा दानं विमुक्ते स्नानमाच
रेदिति। मुच्यमाने सदा दानमित्युक्तेर्ग्रहणे दानस्य नियतता प्राप्ता। तत्रापात्रसत्पात्रवि
प्यावश्यकं॥ न पात्रापात्रविवेकोस्ति॥ बौधायनः॥ अश्रोत्रियः श्रोत्रियो वा पात्रमपा
त्रमेव वा। विप्रब्रुवोपि वा विप्रो ग्रहणे दानमर्हति। दक्षस्मृतौ॥ समम ब्राह्मणे दा
नं द्विगुणं ब्राह्मणब्रुवे। श्रोत्रियेशतसाहस्रं पात्रे त्वानंत्यमश्नुते॥ अब्राह्मणो जाति
मात्रब्राह्मणः संस्काररहितः॥ ब्राह्मणब्रुवस्तु गर्भाधानादिसंस्कारवेदोपनयनेन यु
तः॥ नाध्यापयति नाधीते स भवेद्ब्राह्मणब्रुवः॥ श्रोत्रियः सर्वसंस्कारपूर्वं वेदाध्ययं
नवान्। पात्रं तूक्तं याज्ञवल्क्येन॥ न विद्यया केवलया तपसा वापि पात्रता। यत्र वृ
त्तमिमे चोभे तद्धि पात्रं प्रकीर्तितमिति। अत्र श्राद्धाकरणे प्रत्यवायः स्मर्यते। सर्वस्वे
नापि कर्तव्यं श्राद्धं वै राहुदर्शने॥ अकुर्वाणस्तु नास्तिक्यात्पंके गौरिव सीदतीति म
हाभारतवचनान्नित्यत्वं॥ ग्रहणकाले श्राद्धमामेन हेम्ना वा कर्तव्यं॥ तथा चोक्तं कास्से

स्पर्शस्पर्शे नैव चैव न स्नायाद् कृष्णवारिणेति १०७ ॥ अथ ग्रहणे दृ
ष्टेऽदृष्टे विचारमाह ॥ नो दृष्टं यदि वारिदाभ्रपिहितं तत्राप्लवाद्येन वास्या
द्बंधस्य तथा ग्रहांतसमयेऽन्नं पक्कमुक्ते स्तदा ॥ सौराद्यामचतुष्टये न
हि भुजिश्चांद्रात्त्रियामे पुराऽह्न्याप्ते पंचभिरंत्यभागयुगले दृश्या तुरा
भोदिषु ॥ १०८ ॥ व्याख्या ॥ यदि वारिदो मेघस्तेन वाऽभ्रेणापिहितं
मा छादितं चंद्रसूर्यग्रहणं नो दृष्टं दृग्गोचरीभूतं न ॥ तदाप्लवादि स्ना
नाद्यं न स्यात् ॥ तत्र मार्कंडेयः ॥ चंद्रे वा यदि वा सूर्ये दृष्टे राहौ महाग्रहे ॥
अथ क्षयं कथितं पुण्यं तत्रार्के तु विशेषतः इति ॥ अत्र दृष्टादृष्ट इति
चाक्षुषव्यापारः ॥ न तु शास्त्रादितो व गतिः ॥ तथा सति राज्ञो सूर्यस्य

कालनि हादिवा चंद्रग्रहे भास्वा। दवगतेपि स्नानं न विधेयं॥ तत्र षट्त्रिंशन्मते। सूर्यग्रहो
३०२ यदा रात्रौ दिवा चंद्रग्रहस्तथा॥ तत्र स्नानं न कुर्वीत दद्याद्दानं च न क्वचिदिति। अं न
धस्य तथा स्यादेव। अंधस्य दृष्टेरभावात्स्नानादि न स्यादिति केचित्तन्न। तत्रोच्यते।
वास्यादेव। तद्बलादेवपूर्वोक्तप्रकारेण तस्यांगत्वं॥ तथापि सोऽपूर्वविधिस्तावन्न
संभवति। निमित्तज्ञानतया दर्शनस्य पक्षे प्राप्तत्वात्॥ किं तर्हि निमित्तज्ञानस्या
धिकारसंपादकस्यानेकरूपस्य संभवात्पक्षे प्राप्तस्य दर्शनस्य नियमविधि
रयं। अवघातादिविधिवत्॥ ततश्च नैमित्तिके दृश्यग्रहणांगहीनेनाप्यधि
कारस्य न्यायसिद्धत्वादंधानां मेघाद्यावरणे चाशक्यदर्शननियमरू
पांगासंभवेपि स्नानादिनाऽयुक्तमिति॥ नेष्ट हानिः॥ ३०२
ग्रहणां नरितं पूर्वपक्षमन्ये नभोक्तव्यमित्याह॥

मध्याह्ने मध्याह्ने न तु संगवे ॥ भुंजीत संगवे चेत्स्यान्न पूर्वभुजि मार्गे चेत् इति ॥ अस्या
१०३ र्थः ॥ सायाह्ने ग्रहणं चेत्तदाऽपराह्णे भोजनं निषेधः ॥ अपराह्णे ग्रहणं चेत्तदा मध्याह्ने भो
जननिषेधः ॥ मध्याह्ने ग्रहणं चेत्तदा संगवे भुजि निषेधः ॥ संगवे ग्रहणं चेत्तदा ग्रहणा
नंतरं भोजनमिति ॥ ग्रहणकाले भोजने ब्रह्मपुराणे ॥ नाश्नीयात्तत्र तत्काले ग्रस्ते
यो श्चंद्रसूर्ययोः ॥ मुक्ते यो श्च कृतस्नानः पश्चाद्भुज्यात्स्ववेश्मनीति ॥ स्ववेश्मनीत्यने
न परान्नभोजननिषेधो द्योत्यते ॥ १०८ ॥ अथ ग्रस्तोदयग्रस्तास्तयोर्निर्णयमाह ॥
ग्रस्ते दोश्च समुद्गमे न हि दिने भुक्तिस्तु मुक्तेः परा ग्रस्तेऽस्ते तरणौ दिवा निशमि हा भुक्तिः
पराह्ने भुजिः ॥ ग्रस्तेऽस्ते हिमगोर्दिने निरशनं दृष्टे विधौ भोजनं बालाद्येषु दिनाक्षभाग
करणे मुक्ते त्रिभागे भुजिः ॥ १०९ ॥ व्याख्या ॥ ग्रस्ताश्चासौ विंदुश्च तस्य समुद्गमे समु
दये दिने पूर्वं दिवा न भुजिः ॥ तस्येंदोर्मुक्तेः परानंतरं भुक्तिर्भवति ॥ तरणौ सूर्ये ग्रस्तेऽस्ते
ऽस्तमिते दिवा निशमहोरात्रमभुक्तिर्भोजनाभावः ॥ प्रस्तुत पराह्णे परेद्युर्भुजिर्भोजनं ॥ ९

हिमगौ चंद्रे ग्रस्तेऽस्तमिते दिने ग्रस्तास्तानंतरदिने निरशनं ॥ दृष्टे विधौ भोजनमिति ॥ तदुक्तं शा
तातपेन ॥ ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत् ॥ ग्रस्तावेवास्तमानं तु रवींदू प्राप्नुतो य
दि ॥ तयोः परेद्युरुदये स्नात्वाभ्यवहरेन्नर इति ॥ यत्तु वचनं ॥ सायाह्ने संगवे श्नीयाच्छारदे सं
गवारधः ॥ मध्याह्ने परतोऽश्नीयान्नोपवासो रविग्रहे इति तत्तु ग्रहणप्रहरात्प्राक्प्रहरमेकं
ग्रहणप्रहरात्पश्चात्प्रहरमेकं च सकामो भुंजीतेति पुत्रवद्गृहिविषयं ॥ संक्रांतावुपवासं च कृ
ष्णैकादशिवासरे ॥ चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्गृहीति नारदोक्तेः ॥ यत्तु चं
द्रग्रस्तोदये मुक्त्यनंतरं भोजनं तन्महानिशातः पूर्वमिति द्रष्टव्यं ॥ मुक्ते शशिनि
भुंजीत यदि न स्यान्महानिशेति शातातपोक्तेः ॥ चंद्रग्रस्तेऽस्ते बालादीनां विशेषमा
ह ॥ बालाद्येष्विति ॥ दिनमानस्याक्षभागः पंचमोंऽशः पंचधा विभक्ते दिने मुक्ते मुक्त्य
नंतरं त्रिभागे बालादीनां भुजिः स्यात् ॥ एतदुक्तं भवति ॥ चंद्रग्रस्तोऽस्तं यावदुदयका
लमभोजनेनावस्थातुमसमर्थानां बालादीनां शास्त्रावगमे मुक्तिकालप्रभृत्याहर्भो
गांतरं भागद्वयमेकभागे वास्त्रकाभोजनं भवति ॥ एवं बालादीनां रात्रिप्रथमदिति

का- १०४

पथमभागगते चंद्रग्रहे रात्रेरपि पंचभागगते कालग्रहणकालभुक्तभागाधि
कत्रिमुहूर्तात्मके कभागत्रये रविग्रहणवद्भोजननिषेधकालो द्रष्टव्यः ॥ १०९ ॥ ॥
चंद्रग्रहे तु यामास्त्रीन्निषेधेत् तद्वचने विशेषमाह ॥ ॥ रात्र्याद्यार्धे शशिग्रहे परदले रात्रेःपु
राहर्दले यात्रिप्रहरं भुंजि ग्रहणजे काले भुंजीत कृच्छ्रतः ॥ शुद्धिस्तद्धनतो निषिद्धसमये यद्योग्रा
सपूर्वेदिने प्रोपोष्य ग्रहमोक्षमध्यतउपस्थानं जपाज्जीयते ॥ ११० ॥ व्याख्या ॥ रात्रेराद्या
र्धे शशिग्रहणे पुराहर्दले दिनस्य पूर्वार्धमध्ये भोजनमित्यर्थः ॥ रात्रेः परदले शशिग्रहणे
यावत्त्रिप्रहरं । दिवसस्य तृतीयप्रहरं यावत्तावद्भोजनमिति ॥ ग्रहणं च भवेदिंदोः प्रथ
मादधियामतः ॥ भुंजीतावर्तनात्पूर्वं प्रथमे प्रथमादध इति मार्कंडेयोक्तेः ॥ अस्यार्थः ॥
प्रथमयामादधि । रात्रिद्वितीयप्रहरे चंद्रग्रहणे तदवधिको रात्रिप्रथमप्रहरकः ॥ आवर्त्त
नोत्तरकालीनं च दिनसंबंधितृतीयचतुर्थात्मकप्रहरद्वयमेतत्प्रहरत्रयेन भोक्तव्यं ॥ रा
त्रिप्रथमप्रहरे ग्रहणे तस्मिन्दिनसंबंधिन्येव द्वितीयतृतीयचतुर्थात्मकप्रहरत्रयेन भोक्त १०४
व्यमिति ॥ पद्मपुराणेपि ॥ अर्धरात्रादधश्चोर्ध्वे यदा चंद्रग्रहो भवेत् ॥ पूर्वं पूर्वं न भोक्तव्यमु
त्तरे चोत्तरे पिबेत् इति ॥ अधो मध्यरात्रादधः ॥ प्रथमद्वितीयप्रहरे । ऊर्ध्वे तृतीयचतुर्थे प्रह २

रहांतसमय इति ॥ ग्रहांतसमये पूर्वं पक्वमन्नं संदेवो ऽश्नात् ॥ वसिष्ठः ॥ सर्वेषामेव वर्णानां
सूतकं राहुदर्शने ॥ सचेलं च भवेत्स्नानं सूतकान्नं च वर्जयेत् ॥ स्नात्वा कर्मणि कुर्वीत
शृतमन्नं विसर्जयेदिति वचनात् ॥ तत्र कश्चित्के प्रतिप्रसवमाह ॥ आरनालं तथा क्षीरं घृतं
क्षीरं लाटसक्तुकः ॥ स्नेहपक्वं च तैलं च कदाचिन्नापि दुष्यति ॥ आरनालं च तक्रं च दध्यादेयं
घृतपाचितं ॥ उदकं च कुशछन्नं न दुष्येद्राहुदर्शने इति ॥ अथ ग्रहणकालात्पूर्वं ग्र
हणकाले वा भोजननिषेधमाह ॥ सौरादिति ॥ सौरात्सूर्यग्रहणात्पूर्वं यामचतुष्ट
ये भुंजिः ॥ भोजनं न स्यात् ॥ चांद्रात् चंद्रग्रहणात् सुरात्रियामे भुंजिने ॥ तदुक्तं महाभा
रते ॥ अर्वाग्यामत्रयादिंदोर्ग्रहणे भुंजिमाचरेत् ॥ चतुर्यामादधश्चैव राहुग्रस्ते दिवाक
रे ॥ एवं वसिष्ठोपि ॥ सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयं ॥ चंद्रग्रहे तु यामांस्त्रीन्बाल
वृद्धातुरैर्विनेति ॥ तत्र बालादीनां विशेषमाह ॥ अह्नि दिनमाने पंचभिर्भक्ते यो भाग
स्तादृशांसभागद्वये बालव्याधितवृद्धेषु भुंजिर्न स्यात् ॥ अन्यत्र पर्व त्रिभागस्तु स्यादेव ॥
अर्भो बालः ॥ तथा च मार्कंडेयः ॥ सायाह्ने ग्रहणं चेत्स्यादपराह्ने न भोजनं ॥ अपराह्णे न

रे॥ पूर्वत्रपूर्वाह्णे प्रथमद्वितीयप्रहरयोः॥ उत्तरेतत्र्यपरार्धे॥ उत्तरे दिने उत्तरभागे तत्तृतीय
प्रहरे एव भोक्तव्यमित्यर्थः॥ ग्रहणसमये तत्पूर्वापरकाले च भोजने काले प्रायश्चित्तमाह॥
ग्रहणजे काले भुंजो भोजने कृते कृछ्रतः प्राजापत्येन शुध्यति॥ पूर्वापरनिषिध्यकाले भोजने कृते
तदर्द्धतः अर्द्धप्राजापत्येन शुध्यतिरिति॥ तथा च षट्त्रिंशन्मते॥ चंद्रसूर्यग्रहे भुक्त्वा प्राजाप
त्येन शुध्यति॥ तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेण विशुध्यति॥ ग्रहणोत्तरनिषिध्यकालस्तु
यस्तास्तविषयः॥ बालादीनां तदर्धं॥ इति ग्रहणे भोजननिर्णयः॥ अथ ग्रहणे पुरश्चरणं॥
अथ ग्रासपूर्व दिनेति॥ ग्रासपूर्व दिने उपोष्य ग्रहणदिने स्पर्शादारभ्य मोक्षांत जपादुपरश्च
नं पुरश्चरणं जायते॥ तदुक्तं॥ ग्रहणे कस्य वेदो वा शुचिः पूर्वमुपोषितः॥ ग्रहणादि विमो
क्षांतं जपेन्मंत्रं समाहितः॥ अनंतरं दशांशेन क्रमाद्धोमादिकं चरेत्॥ तदंते महतीं पूजां
कुर्याद्ब्राह्मणभोजनं॥ ततो मंत्रस्य सिध्यर्थं गुरुं संपूज्य तोषयेत्॥ एवं च मंत्रसिद्धिः स्या
द्देवता च प्रसीदति॥ अथ वान्यः प्रकारोयं पौरश्चरणिको विधिः॥ चंद्रसूर्योपरागे च स्ना
त्वा प्रयतमानसः॥ स्पर्शादि मोक्षपर्यंतं जपेन्मंत्रं समाहितः॥ जपाद्दशांशतो होमं तथा

का॰ होमाच्चतर्पणं॥ तर्पणस्य दशांशेन मार्जनं कथितं किल॥ मार्जनस्य दशांशेन ब्राह्मणानपि भो-
१०५ जयेत्॥ जपोचीपूर्वको होमस्तर्पणं चाभिषेचनं॥ भूदेवपूजनं पंचप्रकारैश्च पुरस्क्रियेति।
तर्पणाभिषेकौ तु॥ मूलमंत्रं समुच्चार्य तदंते देवतां भि धां॥ द्वितीयांतामहं पश्चादभिषिंचा-
म्यनेन च॥ तोयैरंजलिरुद्ध्यैरभिषिंचेत्तु मूर्धनि॥ एवं कृते तु मंत्रस्य जायते सिद्धिरुत्तमा॥
होमाशक्तो जपं कुर्याद्धोमसंख्याचतुर्गुणं॥ षड्गुणं वाष्टगुणितं यथासंख्यं द्विजातितः॥ तेषां
स्त्रीणां तु विज्ञेयस्तेषामेव समो जपः॥ पवर्णमाश्रितः शूद्रस्तज्जपस्तस्य कीर्तितइतिपुरश्च-
रणविधिः॥ ग्रहणे मंत्रदीक्षा गृह्यते चेत्तत्र यथा॥ सत्तीर्थेर्कविधोर्ग्रस्ते तंतुदामनपर्वणोः
मंत्रदीक्षां प्रकुर्वाणो मासर्क्षादी न शोधयेत्॥ चंद्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे सुरालये॥ मंत्र-
मात्रप्रकथनमुपदेशः स उच्यत इति॥ ग्रहणे वारविशेषेण चूडामणियोग उक्तः॥ व्यासः॥ सू-
र्यवारे रवेर्ग्रासः सोमे सोमग्रहस्तथा॥ योगश्चूडामणिरिति तत्रानंतफलं भवेत्॥ वारेष्वन्ये-
षु यत्पुण्यं ग्रहणे चंद्रसूर्ययोः॥ तत्पुण्यं कोटिगुणितं योगे चूडामणौ स्मृतमिति॥ अथ मासविशे-
षे ग्रहणे तीर्थविशेषसंबंधेन फलातिशय उक्तो देवीपुराणे॥ कार्तिके ग्रहणं श्रेष्ठं गंगायमु-
नसंगमे॥ मार्गे तु ग्रहणं पुण्यं देविकायां महामुने॥ पौषे तु नर्मदा पुण्या माघे सन्निहिता शु- १०५

का॰सि॰ धीं कुसितसर्षपगुग्गुलून् देवदारु मधूकं च विष्णुक्रांता शतावरी ॥ बला च सहदेवी च निशाद्वित
१०६ यमेव च ॥ गजाश्वरथवल्मीकसंगमह्रदगोकुलात् ॥ राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ॥ ए
तत्सर्वं विनिक्षिप्य कुंभेष्वावाहयेत्सुरान् ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥ आयांतु यज
मानस्य दुरितक्षयकारकाः ॥ योसौ वज्रधरो देव आदित्यानां प्रभुर्मतः ॥ सहस्रनयनश्चंद्रग्रह
पीडां व्यपोहतु ॥ १ मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः ॥ चंद्रोपरागसंभूतामग्निः पीडां व्यपो
हतु २ यः कर्मसाक्षी लोकानां धर्मो महिषवाहनः ॥ यमश्चंद्रोपरागोत्थां तव पीडां व्यपोहतु ३ र
क्षोगणाधिपः साक्षी नीलांजनसमप्रभः ॥ खड्गहस्तोतिभीमश्च ग्रहपीडां व्य० ४ नागपाशधरो देवः
सदा मकरवाहनः ॥ स जलाधिपतिश्चंद्रग्रहपी० ५ प्राणरूपो हि लोकानां सदा कृष्णमृगप्रियः ॥
वायुश्चंद्रोपरागोत्थां मम पीडां व्य० ६ योसौ निधिपतिर्देवः खड्गशूलगदाधरः ॥ चंद्रोपरागकलु
षं धनदो मे व्य० ७ योसौ चंद्रधरो देवः पिनाकी वृषवाहनः ॥ चंद्रोपरागजं पापं विनाशयतु शंक
र ८ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ॥ ब्रह्मविष्ण्वर्करुद्राश्च दहंतु मम दुष्कृतं ॥ एवमावा
हयेत्कुंभे मंत्रैरेभिश्च वारुणैः ॥ एतानेव च मंत्रांश्च स्वर्णपत्रे विलेखयेत् ॥ ताम्रपत्रेथवा लिख्य नव १०६
वस्त्रेथवापि च ॥ मस्तके यजमानस्य निदध्युस्ते द्विजोत्तमाः ॥ कलशान् द्रव्यसंयुक्तान्नाना

४

रत्नोपशोभितान् ॥ गृहीत्वा स्नापयेद्भद्रपीठोपरिस्थितं ॥ पूर्वोक्तैरेव मंत्रैश्च यजमानं द्वि
जोत्तमाः ॥ अभिषेकं ततः कुर्यान्मंत्रैर्वारुणसूक्तकैः ॥ ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः ॥
आचार्यं वरयेत्पश्चात्स्वर्णपात्रं निवेदयेत् ॥ आचार्य दक्षिणां दद्याद्गोदानं च स्वशक्तितः ॥ ~~मंत्रमाल्यै~~
~~स्यै~~ अतऊर्ध्वं ब्रह्मपूजां तद्धनविशेषतः ॥ पूजयेद्वस्त्रगोदानैर्ब्राह्मणानपि शक्तितः ॥ गंधमा
ल्यैर्धूपदीपैः पूजयेदिष्टदेवतां ॥ होमं चैव प्रकुर्वीत तिलैर्व्याहृतिभिस्तथा ॥ निवृत्ते ग्रहणे सर्वं
ब्राह्मणेभ्यो विशेषतः ॥ दानं च शक्तितो दद्याद्यदीच्छेदात्मनो हितं ॥ सूर्यग्रहे सूर्यनाम सर्वं
मंत्रेषु कीर्तयेत् ॥ अनेन विधिना यस्तु ग्रहणे स्नानमाचरेत् ॥ न तस्य ग्रहदोषः कदाचिदपि जा
यते इति ॥ अन्यच्च ॥ स्वर्णेन वाथ पिष्टेन कृत्वा सर्पस्य चाकृतिं ॥ ब्राह्मणाय ददेत्तस्य न रोगो दिश्र
सत्कृतः ॥ सर्पस्य सर्पाकारस्य राहोः ॥ मंडलाधिपदेवस्य मंत्रैर्मृत्युंजयादिभिः ॥ होमं कुर्यात्प्रयत्ने
न तत्तन्मंत्राञ्जपेत्सुधीरिति ॥ मंडलानि तत्तन्नक्षत्रगणात्मकानि ॥ तेषामधिपाः अग्निवायुमहे
न्द्रवरुणास्तद्देवताः ॥ मंडलानि यथा ॥ पौष्णं मघा विशाखा च पूर्वाषाढा च कृत्तिका ॥ पूर्वाभा
द्रपदा याम्यमाग्नेयं मंडलं नसत् ॥ पुनर्वस्वश्विनी चित्रा हस्तस्वाती मृगस्तथा ॥ उत्तराफल्गुनी
चेति ७ वायव्यं मंडले तथा ॥ मित्रभं रोहिणी ज्येष्ठा धनिष्ठा श्रवणस्तथा ॥ अभिजिदुत्तराषाढा
७ माहेंद्रं मंडलं शुभं ॥ मूलो पौष्यश्शततारे लेषा पूर्वाषाढा च पुष्पभं ॥ आर्द्रा चित्रि विधोसा ते

का॰नि
१०७

वाहुणंमंडलंशुभं ॥ इतिजन्मराशौग्रहणेसतिस्नानविधिः १९० अथप्रसंगादर्धोदयपर्वकथ्यते ॥
दर्शार्केश्रवणर्क्षपातमिलनंचेत्पौषमाघांतरास्यादर्धोदयसंज्ञयोगएषदिनकृत्सर्वैककोटीसमः ॥ यो
गोयंदिवसेवशोभकपिलाषष्ठीतिभाद्रेऽसिते हस्तेर्केकुजधातृपातयुजितत्तऽर्कग्रासशतस्यापरा १९१
व्याख्या ॥ चेद्यदिपौषमाघसमयोरंतरामध्येमाघादिपौषांतदर्शोऽमावास्या ॥ श्रवणर्क्षं ॥ पातोव्यती
पातः अर्कोरविवारः एतेषांमिलनंयोगस्तदेषोर्धोदयनामयोगः स्यात् ॥ महाभारते ॥ अमार्कपा
तश्रवणैर्युक्ताचेत्पौषमाघयोः ॥ अर्द्धोदयः सविज्ञेयः कोटिसूर्यग्रहैः समः इति ॥ अयंयोगोदिवस
एववरः ॥ यतउक्तं ॥ दिवैवयोगः शस्तोयंनतुरात्रौकदाचनेति ॥ अथभाद्रमास्यसितेपक्षेषष्ठीहस्ते
र्केसति ॥ कुजभौमवारः ॥ धातारोहिणी ॥ पातोव्यतीपातएतेषांयुक्तयोगोयत्रभवतिसाकपिल
षष्ठीतिनाम्नाभवति ॥ साप्यर्कग्रासानांसूर्यपर्वणांशतातितस्याः पराउत्कृष्टाभवति ॥ भाद्रेमा
मास्यसितेपक्षेभानुधिष्ण्येदिवाकरे ॥ पातेकुजेचरोहिण्यांसाषष्ठीकपिलामता ॥ दिवैवयोगः शस्तो
यंसूर्यपर्वशताधिकः ॥ योगोयंस्याद्यदारात्रौचंपाषष्ठीतिसास्मृतेतिस्मृत्यंतरात् ॥ १९१ ॥ ॥
अथकृतादियुगधर्मान्देवांधर्मप्रवक्तृनाह ॥ ध्यानंसत्ययुगेतपस्त्रिचरणेयज्ञस्तथाद्वापरे श्रौ
त्वेदानदयादमाः क्रमतयाकेनाप्युतेशान्यजेत् ॥ वक्तारोमनुगौतमौसलिखितः शंखश्चपारा ३२७
शरोधर्मेस्वेषुचदेशपत्तनकुलान्येकंसृजेत्तातकात् ॥ १९२ ॥ व्याख्या ॥ सत्ययुगेकृतयुगे

ष्णा ॥ फाल्गुनेवरुणापुण्याआषाढेतापिकानदी ॥ श्रावणेसिंधुसंज्ञाचभाद्रेपुण्याचगंडकी ॥ आ
श्विनेसरयूपुण्याभेयः पुण्यातुनर्मदेति ॥ ग्रहणकालेनदीपुरजस्वलापिस्नानमुक्तं ॥ छंदोगप
रिशिष्टे ॥ उपाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच ॥ चंद्रसूर्यग्रहेचैवरजोदोषोनविद्यतेइति ॥ न
दीनांरजोदर्शनकालः ॥ मासद्वयंश्रावणादिसर्वानद्योरजस्वलाः ॥ तासुस्नानंनकुर्वीतवर्ज
यित्वासमुद्रगाः ॥ सिंहकर्कगतेसूर्येसिंधुगान्यारजस्वलाः ॥ सिंधुगाः समुद्रगाः ॥ याः शोणमु
पगच्छतिग्रीष्मेकुमारितोभुवि ॥ तासुप्रावृषिनस्नायाद्दृष्टेर्दशवासरे ॥ भूमिस्थानवोदकेप्ये
वं ॥ कर्कटस्थेरवौगंगारेवाचंद्रभागागोमतीसरयूश्चत्र्यहंरजस्वलाः ॥ अथजन्मराशौजन्म
भेचग्रहणंभवतितस्योप्येकवारंग्रहणंदृष्ट्वामत्स्यपुराणोक्तविधिनास्नानादिकंकुर्यात्पुनः पुनर्न
पश्येत् ॥ तद्यथा ॥ यज्जन्मभंसमासाद्यभवेद्ग्रहणसंभवः ॥ तस्यस्नानंप्रवक्ष्यामिमंत्रौषधि
समन्वितं ॥ चंद्रोपरागंसंप्राप्यकृत्वाब्राह्मणवाचनं ॥ संपूज्यचतुरोविप्रा[illegible]शुक्लमाल्या
नुलेपनैः ॥ पूर्वमेवोपरागस्यसमानीयौषधादिकं ॥ स्थापयेच्चतुरः कुंभानग्रतः सागरानिव ॥
पंचगव्यंपंचरत्नंपंचत्वक्पंचपल्लवं ॥ रोचनंपद्मकंशंखंकुंकुमंरक्तचंदनं ॥ शुक्तिस्फटिकती

ध्यानमेव वरं ॥ त्रिचरणे त्रेतायां तपस्तथा श्रेष्ठं ॥ द्वापारे यज्ञो याग एव ॥ प्रांस्ये तुर्ये कलौ दानदयामा
उक्तौः ॥ तथा च वसिष्ठः ॥ ध्यानं परं कृतयुगे त्रेतायां लिंगपूजनं ॥ द्वापारे ध्ययनं तिष्ये माहादेवस्य की
र्तनं ॥ विष्णुधर्मोत्तरे ॥ ध्यानं परं कृतयुगे त्रेतायां च तपः परं ॥ द्वापरे तु तथा यज्ञः प्रतिष्ठा च कलौ युगे ॥ बृ
हस्पतिः ॥ तपो धर्मः कृतयुगे ज्ञानं त्रेतायुगे स्मृतं ॥ द्वापारे चाध्वरः प्रोक्तः स्तिष्ये दानं दया दमाः ॥ अथ क्र
मतया चतुर्णामपि युगानां पूज्य देवानाह ॥ क्रमतया क्रमेण कृतादियुगेषु केनाच्युतेशानूकश्चइनश्चा
च्युतश्चेशश्चकेनाच्युतेशास्तान ब्रह्म सूर्य विष्णु रुद्रानू यजेत् ॥ तथा च स्कांदे ॥ ब्रह्मा कृतयुगे दे
वस्त्रेतायां भगवान्रविः ॥ द्वापरे भगवान्विष्णुः कलौ देवो महेश्वरः ॥ अथैतेषु युगेषु धर्मस्य व
क्तारः ॥ मनुश्च गौतमश्च कृतत्रेतायुगयोः मनुगौतमौ ॥ स लिखितः शंखः शंखलिखितौ द्वाप
रे ॥ कलौ पराशरः ॥ इते धर्मप्रवक्तारः ॥ तथा च पराशरः कृते तु मानवो धर्मस्त्रेतायां गौतमः स्मृतः ॥
द्वापरे शंखलिखितौ कलौ पाराशरः स्मृतः ॥ च परं पातका महापातककरणात्कृतादियुगेषु दे
शपत्तनकुलानि एकं पातकिनं त्यजेत् ॥ तथा च पाराशरः ॥ त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृ
जेत् ॥ द्वापरे कुलमेकं तु कर्तारं तु कलौ त्यजेदिति ॥ तस्संसर्गो सातकी भवति तेनैषां त्यागः ॥ त
था च तत्रैव ॥ कृते संभाष्य पतति त्रेतायां स्पर्शनेन तु ॥ द्वापरे त्वन्नमादाय कलौ कर्तैव लिप्य

का.सि. ते॥११२ अथकलिवर्ज्यानाह॥ मद्यं गोहयगोमेधमेधकरणं ज्येष्ठांशको धारणं व्यूढायाः पु
१०८ नरुद्वहं वरसुरातिथ्यर्थमं संपशोः॥ आदेशात्सहजस्त्रियांसुतजनिं ब्रह्मव्रतं निष्ठयावानप्रस्थगतिं
११२ कमंडलुधृतिं स्तेयान्ययाप्युद्धृतिं॥ संकोचं गुणवित्तयाघनिकृतोयुद्धेघतास्त्रीं द्विजन्मत्राणां तं द्विज
पापनिःकृतिमसुभ्यो विप्रमामिश्रकं॥ मातुर्वंशसपिंडजापरिणयं हीनाद्धान्नाहृतिं स्तोरस्कसुता
न्यपालनमिराग्राहं च सौत्रामणो॥ ११५ ॥ सोमस्यक्रयणंप्रमांचशकुने सामुद्रिकोपश्रुतिस्यप्रा
दिष्वसवर्णजोद्वहमथो विप्राब्धिनोप्रस्थितं॥ प्रस्थानं महदग्निहोत्रहवणी लेहावलीढं ग्रहाविस्यादी
निकलौत्यजेदथहरेरारव्यागुणान्कीर्तयेत्॥ ११५ ॥ त्रयाणां व्याख्या॥ कलौकलियुगेइत्यादी
निविवर्जयेदितिप्रत्येकं संबध्यते॥ तानियथा॥ मद्यंमद्यपानं॥ द्विजातीनां १ गोर्धेनुर्हयोश्वः गोधोन
रः एतेषांमेधाकरणं गोमेध २ हयमेध ३ नरमेध ४ करणं त्यजेदित्यर्थः॥ विभागकाले ज्येष्ठापत्यस्य
द्विगुणांशोद्धारः ५ एकुवारं व्यूढायाः पुनरुद्वहं विवाहं ६ वरोविवाह्यः सुरान्विश्वेदेवाः पित्रादयः
अतिथिरभ्यागतस्तदर्थं पशोर्गोवृषस्यालंभांत्यजेत् ७ ज्येष्ठाद्यादेशात्सहजस्यभ्रातुः स्त्रियां दे
वरात्सुतजनिंत्यजेत् ८ निष्ठायाब्रह्मव्रतं नैष्ठिकब्रह्मचर्यं ९ वानप्रस्थगतिं वानप्रस्थाश्रमगमनं १० १०८
कमंडलुधृतिं कमंडलुधारणं ११ स्तेयीसुवर्णस्तेयीतद्धृतिरिस्त्तिपापिनस्त्रयः ब्रह्मासुरापीगुरुतत्र स्व
ल्पगस्तेषामुद्धृतिः प्रायश्चित्तेनोद्धारस्तां त्यजेत् १२ श्रोताद्विगुणावृत्तयाघनिकृतोप्रायश्चित्ते दत्त

ध

संकोचं न्यूनतां २३ युध्येऽद्यतास्त्रो द्विजस्तस्य प्राणांतं प्राणनाशं २४ असुभ्यः प्राणेभ्यो हेतुभ्यो
द्विजस्य पापानिष्कृतिं ॥ द्विजस्य काशीषामग्निप्रभृतिभिः प्राणांतैः प्रायश्चित्तैः पापनिष्कृतिं २५ वि
प्रस्य शामित्रकं शामितुः कर्म २६ मातुर्वंशे सपिंडा जायते या कन्या तया सह परिणयं विवाहं २७ अ
थ हीनाधीनवर्णजनादन्नस्याहृति मन्नानयनं २८ दत्तः केनचिद्दत्तः औरसः औरसदत्ताभ्यामन्ये ये सु
ताः क्रीतपालितलब्धादयस्तेषां पालनं स्वीकारं २९ सौत्रामणि नाम कयज्ञे द्रायाः सुरायाः ग्रह
ग्रहं त्यजेदिति ३० यज्ञे सोमस्य सोमवल्याः विक्रयं ३१ च परं एतेषु प्रमाप्रमाणं त्यजेत् केषु ॥ शाकुने
मृगविहंगसमुत्थे ॥ सामुद्रिकं । सुलक्षणप्रतिपादकं । उपश्रुतिः । रजकालयांतिगतकन्यादिश्रुत
वाक्यार्थे ॥ स्वप्नः स्वप्नावस्थायां दृष्टवस्तु इत्यादिषु प्रमाप्रमायां त्यजेत् । अथ सवर्णा अन्य
वर्णजा कन्या तस्या उद्वाहं विवाहं । अघोविप्राग्निनो प्रस्थितं । विप्रस्यादौ नानाप्रस्था
नं । महाप्रस्थानं । हिममार्गेणामेरुगमनं । महाप्रस्थानं त्यजेत् । केदारकल्पोक्ताघोरमंत्र
स्यासिद्धिरिति ॥ अग्निहोत्रस्य हवण्याः लेहः आस्वादनं । तथालीढायाः ग्रहं ग्रहणं । इत्या
दीनि व्यजेदिति पूर्वमाम्नातं ॥ तथान्यादित्यपुराणे ॥ दीर्घकालं ब्रह्मचर्यं धारणं च क
मंडलोः ॥ गोत्रान्मातुः सपिंडाश्च विवाहो गोवधस्तथा ॥ नराश्वमेधौ मद्यं च कलौ वर्ज्या

का॰सि॰ १०९ द्विजातिभिरिति॥ ऊढायाः पुनरुद्वाहो ज्येष्ठांशो धारणं च च॥ सत्यं तरे॥ विधवायां सुतोत्प
त्तौ देवरस्य नियोजनं॥ बालायाः क्षतयोन्याः स्तु वरेणान्येन संस्कृतिः॥ कन्यानामसवर्णा
नां विवाहश्च द्विजातिभिः॥ आततायि द्विजाग्र्याणां धर्मयुद्धे न हिंसनं॥ द्विजस्याब्धौ तु नौयातुः शो
धितस्यापि संग्रहः॥ सत्रदीक्षा च सर्वेषां कमंडलुविधारणं॥ महाप्रस्थानगमनं गोसंज्ञप्तिश्च गोसवे॥
सौत्रामण्यामपि सुराग्रहणस्य च संग्रहः॥ अग्निहोत्रहवण्याश्च लेहो लीढपरिग्रहः॥ वानप्रस्था
श्रमस्यापि प्रवेशो विधिनोदितः॥ वृत्तस्वाध्यायसापेक्षमघसंकोचनं तथा॥ प्रायश्चित्तविधानं च
विप्राणां मरणांतकं॥ संसर्गदोषस्तेयानां महापातकनिष्कृतिः॥ वरातिथिपितृभ्यश्च पशूपा
करणक्रिया॥ दत्तौरसेतरेषां च पुत्रत्वेन परिग्रहः॥ असवर्णागनादुष्टेः संसर्गः शोधितैरि
ति॥ अयोनौ संग्रहे वृत्ते परित्यागो गुरुस्त्रियाः॥ परोद्देशात्मसंत्यागउद्दिष्टस्यापि वर्जनं॥ प्रतिमा
भ्यर्चनार्थाय संकल्पश्च सधर्मकः॥ अस्थिसंचयनादूर्ध्वं अंगस्पर्शनमेव च॥ शामित्रं चैव वि
प्राणां सोमविक्रयणं तथा॥ षड्भक्तानशनचान्नहरणं हीनकर्मणः॥ एतानि लोकगुप्त्यर्थं कलेरादौ
महात्मभिः॥ निवर्तितानि विद्वद्भिर्व्यवस्थापूर्वकं बुधैः॥ समयश्चापि साधूनां प्रमाणं वेदवद्भवे १०९
दिति॥ आदित्यपुराणे॥ शपथः शकुनं स्वप्नः सामुद्रिकमुपश्रुतिः॥ उपयाचितमादेशाः संभ

का.सि.नि. एते त्रयः पुत्राः ब्रह्मा चेशश्च विष्णुश्चैते रूपमीयंतइति ब्रह्मेशविष्णूपमाः ॥ तत्र त्रिषु पुत्रेषु श्रीजयरामज
११० येन जयरामसुतेन श्रीरघुरामेणास्य याबुध्यानेकनिबंधकान् कालमाधवकाल तत्वविवेकादिनिबंधा
न् ज्ञात्वा सम्यग्विचार्य उद्धृत्यतो गयोर्लिखितं । तत्सर्वं दृष्ट्वा विलोक्य श्रीगिरिनारो रैवतताचलतस्यरा
जा तेन महितः पूजितः श्रीकान्हजि द्वाडवस्तस्य सुतो महादेववित् तर्कहरो मितेहृत्तेः षोडशोत्तरभूते
रिमं ग्रंथं व्यरचयदिति ॥११७॥ स्वस्ति श्रीनृपविक्रमात्तवविय संतेंदुरव्ये १७९९ वर्के मार्गमासि
सितेदले स्मरतिथौ वारे भृगोर्वा निशि भे ॥ साध्ये युज्यथ तैतिलाख्यकरणे श्रीमङ्कुजाख्ये पुरे द्विष्टार्थं र
घुरामकृत्तम करोद्ग्रंथं महादेववित् ॥११८॥ स्वस्ति श्रीनृपविक्रमात्तन वविय त्संतेंदुसंख्ये वत्के १७०९
वर्षे मार्गशीर्षमासि सिते दले शुक्लपक्षे स्मरतिथौ त्रयोदश्यां भृगुवारे कृत्तिकानक्षत्रे साध्ययोगे तैतिल
करणे एवं पंचांगे श्रीमङ्कुजाभिधे पुरे रघुरामेण कृतं रचितमर्थं विलोक्य महादेववित् ग्रंथमकरो
दलिखच्च ॥ ११८ ॥ अथ टीकालिखनसमयं व्याख्यातमुपदिशति ॥ ॥ शाके विक्रमभूपतेर्गगनभू सप्ते
दुसंख्ये १७१० यने सौम्ये माधवमास उज्ज्वलदले भानौ तिथौ पुष्यभे ॥ जीवाहे युजि गंजनाम्नि करणे षट्छभु
जे पत्तने व्याख्येयं जयरामजेन रघुणा ग्रंथस्य बुध्याकृता ॥ ११९ ॥ इति श्रीजयरामसुत द्विवेदी रघु
रामतनूजकन्होजी ब्राह्मण महादेवविदा विरचितो निर्णयसिद्धांतः समाप्तः ॥ तथा शके १७१० उत्त ११०
रायणे वैशाखमासे शुक्लपक्षे सप्तम्यां गुरुवारे पुष्यनक्षत्रे गंडयोगे वणिक्करणे एतादृशे समये भुजे ८

नगरे द्विवेदी जयरामजेन रघुरामेण महादेवविदो ग्रंथस्यैयं व्याख्या बुध्या मनीषया कृतेति
निर्गलितार्थः ॥ इति श्रीमद्द्विवेदी अग्निहोत्री कान्यकुब्जश्रीजयरामसुतश्रीरघुराम विरचिता
निर्णयसिद्धांतव्याख्या समाप्तिगमत् ॥ ११९ ॥ श्रीदत्तात्रेय ॥ श्रीशालिवाहनशाके १७२४ दुंदुभिसं

र्वंति कलौ कश्चित् ॥ तस्मात्तन्मात्रलाभेन न कलौ कार्यं न कारयेदिति ॥ एवं कलिवर्ज्यान्युक्त्वा क
लौ कर्तव्यमादिशति ॥ अथ हरेर्विष्णोराख्या नामानि गुणान् गजेंद्रमोक्षणादीन् कीर्तयेदिति ता
त्पर्यार्थः ॥ तथा चोक्तं विश्वामित्रेण ॥ रामेति वर्णद्वयमादरेण सदा स्मरन्मुक्तिमुपैति जंतुः ॥
कलौ युगे कल्मषमानसानामन्यत्र धर्मे खलु नाधिकारः ॥ इति ॥ दाल्भ्येपि ॥ आलोड्य सर्व
शास्त्राणि विचार्य च पुनः पुनः ॥ एक एवार्थ उत्पन्नो ध्येयो नारायणः सदेति कलिधर्मास्त्या
ज्यानि च ॥ १९५ ॥ अथ ग्रंथकर्तास्वात्मानमुपदिशति ॥ श्रीमत्सिंहपुरांतिके द्विजनिगमी वेला
वटाख्यपुरे श्रौतस्मार्तविधानसारचतुरो वैकुंठनामाऽभवत् ॥ तत्सूनुर्जयराम आद्य उदितः श्री
रामनामापरस्तत्सद्देहहरिरामइत्यभिधया ब्रह्मेशविष्णूपमाः १९६ ॥ तत्र श्रीजयरामजेन रघु
रामेणात्र बुध्या स्वया ज्ञात्वानेकनिबंधकान्विलिखिते निश्चित्य यद्यत्कृतः ॥ तद्दृष्ट्वा गिरिनाग
राजमहितः श्रीकान्हजीतत्सुतो हृत्तेस्तर्कहरोऽन्विते १९८ व्याख्यायं ग्रंथमहोद्भवविद् ॥ १९७ ॥
द्वयोर्व्याख्या ॥ श्रीमत्सिंहपुरस्य लोकप्रसिद्धसीहोरस्यांतिके समीपे वेलावटाख्यपुरे लोकप्रसि
द्धवेलावडपुरे द्विजनिगमी द्विवेदी वैकुंठनामा द्विजोऽभवत् ॥ किंलक्षणः ॥ श्रौतमग्निहोत्रादि स्मार्तमा
वसथ्यादि तयोर्विधानमाचरणं तस्य सार इति कर्तव्यता तत्र चतुरः कुशलः तस्य द्विवेदीवैकुंठना
म्नः आद्यः सुतः जयराम इत्यभिधया नाम्नोदितः समुद्भूतः तत्परः श्रीरामनामा ॥ तत्सद्देह हरिराम इति